# Shri Ranganatha Paduka Sahasram

# શ્રીરઙ્ગનાથપાદુકાસહસ્રમ્

## Document Information

Text title : Ranganatha Padukasahasram

File name : pAdukAsahasram.itx

Category : raama, vedAnta-deshika

Location : doc_raama

Author : vedAntadeshika

Proofread by : Pooja P

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# Shri Ranganatha Paduka Sahasram

# શ્રીરઙ્ગનાથપાદુકાસહસ્રમ્

શ્રીઃ ।

શ્રીમત્પ્રણતાર્તિહરવરદપરબ્રહ્મણે નમઃ ।

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।

## પાદુકાસહસ્રસ્ય અનુક્રમણિકા


પદ્ધતિ ક્રમાંક સૂચી (શ્લોકસઙ્ખ્યા)

૧. પ્રસ્તાવપદ્ધતિઃ (૨૦)

૨. સમાખ્યાપદ્ધતિઃ (૧૦)

૩. પ્રભાવપદ્ધતિઃ (૭૦)

૪. સમર્પણપદ્ધતિઃ (૨૦)

૫. પ્રતિપ્રસ્થાનપદ્ધતિઃ (૨૦)

૬. અધિકારપરિગ્રહપદ્ધતિઃ (૪૦)

૭. અભિષેકપદ્ધતિઃ (૩૦)

૮. નિર્યાતનાપદ્ધતિઃ (૩૦)

૯. વન્દિવૈતાલિકપદ્ધતિઃ (૧૦)

૧૦. શૃઙ્ગારપદ્ધતિઃ (૧૦)

૧૧. સઞ્ચારપદ્ધતિઃ (૬૦)

૧૨. પુષ્પપદ્ધતિઃ (૩૦)

૧૩. પરાગપદ્ધતિઃ (૩૦)

૧૪. નાદપદ્ધતિઃ (૧૦૦)

૧૫. રત્નસામાન્યપદ્ધતિઃ (૫૦)

૧૬. બહુરત્નપદ્ધતિઃ (૫૦)

૧૭. પદ્મરાગપદ્ધતિઃ (૩૦)

૧૮. મુક્તાપદ્ધતિઃ (૫૦)

૧૯. મરતકપદ્ધતિઃ (૨૦)

૨૦. ઇન્દ્રનીલપદ્ધતિઃ (૩૦)
૨૧. બિમ્બપ્રતિબિમ્બપદ્ધતિઃ (૨૦)
૨૨. કાઞ્ચનપદ્ધતિઃ (૨૦)
૨૩. શેષપદ્ધતિઃ (૧૦)
૨૪. દ્વન્દ્વપદ્ધતિઃ (૨૦)
૨૫. સન્નિવેશપદ્ધતિઃ (૨૦)
૨૬. યન્ત્રિકાપદ્ધતિઃ (૧૦)
૨૭. રેખાપદ્ધતિઃ (૧૦)
૨૮. સુભાષિતપદ્ધતિઃ (૧૦)
૨૯. પ્રકીર્ણકપદ્ધતિઃ (૮૦)
૩૦. ચિત્રપદ્ધતિઃ (૪૦)
૩૧. નિર્વેદપદ્ધતિઃ (૨૦)
૩૨. ફલપદ્ધતિઃ (૩૮)

શ્રીરઙ્ગનાથ દિવ્યમણિપાદુકાભ્યાં નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમાન્વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

## ૧. પ્રસ્તાવપદ્ધતિઃ (૨૦)

સન્તઃ શ્રીરઙ્ગપૃથ્વીશચરણત્રાણશેખરાઃ ।
જયન્તિ ભુવનત્રાણપદપઙ્કજરેણવઃ ॥ ૧.૧॥ ૧॥

ભરતાય પરં નમોઽસ્તુ તસ્મૈ પ્રથમોદાહરણાય ભક્તિભાજામ્ ।
યદુપજ્ઞમશેષતઃ પૃથિવ્યાં પ્રથિતો રાઘવપાદુકાપ્રભાવઃ ॥ ૧.૨॥ ૨॥

વર્ણસ્તોમૈર્વકુલસુમનોવાસનામુદ્વહન્તી-
માम्नાયાનાં પ્રકૃતિમપરાં સંહિતાં દૃષ્ટવન્તમ્ ।
પાદે નિત્યપ્રણિહિતધિયં પાદુકે રઙ્ગભર્તુ-
સ્ત્વન્નામાનં મુનિમિહ ભજે ત્વામહં સ્તોતુકામઃ ॥ ૧.૩॥ ૩॥

દિવ્યસ્થાનાત્ ત્વમિવ જગતીં પાદુકે ગાહમાના
પાદન્યાસં પ્રથમમનયા ભારતી યત્ર ચક્રે । var મનઘા
યોગક્ષેમં સકલજગતાં ત્વય્યધીનં સ જાન-

ન્વાચં દિવ્યાં દિશતુ વસુધાશ્રોત્રજન્મા મુનિર્મે ॥ ૧.૪॥ ૪॥

નીચેઽપિ હન્ત મમ મૂર્ધનિ નિર્વિશેષં
તુઙ્ગેઽપિ યન્નિવેશતે નિગમોત્તમાઙ્ગે ।
પ્રાચેતસપ્રભૃતિભિઃ પ્રથમોપગીતં
સ્તોષ્યામિ રઙ્ગપતિપાદુકયોર્યુગં તત્ ॥ ૧.૫॥ ૫॥

ધત્તે મુકુન્દમણિપાદુકયોર્નિવેશા-
દ્વલ્મીકસમ્ભવગિરાં સમતાં મમોક્તિઃ ।
ગઙ્ગાપ્રવાહપતિતસ્ય કિયાનિવ સ્યા-
દ્રથ્યોદકસ્ય યમુનાસલિલાદ્વિશેષઃ ॥ ૧.૬॥ ૬॥

વિજ્ઞાપયામિ કિમપિ પ્રતિપન્નભીતિઃ
પ્રાગેવ રઙ્ગપતિવિભ્રમપાદુકે ત્વામ્ ।
વક્તું ક્ષમાઃ સદસતી વિગતાભ્યસૂયાઃ var વ્યઙ્ક્તું
સન્તઃ સ્પૃશન્તુ સદયૈર્હૃદયૈઃ સ્તુતિં તે ॥ ૧.૭॥ ૭॥

અશ્રદ્દધાનમપિ નન્વધુના સ્વકીયે
સ્તોત્રે નિયોજયસિ માં મણિપાદુકે ત્વમ્ ।
દેવઃ પ્રમાણમિહ રઙ્ગપતિસ્તથાત્વે
તસ્યૈવ દેવિ પદપઙ્કજયોર્યથા ત્વમ્ ॥ ૧.૮॥ ૮॥

યદાધારં વિશ્વં ગતિરપિ ચ યસ્તસ્ય પરમા
તમપ્યેકા ધત્સે દિશિ વરગતિં તસ્ય રુચિરામ્ । var દિશસિ ચ ગતિં
કથં સા કંસારેર્દ્રુહિણહરદુર્બોધમહિમા
કવીનાં ક્ષુદ્રાણાં ત્વમસિ મણિપાદુ સ્તુતિપદમ્ ॥ ૧.૯॥ ૯॥

શ્રુતપ્રજ્ઞાસમ્પન્મહિતમહિમાનઃ કતિકતિ
સ્તુવન્તિ ત્વાં સન્તઃ શ્રુતિકુહરકણ્ડૂહરગિરઃ ।
અહં ત્વલ્પસ્તદ્વદિહ બહુ ચ જલ્પામિ તદપિ var ત્વલ્પસ્તદ્વદ્યદિહ
ત્વદાયત્તં રઙ્ગક્ષિતિરમણપાદાવનિ વિદુઃ ॥ ૧.૧૦॥ ૧૦॥

યદેષ સ્તૌમિ ત્વાં ત્રિયુગચરણત્રાયિણિ તતો var યદેષાં
મહિમ્નઃ કા હાનિસ્તવ મમ તુ સમ્પન્નિરવધિઃ ।
શુના લીઢા કામં ભવતુ સુરસિન્ધુર્ભગવતી
તદેષા કિમ્ભૂતા સ તુ સપદિ સન્તાપરહિતઃ ॥ ૧.૧૧॥ ૧૧॥

મિતપ્રેક્ષાલાભક્ષણપરિણમત્પઞ્ચષપદા
    મદુક્તિસ્ત્વય્યેષા મહિતકવિસંરમ્ભવિષયે ।
ન કસ્યેયં હાસ્યા હરિચરણધાત્રિ ક્ષિતિતલે
    મુહુર્વાત્યાધૂતે મુખપવનવિસ્ફૂર્જિતમિવ ॥ ૧.૧૨॥ ૧૨॥

નિઃસન્દેહનિજાપકર્ષવિષયોત્કર્ષોઽપિ હર્ષોદય-
    પ્રતૂહક્રમભક્તિવૈભવભવદ્વૈયાત્યવાચાલિતઃ । var પ્રત્યૂઢ
રઙ્ગાધીશપદત્રવર્ણનકૃતારમ્ભૈર્નિગુમ્ભૈર્ગિરાં
    નર્માસ્વાદિષુ વેઙ્કટેશ્વરકવિર્નાસીરમાસીદતિ ॥ ૧.૧૩॥ ૧૩॥

રઙ્ગક્ષ્માપતિરત્નપાદુ ભવતીં તુષ્ટૂષતો મે જવા-
    જ્જૃમ્ભન્તાં ભવદીયશિઞ્જિતસુધાસન્દોહસન્દેહદાઃ ।
શ્લાઘાઘૂર્ણિતચન્દ્રશેખરજટાજઙ્ઘાલગઙ્ગાપય-
    સ્ત્રાસાદેશવિશૃઙ્ખલપ્રસરણોત્સિક્તાઃ સ્વયં સૂક્તયઃ ॥ ૧.૧૪॥ ૧૪॥

હિમવન્નલસેતુમધ્યભાજાં ભરતાભ્યર્ચિતપાદુકાવતંસઃ । var હિમવદચલ
અતપોધનધર્મતઃ કવીનામખિલેષ્વસ્મિ મનોરથેષ્વબાહ્યઃ ॥ ૧.૧૫॥ ૧૫॥

અનિદમ્પ્રથમસ્ય શબ્દરાશેરપદં રઙ્ગધુરીણપાદુકે ત્વામ્ ।
ગતભીતિરભિષ્ટુવન્ વિમોહાત્પરિહાસેન વિનોદયામિ નાથમ્ ॥ ૧.૧૬॥ ૧૬॥

વૃત્તિભિર્બહુવિધાભિરાશ્રિતા વેઙ્કટેશ્વરકવેઃ સરસ્વતી ।
અદ્ય રઙ્ગપતિરત્નપાદુકે નર્તકીવ ભવતીં નિષેવતામ્ ॥ ૧.૧૭॥ ૧૭॥

અપારકરુણામ્બુધેસ્તવ ખલુ પ્રસાદાદહં
    વિધાતુમપિ શક્નુયાં શતસહસ્રિકાં સંહિતામ્ ।
તથાપિ હરિપાદુકે તવ ગુણૌઘલેશસ્થિતે-
    રુદાહૃતિરિયં ભવેદિતિ મિતાઽપિ યુક્તા સ્તુતિઃ ॥ ૧.૧૮॥ ૧૮॥

અનુકૃતનિજનાદાં સૂક્તિમાપાદયન્તી
    મનસિ વચસિ ચ ત્વં સાવધાના મમ સ્યાઃ ।
નિશમયતિ યથાઽસૌ નિદ્રયા દૂરમુક્તઃ
    પરિષદિ સહ લક્ષ્મ્યા પાદુકે રઙ્ગનાથઃ ॥ ૧.૧૯॥ ૧૯॥

ત્વયિ વિહિતા સ્તુતિરેષા પદરક્ષિણિ ભવતિ રઙ્ગનાથપદે ।
તદુપરિ કૃતા સપર્યા નમતામિવ નાકિનાં શિરસિ ॥ ૧.૨૦॥ ૨૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય

શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પ્રસ્તાવપદ્ધતિઃ પ્રથમા ॥

## ૨. સમાખ્યાપદ્ધતિઃ (૧૦)

વન્દે વિષ્ણુપદાસક્તં તમૃષિં તાં ચ પાદુકામ્ । var પાદુકામ્ ચ તામ્
યથાર્થા શઠજિત્સંજ્ઞા મચ્ચિત્તવિજયાદ્યયોઃ ॥ ૨.૧॥ ૨૧॥ var યથાર્થશઠજિત્સંજ્ઞા

દ્રવિડોપનિષન્નિવેશશૂન્યાનપિ લક્ષ્મીરમણાય રોચયિષ્યન્ । var દ્રમિડો
ધ્રુવમાવિશતિ સ્મ પાદુકાત્મા શઠકોપઃ સ્વયમેવ માનનીયઃ ॥ ૨.૨॥ ૨૨॥

નિયતં મણિપાદુકે દધાનઃ સ મુનિસ્તે શઠકોપ ઇત્યભિખ્યામ્ ।
ત્વદુપાશ્રિતપાદજાતવંશપ્રતિપત્યૈ પરમાતતાન રૂપમ્ ॥ ૨.૩॥ ૨૩॥

મુનિના મણિપાદુકે ત્વયા ચ પ્રથિતાભ્યાં શઠકોપસંજ્ઞયૈવ ।
દ્વિતયં સકલોપજીવ્યમાસીત્પ્રથમેન શ્રુતિરન્યતસ્તદર્થઃ ॥ ૨.૪॥ ૨૪॥

આકર્ણ્ય કર્ણામૃતમાત્મવન્તો ગાથાસહસ્રં શઠકોપસૂરેઃ ।
મઞ્જુપ્રણાદાં મણિપાદુકે ત્વાં તદેકનામાનમનુસ્મરન્તિ ॥ ૨.૫॥ ૨૫॥

યઃ સપ્તપર્વવ્યવધાનતુઙ્ગાં શેષત્વકાષ્ઠામભજન્મુરારેઃ । var સ સપ્ત
તસ્યાપિ નામોદ્વહનાત્ ત્વયાઽસૌ લઘૂકૃતોઽભૂચ્છઠકોપસૂરિઃ ॥ ૨.૬॥ ૨૬॥

શય્યાત્મના મધુરિપોરસિ શેષભૂતા
    પાદાશ્રયેણ ચ પુનર્દ્વિગુણીકૃતં તત્ ।
ભૂયોઽપિ ભાગવતશેષતયા તદેવ
    વ્યઙ્ક્તું પદાવનિ શઠારિપદં બિભર્ષિ ॥ ૨.૭॥ ૨૭॥

પદ્યેન દેવિ શઠકોપમુનિસ્તવાસી-
    ત્તસ્યાપિ નામવહનાન્મણિપાદુકે ત્વમ્ ।
શેષીબભૂવ યુવયોરપિ શેષશાયી
    શેષં ત્વશેષમપિ શેષપદે સ્થિતં વઃ ॥ ૨.૮॥ ૨૮॥

વિન્ધ્યસ્તમ્ભાદવિહતગતેર્વિષ્વગાચાન્તસિન્ધોઃ
    કુમ્ભીસૂનોરસુરકબલગ્રાસિનઃ સ્વૈરભાષા ।
નિત્યં જાતા શઠરિપુતનોર્નિષ્પતન્તી મુખાત્ તે
    પ્રાચીનાનાં શ્રુતિપરિષદાં પાદુકે પૂર્વગણ્યા ॥ ૨.૯॥ ૨૯॥

શઠકોપ ઇતિ સમાખ્યા તવ રઙ્ગધુરીણપાદુકે યુક્તા ।
સૂતે સહસ્રમેવં સૂક્તીઃ સ્વયમેવ યન્મયા ભવતી ॥ ૨.૧૦॥ ૩૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
સમાખ્યાપદ્ધતિર્દ્વિતીયા ॥

## ૩. પ્રભાવપદ્ધતિઃ (૭૦)

વન્દે તદ્રઙ્ગનાથસ્ય માન્યં પાદુકયોર્યુગમ્ ।
ઉન્નતાનામવનતિર્નતાનાં યત્ર ચોન્નતિઃ ॥ ૩.૧॥ ૩૧॥

નિશ્શેષમમ્બરતલં યદિ પત્રિકા સ્યા-
 ત્સપ્તાર્ણવી યદિ સમેત્ય મષી ભવિત્રી ।
વક્તા સહસ્રવદનઃ પુરુષઃ સ્વયં ચે-
 લ્લિખ્યેત રઙ્ગપતિપાદુકયોઃ પ્રભાવઃ ॥ ૩.૨॥ ૩૨॥

વેદોપબૃંહણકુતૂહલિના નિબદ્ધં
 વિશ્વમ્ભરાશ્રુતિભવેન મહર્ષિણા યત્ ।
વ્યાસેન યચ્ચ મધુસૂદનપાદરક્ષે
 દ્વે ચક્ષુષી ત્વદનુભાવમવેક્ષિતું નઃ ॥ ૩.૩॥ ૩૩॥

પ્રત્યક્ષયન્તિ પરિશુદ્ધધિયો યથાવ-
 દ્રામાયણે રઘુપુરન્દરપાદરક્ષે ।
શશ્વત્પ્રપઞ્ચિતમિદમ્પરયૈવ વૃત્ત્યા
 સઙ્ક્ષેપવિસ્તરદશાસુ તવાનુભાવમ્ ॥ ૩.૪॥ ૩૪॥

અલ્પશ્રુતૈરપિ જનૈરનુમીયસે ત્વં
 રઙ્ગેશપાદુ નિયતં નિગમોપગીતા ।
સારં તદર્થમુપબૃંહયિતું પ્રણીતં
 રામાયણં તવ મહિમ્નિ યતઃ પ્રમાણમ્ ॥ ૩.૫॥ ૩૫॥

તિષ્ઠન્તુ શ્રુતયસ્તતોઽપિ મહિતં જાગર્તિ તત્પાદુકે
 તત્તાદૃક્પ્રથનાય તાવકગુણગ્રામાય રામાયણમ્ ।
યસ્યાસીદરવિન્દસમ્ભવવધૂમઞ્જીરશિઞ્જારવ-
 સ્પર્ધાદુર્ધરપાદબદ્ધભણતિર્વલ્મીકજન્મા કવિઃ ॥ ૩.૬॥ ૩૬॥ var ફણિતિ

ભક્તિપ્રહ્વપુરપ્રભઞ્જનજટાવાટીસનીડસ્ફુર-
    ચ્ચૂડારગ્વધવાસનાપરિમલસ્ત્યાને સ્તુમઃ પાદુકે ।
રઙ્ગક્ષોણિભૃદઙ્ઘ્રિપદ્મયુગલીપૂર્ણપ્રપત્તેઃ ફલં
    નિશ્ચિન્વન્તિ વિપશ્ચિતઃ શમધના નિત્યં યદુત્તંસનમ્ ॥ ૩.૭॥ ૩૭॥

માતર્માધવપાદુકે તવ ગુણાન્કઃ સ્તોતુમસ્તોકધીઃ
    કોટીરેષુ યદર્પણપ્રણયિનાં સેવાક્ષણે સ્વર્ગિણામ્ ।
અન્યોન્યં ક્ષિપતામહમ્પ્રથમિકાસમ્મર્દકોલાહલં
    વિષ્વક્સેનવિહારવેત્રલતિકાકમ્પશ્ચિરાલ્લુમ્પતિ ॥ ૩.૮॥ ૩૮॥

યોષિદ્ભૂતદૃષન્ત્યપોઢશકટસ્થેમાનિ વૈમાનિક-
    સ્રોતસ્વિન્યુપલમ્ભનાનિ ભસિતોદઞ્ચત્પરીક્ષિન્તિ ચ ।
દૂત્યાદિષ્વપિ દુર્વચાંસિ પદયોઃ કૃત્યાનિ મત્વેવ ય-  var  દુર્વચાનિ
    દ્ધત્તે તત્પ્રણયં તદેવ ચરણત્રાણં વૃણે રઙ્ગિણઃ ॥ ૩.૯॥ ૩૯॥   var  ત્તદ્ધત્તત્પ્રણયં
વન્દે તન્મધુકૈટભારિપદયોર્મિત્રં પદત્રદ્વયં
    યત્તદ્ભક્તિભરાનતેન શિરસા યત્ર ક્વચિત્ બિભ્રતિ ।
દ્વિત્રબ્રહ્મવિનાડિકાવધિપદવ્યત્યાસશઙ્કાભર-
    ત્રાસોત્કમ્પદશાવિસંસ્થુલધૃતિસ્ત્રૈવિષ્ટપાનાં ગણઃ ॥ ૩.૧૦॥ ૪૦॥

પદ્માકાન્તપદાન્તરઙ્ગવિભવોદ્રિક્તં પદત્રં ભજે
    યદ્ભક્ત્યા નમતાં ત્રિવિષ્ટપસદાં ચૂડાપદેષ્વર્પિતમ્ ।  var  ચ સતાં
નિત્યાપીતનખેન્દુદીધિતિસુધાસન્દોહમુચ્ચૈર્વમ-
    ત્યન્તર્નૂનમમાન્તમન્તિકલગચ્છેષાપટચ્છદ્મના ॥ ૩.૧૧॥ ૪૧॥   var  કલસ
તદ્વિષ્ણોઃ પરમં પદત્રયુગલં ત્રય્યન્તપર્યન્તગં
    ચિન્તાતીતવિભૂતિકં વિતરતુ શ્રેયાંસિ ભૂયાંસિ નઃ ।
યદ્વિક્રાન્તિદશાસમુત્થિતપદપ્રસ્યન્દિપાથસ્વિની-
    સખ્યેનેવ સદાનતસ્ય તનુતે મૌલૌ સ્થિતિં શૂલિનઃ ॥ ૩.૧૨॥ ૪૨॥

અમ્બુન્યમ્બુનિધેરનન્યગતિભિર્મીનૈઃ કિયદ્ ગમ્યતે
    ક્લેશેનાપિ કિયદ્વ્યલઙ્ઘિ રભસોત્તુઙ્ગૈઃ પ્લવઙ્ગેશ્વરૈઃ ।
વિજ્ઞાતા કિયતી પુનઃ ક્ષિતિભૃતા મન્થેન ગમ્ભીરતા
    કિં તૈઃ કેશવપાદુકાગુણમહામ્બોધેસ્તટસ્થા વયમ્ ॥ ૩.૧૩॥ ૪૩॥

પદકમલરજોભિર્વાસિતે રઙ્ગભર્તુઃ
    પરિચિતનિગમાન્તે પાદુકે ધારયન્તઃ ।

અવિદિતપરિપાકં ચન્દ્રમુત્તંસયન્તે
  પરિણતભુવનં તત્પદ્મમધ્યાસતે વા ॥ ૩.૧૪॥ ૪૪॥

સકૃદપિ ભુવનેઽસ્મિઞ્શાર્ઙ્ગિણઃ પાદુકે ત્વાં var કિલ મૂર્ધ્ના શાર્ઙ્ગિણઃ
  મનુજમનુવહન્તં દેહબન્ધવ્યપાયે ।
ઉપચરતિ યથાર્હં દેવવર્ગસ્ત્વદીયઃ
  સ તુ નિયમિતભૃત્યો જોષમાસ્તે કૃતાન્તઃ ॥ ૩.૧૫॥ ૪૫॥

પદસરસિજમેતત્પાદુકે રઙ્ગભર્તુઃ
  પ્રતિનિધિપદવીં તે ગાહતે સ્વેન ભૂમ્ના ।
તદિદમપરથા ચેત્ તિષ્ઠતસ્તસ્ય નિત્યં
  કથમિવ વિદિતાર્થાસ્ત્વાં ભજન્તે મહાન્તઃ ॥ ૩.૧૬॥ ૪૬॥

શ્રુતિશિરસિ નિગૂઢં કર્મણાં ચોદિતાનાં
  ત્વદવધિ વિનિવેશં નાધિગન્તું ક્ષમાણામ્ ।
પરિહસતિ મુરારેઃ પાદુકે બાલિશાનાં
  પશુવધપરિશેષાન્પણ્ડિતો નામયજ્ઞાન્ ॥ ૩.૧૭॥ ૪૭॥

જનયિતુમલમર્ઘ્યં દૈત્યજિત્પાદરક્ષે
  નમતિ મહતિ દેવે નાકસિન્ધોર્વિશીર્ણાઃ ।
મુહુરહિપતિચૂડામૌલિરત્નાભિઘાતા-
  ત્પરિણતલઘિમાનઃ પાથસામૂર્મયસ્તે ॥ ૩.૧૮॥ ૪૮॥

પદસરસિજયોસ્ત્વં પાદુકે રઙ્ગભર્તુ-
  ર્મનસિ મુનિજનાનાં મૌલિભાગે શ્રુતીનામ્ । var મૌલિદેશે
વચસિ ચ સુકવીનાં વર્તસે નિત્યમેકા
  તદિદમવગતં તે શાશ્વતં વૈશ્વરૂપ્યમ્ ॥ ૩.૧૯॥ ૪૯॥

પરિસરવિનતાનાં મૂર્ધ્નિ દુર્વર્ણપઙ્ક્તિં
  પરિણમયસિ શૌરેઃ પાદુકે ત્વં સુવર્ણમ્ ।
કુહકજનવિદૂરે સત્પથે લબ્ધવૃત્તેઃ
  ક્ક નુ ખલુ વિદિતસ્તે કોઽપ્યસૌ ધાતુવાદઃ ॥ ૩.૨૦॥ ૫૦॥

બલિમથનવિહારાદ્વર્ધમાનસ્ય વિષ્ણો-
  રખિલમતિપતદ્ભિર્વિક્રમૈરપ્રમેયઃ ।
અવધિમનધિગચ્છન્પાપરાશિર્મદીયઃ
  સમજનિ પદરક્ષે સાવધિસ્ત્વન્મહિમ્ના ॥ ૩.૨૧॥ ૫૧॥

તટભુવિ યમુનાયાસ્તસ્થુષી યન્નિવેશા-
    દ્ભજતિ નિગમશાખાવૈભવં નીપશાખા ।
પદકમલયુગં તત્પાદુકે રઙ્ગભર્તુ-
    સ્ત્વયિ ભજતિ વિભૂતિં પશ્ય શાખાનુશાખામ્ ॥ ૩.૨૨॥ ૫૨॥

શિરસિ વિનિહિતાયાં ભક્તિનમ્રૈર્ભવત્યાં var ભક્તિનમ્રે ભવત્યાં
    સપદિ તનુભૃતસ્તામુન્નતિં પ્રાપ્નુવન્તિ ।
મધુરિપુપદરક્ષે યદ્વશેનૈવ તેષા-
    મનિતરસુલભં તદ્ધામ હસ્તાપચેયમ્ ॥ ૩.૨૩॥ ૫૩॥

સકૃદપિ ભુવનેઽસ્મિન્ શાર્ઙ્ગિણઃ પાદુકે ત્વા-
    મુપનિષદનુકલ્પૈરુત્તમાઙ્ગૈર્દધાનાઃ ।
નરકમિવ મહાન્તો નાકમુલ્લઙ્ઘયન્તઃ
    પરિષદિ નિવિશન્તે પ્રાક્તનાનાં ગુરૂણામ્ ॥ ૩.૨૪॥ ૫૪॥

શમદમગુણદાન્તોદન્તવૈદેશિકાનાં
    શરણમશરણાનાં માદૃશાં માધવસ્ય ।
પદકમલમિદં તે પાદુકે રક્ષ્યમાસી-
    દનુદયનિધનાનામાગમાનાં નિધાનમ્ ॥ ૩.૨૫॥ ૫૫॥

પરિચિતપદપદ્માં પાદુકે રઙ્ગિણસ્ત્વાં
    ત્રિભુવનમહનીયાં સાદરં ધારયન્તઃ ।
નિજશિરસિ નિલીનં દેવિ મન્દારમાલ્યં
    નિગમપરિમલૈસ્તે વાસયન્તીવ દેવાઃ ॥ ૩.૨૬॥ ૫૬॥

કનકસરિદનૂપે કલ્પવૃક્ષસ્ય ભૂષ્ણોઃ
    પદકિસલયલગ્ના પાદુકે મઞ્જરી ત્વમ્ ।
પરિણતિમધુરાણાં યા ફલાનાં સવિત્રી
    વહસિ નિગમવૃન્દૈઃ સમ્પદં ષટ્પદાનામ્ ॥ ૩.૨૭॥ ૫૭॥

પરિકલયસિ ચેન્માં પદ્મવાસાનિષેવ્યે
    પદકમલયુગે ત્વં પાદુકે રઙ્ગભર્તુઃ ।
અવિદિતનિગમાનાં નૂનમસ્માદૃશાના-
    મઘટિતઘટની તે શક્તિરાવિષ્કૃતા સ્યાત્ ॥ ૩.૨૮॥ ૫૮॥

શ્રુતિશતશિરશ્ચૂડાપીડે નિપીડયિતું ક્ષમે

દુરિતસરિતામોઘાનેતાનમોઘવિસર્પિણઃ ।
ક્રમપરિણમદ્બ્રેધઃશ્રેણીશિખામણિઘટ્ટના-
ન્મસૃણિતતલે રઙ્ગક્ષોણીભૃતો મણિપાદુકે ॥ ૩.૨૯॥ ૫૯॥

જગજ્જનનરક્ષણપણસઙ્ગિનો રઙ્ગિણઃ
પવિત્રતમમાદ્રિયે ભગવતઃ પદત્રદ્વયમ્ ।
શિવત્વકરણક્ષમત્રિદિવસિન્ધુસમ્બન્ધિનં
પ્રધાવ્ય ચરણં નિજં પ્રણિદધાતિ યત્ર પ્રભુઃ ॥ ૩.૩૦॥ ૬૦॥

યદધ્વરભુજાં શિરઃ પદયુગં ચ રઙ્ગેશિતુ-
ર્દૃઢં ઘટયિતું ક્ષમં ભવતિ શેષશેષિત્વતઃ ।
શિરસ્ત્રમિદમસ્તુ મે દુરિતસિન્ધુમુષ્ટિન્ધયં
કદધ્વવિહતિક્ષમં કિમપિ તત્પદત્રદ્વયમ્ ॥ ૩.૩૧॥ ૬૧॥

સમુત્ક્ષિપતિ ચેતસિ સ્થિરનિવેશિતા તાવકી
મુકુન્દમણિપાદુકે મુહુરુપાસનાવાસના ।
ઉદર્કપરિકર્કશાનુપરિપર્વણાખર્વિતા-
નનર્થશતગર્ભિતાનમરશમ્ભલીવિભ્રમાન્ ॥ ૩.૩૨॥ ૬૨॥

વિગાહન્તે રઙ્ગક્ષિતિપતિપદત્રાયિણિ સકૃ-
દ્વહન્તસ્ત્વામન્તર્વિનિહિતકુચેલવ્યતિકરાઃ ।
મદોદ્દામસ્તમ્બેરમકરટનિર્યન્મધુઝરી-
પરીવાહપ્રેઙ્ખદ્ભ્રમરમુખરામઙ્ગણભુવમ્ ॥ ૩.૩૩॥ ૬૩॥

અધિદૈવતમાપતત્સુ કલ્પેષ્વધિકારં ભજતાં પિતામહાનામ્ ।
અભિરક્ષતુ રઙ્ગભર્તુરેષા કરુણા કાચન પાદુકામયી નઃ ॥ ૩.૩૪॥ ૬૪॥

ધ્રુવમિન્દ્રિયનાગશ‍ૃઙ્ખલા વા નિરયદ્વારનિવારણાર્ગલા વા ।
અનયાપપદાધિરોહણી વા મમ રઙ્ગેશવિહારપાદુકે ત્વમ્ ॥ ૩.૩૫॥ ૬૫॥

શરણાગતસાર્થવાહશીલાં શ્રુતિસીમન્તપદપ્રસાદનાર્હામ્ ।
અધિરઙ્ગમુપાસ્મહે મુરારેર્મહનીયાં તપનીયપાદુકે ત્વામ્ ॥ ૩.૩૬॥ ૬૬॥

ઇહ યે ભવતીં ભજન્તિ ભક્ત્યા
કૃતિનઃ કેશવપાદુકે નિયુક્તાઃ ।
કથયામ્બ તિરોહિતં તૃતીયં નયનં
ત્રીણિ મુખાનિ વા કિમેષામ્ ॥ ૩.૩૭॥ ૬૭॥

મધુવૈરિપરિગ્રહેષુ નિત્યં ક્ષમયા ત્વં મણિપાદુકે સમેતા ।
તદપિ ક્ષમસે ન કિં પરેષાં ત્રિદશાધીશ્વરશેખરે નિવેશમ્ ॥ ૩.૩૮॥ ૬૮॥

દ્વિતયં પ્રતિયન્તિ રઙ્ગભર્તુઃ કતિચિત્ કાઞ્ચનપાદુકે શરણ્યમ્ ।
અભયાન્વિતમગ્રિમં કરં વા ભવતીશેખરિતં પદામ્બુજં વા ॥ ૩.૩૯॥ ૬૯॥

ભરતાશ્વસનેષુ પાદશબ્દં વસુધાશ્રોત્રસમુદ્ભવો મુનીન્દ્રઃ ।
પઠતિ ત્વયિ પાદુકે તતસ્ત્વં નિયતં રામપદાદભિન્નભૂમા ॥ ૩.૪૦॥ ૭૦॥

મકુટેષુ નિવિશ્ય દિક્પતીનાં પદમેવ પ્રતિપદ્ય રઙ્ગભર્તુઃ ।
પરિરક્ષસિ પાદુકે પદં ત્વં ક્વ નુ ભિદ્યેત ગરીયસાં પ્રભાવઃ ॥ ૩.૪૧॥ ૭૧॥

જગતામભિરક્ષણે ત્રયાણામધિકારં મણિપાદુકે વહન્ત્યોઃ ।
યુવયોઃ પરિકર્મકોટિલગ્નં ચરણદ્વન્દ્વમવૈમિ રઙ્ગભર્તુઃ ॥ ૩.૪૨॥ ૭૨॥

પદરક્ષિણિ વત્સલા નિકામં રઘુવીરસ્ય પદામ્બુજાદપિ ત્વમ્ ।
યદસૌ ભરતસ્ત્વયાંશવત્ત્વાન્ન પુનસ્તાદૃશમન્વભૂદ્વિયોગમ્ ॥ ૩.૪૩॥ ૭૩॥

અભિગમ્ય મુકુન્દપાદુકે ત્વામપનીતાતપવારણૈઃ શિરોભિઃ ।
હરિતાં પતયો દુરાપમન્યૈરનઘચ્છાયમવાપ્નુવન્તિ ભોગમ્ ॥ ૩.૪૪॥ ૭૪॥

અપહાય સિતાસિતાનુપાયાનરવિન્દેક્ષણપાદુકે મહાન્તઃ ।
ત્વદનન્યતયા ભજન્તિ વૃત્તિં ત્વદસાધારણભોગસાભિલાષાઃ ॥ ૩.૪૫॥ ૭૫॥

પ્રણમન્તિ ન વા વિધેર્વિપાકાદ્ય ઇમે રઙ્ગનરેન્દ્રપાદુકે ત્વામ્ ।
ઉપજાતમનુત્તમાઙ્ગમેષામુભયેષામપિ ચિત્રમુત્તમાઙ્ગમ્ ॥ ૩.૪૬॥ ૭૬॥

તવ કેશવપાદુકે પ્રભાવો મમ દુષ્કર્મ ચ નન્વનન્તસારે ।
નિયમેન તથાઽપિ પશ્ચિમસ્ય પ્રથમેનૈવ પરાભવં પ્રતીમઃ ॥ ૩.૪૭॥ ૭૭॥

અસ્ત્રભૂષણતયૈવ કેવલં વિશ્વમેતદખિલં બિભર્તિ યઃ ।
અક્લમેન મણિપાદુકે ત્વયા સોઽપિ શેખરતયૈવ ધાર્યતે ॥ ૩.૪૮॥ ૭૮॥

રામપાદસહધર્મચારિણીં પાદુકે નિખિલપાતકચ્છિદમ્ ।
ત્વામશેષજગતામધીશ્વરીં ભાવયામિ ભરતાધિદેવતામ્ ॥ ૩.૪૯॥ ૭૯॥

ચૂડાકપાલવ્યતિષઙ્ગદોષં વિમોચયિષ્યન્નિવ વિષ્ણુપદ્યાઃ ।
કૃતાદરઃ કેશવપાદરક્ષે બિભર્તિ બાલેન્દુવિભવણસ્ત્વામ્ ॥ ૩.૫૦॥ ૮૦॥

ત્વયૈવનિત્યં મણિપાદરક્ષે રાજન્વતી સૃષ્ટિરિયં પ્રજાનામ્ ।
સ્ત્રીરાજ્યદોષપ્રશમાય નૂનં નિર્દિશ્યસે નાથવિશેષણેન ॥ ૩.૫૧॥ ૮૧॥

બિભર્ષિ નિત્યં મણિપાદુકે ત્વં વિશ્વમ્ભરં ધામ નિજેન ભૂમ્ના ।
તવાનુભાવશ્ચુલકીકૃતોઽયં ભક્તૈરજસ્રં ભવતીં દધાનૈઃ ॥ ૩.૫૨॥ ૮૨॥

પરસ્ય પુંસઃ પદસન્નિકર્ષે તુલ્યાધિકારાં મણિપાદુકે ત્વામ્ ।
ઉત્તંસયન્તિ સ્વયમુત્તમાઙ્ગૈઃ શેષાસમં શેષગરુત્મદાદ્યાઃ ॥ ૩.૫૩॥ ૮૩॥

મુકુન્દ પાદામ્બુજધારિણિ ત્વાં મોહાદનુત્તંસયતાં જનાનામ્ ।
મૂર્ધ્નિ સ્થિતા દુર્લિપયો ભવન્તિ પ્રશસ્તવર્ણાવલયસ્તદીયાઃ ॥ ૩.૫૪॥ ૮૪॥

ભૂમિઃ શ્રુતીનાં ભુવનસ્ય ધાત્રી ગુણૌરનન્તા વિપુલા વિભૂત્યા ।
સ્થિરા સ્વયં પાલયિતું ક્ષમા નઃ સર્વંસહા શૌરિપદાવનિ ત્વમ્ ॥ ૩.૫૫॥ ૮૫॥

સ્થૈર્યં કુલક્ષોણિભૃતાં વિધત્સે
    શેષાદયસ્ત્વાં શિરસા વહન્તિ ।
પદપ્રસૂતા પરમસ્ય પુંસઃ
    પૃથ્વીમહિમ્ના મણિપાદુકે ત્વમ્ ॥ ૩.૫૬॥ ૮૬॥

દૈત્યાધિપાનાં બલિનાં કિરીટા
    નિક્ષેપણં તે યદિ નાભ્યનન્દન્ ।
રઙ્ગેશપાદાવનિ રઙ્ગધામ્નઃ
    સોપાનતાં પ્રાપ્ય વહન્ત્યમી ત્વામ્ ॥ ૩.૫૭॥ ૮૭॥

શેષો ગરુત્માન્ મણિપાદપીઠી
    ત્વં ચેતિ પાદાવનિ વિશ્વમાન્યાઃ ।
તુલ્યાધિકારા યદિ કિન્તુ સન્ત-
    સ્ત્વામેવ નિત્યં શિરસા વહન્તિ ॥ ૩.૫૮॥ ૮૮॥

પરસ્ય પુંસઃ પરમં પદં ત-
    દ્બિભર્ષિ નિત્યં મુણિપાદુકે ત્વમ્ । var મનિપાદરક્ષે
અન્યાદૃશાં વ્યોમસદાં પદાનિ
    ત્વય્યાયતન્તે યદિદં ન ચિત્રમ્ ॥ ૩.૫૯॥ ૮૯॥

પાદૌ મુરારેઃ શરણં પ્રજાનાં તયોસ્તદેવાસિ પાદાવનિ ત્વમ્ ।
શરણ્યતાયાસ્ત્વમનન્યરક્ષા સન્દૃશ્યસે વિશ્રમભૂમિરેકા ॥ ૩.૬૦॥ ૯૦॥

અન્યેષુ પદ્માકમલાસનાદ્યૈરઙ્ગેષુ રઙ્ગાધિપતેઃ શ્રિતેષુ ।
પદાવનિ ત્વામધિગમ્ય જાતં પદં મુરારેરધિદૈવતં નઃ ॥ ૩.૬૧॥ ૯૧॥

ક્ષણં સરોજેક્ષણપાદુકે યઃ કૃતાદરઃ કિઙ્કુરુતે ભવત્યાઃ ।
અકિઞ્ચિનસ્યાપિ ભવન્તિ શીઘ્રં ભ્રૂકિઙ્કરાસ્તસ્ય પુરન્દરાદ્યાઃ ॥ ૩.૬૨॥ ૯૨॥

વહન્તિ યે માધવપાદુકે ત્વામુહ્યન્ત એતે દિવિ નિર્વિઘાતાઃ ।
હંસેન નિત્યં શરદભ્રભાસા કૈલાસગૌરેણ કકુદ્મતા વા ॥ ૩.૬૩॥ ૯૩॥

રુદ્રં શ્રિતો દેવગણઃ સ રુદ્રઃ
    પદ્માસનં સોઽપિ ચ પદ્મનાભમ્ ।
સ ત્વામનન્તો ન પુનસ્ત્વમન્યં
    ક એષ પાદાવનિ તે પ્રભાવઃ ॥ ૩.૬૪॥ ૯૪॥

પરસ્ય ધામ્નઃ પ્રતિપાદનાર્હાં વદન્તિ વિદ્યાં મણિપાદુકે ત્વામ્ ।
યતસ્તવૈવાધિગમે પ્રજાનાં દૂરીભવત્યુત્તરપૂર્વમંહઃ ॥ ૩.૬૫॥ ૯૫॥

ધન્યા મુકુન્દસ્ય પદાનુષઙ્ગાદ્ ધનીયતા યેન સમર્ચિતા ત્વમ્ ।
વાસસ્તદીયો મણિપાદરક્ષે લક્ષ્મ્યાઽલકામપ્યધરીકરોતિ ॥ ૩.૬૬॥ ૯૬॥

પદેન વિષ્ણોઃ કિમુતેતરેષાં
    વિસૃજ્ય સઙ્ગં સમુપાસતે ત્વામ્ ।   var  ય ઉપાસતે
કરોષિ તાન્કિં ત્વમપેતકામાન્
    કાલેન પાદાવનિ સત્યકામાન્ ॥ ૩.૬૭॥ ૯૭॥

અભ્યાસયોગેન નિગૃહ્યમાણૈરન્તર્મુખૈરાત્મવિદો મનોભિઃ ।
માતસ્ત્વયા ગુપ્તપદં પ્રભાવાદન્વેષયન્ત્યાગમિકં નિધાનમ્ ॥ ૩.૬૮॥ ૯૮॥   var  ગુપ્તપદપ્રભાવાદ્
મૂર્ધ્ના દધાનાં મણિપાદુકે ત્વામુત્તંસિતં વા પુરુષં ભવત્યા ।
વદન્તિ કેચિદ્દ્વયમામનામસ્ત્વામેવ સાક્ષાદધિદૈવતં નઃ ॥ ૩.૬૯॥ ૯૯॥

મૂર્ધ્ના સતામધસ્તાદુપરિચ વિષ્ણોઃ પદેન સઙ્ઘટિતામ્ ।
અદવીયસીં વિમુક્તેઃ પદવીમવયન્તિ પાદુકે ભવતીમ્ ॥ ૩.૭૦॥ ૧૦૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પ્રભાવપદ્ધતિસ્તૃતીયા ॥

## ૪. સમર્પણપદ્ધતિઃ (૨૦)

ભજામઃ પાદુકે યાભ્યાં ભરતસ્યાગ્રજસ્તદા ।

પ્રાયઃ પ્રતિપ્રયાણાય પ્રાસ્થાનિકમકલ્પયત્ ॥ ૪.૧॥ ૧૦૧॥

રાજ્યં વિહાય રઘુવંશમહીપતીનાં
    પૌરાંશ્ચ પાદરસિકાન્પૃથિવીં ચ રક્તામ્ ।
ત્વામેવ હન્ત ચરણાવનિ સંપ્રયાસ્યન્
    આલમ્બત પ્રથમમુત્તરકોસલેન્દ્રઃ ॥ ૪.૨॥ ૧૦૨॥

પ્રાપ્તે પ્રયાણસમયે મણિપાદરક્ષે
    પૌરાનવેક્ષ્ય ભવતી કરુણપ્રલાપાન્ ।
મઞ્જુપ્રણાદમુખરા વિનિવર્તનાર્થં
    રામં પદગ્રહણપૂર્વમયાચતેવ ॥ ૪.૩॥ ૧૦૩॥

મત્વા તૃણાય ભરતો મણિપાદરક્ષે  var  તૃણં સ ભરતો
    રામેણ તાં વિરહિતાં રઘુરાજધાનીમ્ ।
ત્વામેવ સપ્રણયમુજ્જયિનીમવન્તીં
    મેને મહોદયમયીં મધુરામયોધ્યામ્ ॥ ૪.૪॥ ૧૦૪॥

રામાત્મનઃ પ્રતિપદં મણિપાદરક્ષે
    વિશ્વમ્ભરસ્ય વહનેન પરીક્ષિતાં ત્વામ્ ।
વિશ્વસ્ય દેવિ વહને વિનિવેશયિષ્યન્
    વિસ્રબ્ધ એવં ભરતો ભવતીં યયાચે ॥ ૪.૫॥ ૧૦૫॥

ભક્ત્યા પરં ભવતુ તદ્ભરતસ્ય સાધો-
    સ્ત્વત્પ્રાર્થનં રઘુપતૌ મણિપાદરક્ષે ।
કેનાશયેન સ મુનિઃ પરમાર્થદર્શી
    ભદ્રાય દેવિ જગતાં ભવતીમવાદીત્ ॥ ૪.૬॥ ૧૦૬॥

રામે વનં વ્રજતિ પઙ્ક્તિરથે પ્રસુપ્તે
    રાજ્યાપવાદચકિતે ભરતે તદાનીમ્ ।
આશ્વાસયેત્ ક ઇવ કોસલવાસિનસ્તાન્
    સીતેવ ચેત્ ત્વમપિ સાહસવૃત્તિરાસીઃ ॥ ૪.૭॥ ૧૦૭॥

પાદાવનિ પ્રભવતો જગતાં ત્રયાણાં
    રામાદપિ ત્વમધિકા નિયતં પ્રભાવાત્ ।
નો ચેત્ કથન્નુ ભરતસ્ય તમેવ લિપ્સોઃ
    પ્રત્યાયનં પરિપણં ભવતી ભવિત્રી ॥ ૪.૮॥ ૧૦૮॥

મન્યે નિયુજ્ય ભવતીં મણિપાદરક્ષે
  પાર્ષ્ણિગ્રહસ્ય ભરતસ્ય નિવર્તનાર્થમ્ ।
રત્નાકરં સપદિ ગોષ્પદયન્ વિજિગ્યે
  રામઃ ક્ષણેન રજનીચરરાજધાનીમ્ ॥ ૪.૯॥ ૧૦૯॥

પાદાવનિ પ્રભુતરાનપરાધવર્ગાન્
  સોઢું ક્ષમા ત્વમસિ મૂર્તિમતી ક્ષમૈવ ।  var  ક્ષમેવ
યત્ ત્વાં વિહાય નિહતાઃ પરિપન્થિનસ્તે
  દેવેન દાશરથિના દશકણ્ઠમુખ્યાઃ ॥ ૪.૧૦॥ ૧૧૦॥

વાક્યે ગરીયસિ પિતુર્વિહિતેઽપ્યતૃપ્યા
  માતુર્મનોરથમશેષમવન્ધ્યયિષ્યન્ ।
મન્યે તદા રઘુપતિર્ભરતસ્ય તેને
  માતસ્ત્વયૈવ મણિમૌલિનિવેશલક્ષ્મીમ્ ॥ ૪.૧૧॥ ૧૧૧॥

પાદામ્બુજાદ્વિગલિતાં પરમસ્ય પુંસ-
  સ્ત્વામાદરેણ વિનિવેશ્ય જટાકલાપે ।
અઙ્ગીચકાર ભરતો મણિપાદરક્ષે
  ગઙ્ગાધિરૂઢશિરસો ગિરિશસ્ય કાન્તિમ્ ॥ ૪.૧૨॥ ૧૧૨॥

અવિકલમધિકર્તું રક્ષણે સપ્તલોક્યા
  રઘુપતિચરણેન ન્યસ્તદિવ્યાનુભાવામ્ ।
અભજત ભરતસ્ત્વામઞ્જસા પાદરક્ષે
  મણિમકુટનિવેશત્યાગધન્યેન મૂર્ધ્ના ॥ ૪.૧૩॥ ૧૧૩॥

ઇયમવિકલયોગક્ષેમસિદ્ધ્યૈ પ્રજાના-
  મલમિતિ ભરતેન પ્રાર્થિતામાદરેણ ।
રઘુપતિરધિરોહન્નભ્યશિઞ્ચત્ સ્વયં ત્વાં
  ચરણનખમણીનાં ચન્દ્રિકાનિર્ઝરેણ ॥ ૪.૧૪॥ ૧૧૪॥

પ્રણયિનિ પદપદ્મે ગાઢમાશ્લિષ્યતિ ત્વાં
  વિધિસુતકથિતં તદ્વૈભવં તે વિદન્તઃ ।
અનુદિનમૃષયસ્ત્વામર્ચયન્ત્યઞ્ચગારે
  રઘુપતિપદરક્ષે રામગિર્યાશ્રમસ્થાઃ ॥ ૪.૧૫॥ ૧૧૫॥

નિયતમધિરુરોહ ત્વામનાધેયશક્તિં
  નિજચરણસરોજે શક્તિમાધાતુકામઃ ।

સ કથમિતરથા ત્વાં ન્યસ્ય રામો વિજહ્રે
  દૃષદુપચિતભૂમૌ દણ્ડકારણ્યભાગે ॥ ૪.૧૬॥ ૧૧૬॥

રઘુપતિપદપદ્માદ્રન્તપીઠે નિવેષ્ટું
  ભરતશિરસિ લગ્નાં પ્રેક્ષ્ય પાદાવનિ ત્વામ્ ।
પરિણતપુરુષાર્થઃ પૌરવર્ગઃ સ્વયં તે
  વિધિમભજત સર્વો વન્દિવૈતાલિકાનામ્ ॥ ૪.૧૭॥ ૧૧૭॥

અનન્યરાજન્યનિદેશનિષ્ઠાં
  ચકાર પૃથ્વીં ચતુરર્ણવાન્તામ્ ।
ભ્રાતુર્યિયાસોર્ભરતસ્તદા ત્વાં
  મૂર્ધ્ના વહન્ મૂર્તિમતીમિવાજ્ઞામ્ ॥ ૪.૧૮॥ ૧૧૮॥

યદ્ભ્રાત્રે ભરતાય રઙ્ગપતિના રામત્વમાતસ્થુષા
  નિત્યોપાસ્યનિજાઙ્ઘ્રિનિષ્ક્રયતયા નિશ્ચિત્ય વિશ્રાણિતમ્ ।
યોગક્ષેમવહં સમસ્તજગતાં યદ્ગીયતે યોગિભિઃ
  પાદત્રાણમિદં મિતમ્પચકથામહ્નાય મે નિહ્નુતામ્ ॥ ૪.૧૯॥ ૧૧૯॥

ભરતસ્યેવ મમાપિ પ્રશમિતવિશ્વાપવાદદુર્જાતા ।
શેષેવ શિરસિ નિત્યં વિહરતુ રઘુવીરપાદુકે ભવતી ॥ ૪.૨૦॥ ૧૨૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
સમર્પણપદ્ધતિશ્ચતુર્થી ॥

## ૫. પ્રતિપ્રસ્થાનપદ્ધતિઃ (૨૦)

પ્રશસ્તે રામપાદાભ્યાં પાદુકે પર્યુપાસ્મહે ।
આનૃશંસ્યં યયોરાસીદાશ્રિતેષ્વનવગ્રહમ્ ॥ ૫.૧॥ ૧૨૧॥

ભૃશાતુરસહોદરપ્રણયખણ્ડનસ્વૈરિણા
  પદેન કિમનેન મે વનમિહાવનાદિચ્છતા ।
ઇતીવ પરિહાય તન્નિવવૃતે સ્વયં યત્પુરા
  પદત્રમિદમાદ્રિયે ધૃતજગત્રયં રઙ્ગિણઃ ॥ ૫.૨॥ ૧૨૨॥

દશવદનવિનાશં વાઞ્છતો યસ્ય ચક્રે
  દશરથમનઘોક્તિં દણ્ડકારણ્યયાત્રા ।

સ ચ ભરતવિમર્દે સત્યસન્ધસ્ત્વયાઽઽસી-
ત્રઘુપતિપદરક્ષે રાજધાનીં પ્રયાન્ત્યા ॥ ૫.૩॥ ૧૨૩॥

અભ્યુપેતવિનિવૃત્તિસાહસા દેવિ રઙ્ગપતિરત્નપાદુકે ।
અત્યશેત ભવતી મહીયસા પારતન્ત્ર્યવિભવેન મૈથિલીમ્ ॥ ૫.૪॥ ૧૨૪॥

અવ્યાહતાં રઘુપતેર્વહતઃ પ્રતિજ્ઞા-
મંસાધિરોહણરસે વિહતે ધરણ્યાઃ ।
પ્રાદાન્નિવૃત્ય ભવતી મણિપાદરક્ષે
સ્પર્શં પદેન વિગતવ્યવધાનખેદમ્ ॥ ૫.૫॥ ૧૨૫॥

મન્ત્રાભિષેકવિરહાદ્ભજતા વિશુદ્ધિં
સંસ્કારવર્જનવશાદભિસંસ્કૃતેન ।
મૂર્ધ્ના નિનાય ભરતો મણિપાદુકે ત્વાં
રામાજ્ઞયા વિનિહિતામિવ રાજ્યલક્ષ્મીમ્ ॥ ૫.૬॥ ૧૨૬॥

રક્ષાર્થમસ્ય જગતો મણિપાદરક્ષે
રામસ્ય પાદકમલં સમયે ત્યજન્ત્યોઃ ।
કિં દુષ્કરં તવ વિભૂતિપરિગ્રહો વા
કિં વા વિદેહદુહિતુઃ કૃપણા દશા સા ॥ ૫.૭॥ ૧૨૭॥

સીતાસખસ્ય સહસા ચરણારવિન્દા-
ત્ભક્ત્યા નતે કૃતપદા ભરતોત્તમાઙ્ગે ।
આરુહ્ય નાગમભિતો ભવતી વિતેને
માયૂરચામરભરં મણિરશ્મિજાલૈઃ ॥ ૫.૮॥ ૧૨૮॥

મૂર્ધ્ના મુકુન્દપદરક્ષિણિ બિભ્રતસ્ત્વા-
માવિર્મદસ્ય રઘુવીરમદાવલસ્ય ।
આમોદિભિઃ સપદિ દાનજલપ્રવાહૈ-
ર્લેભે ચિરાદ્વસુમતી રુચિરં વિલેપમ્ ॥ ૫.૯॥ ૧૨૯॥

આશાઃ પ્રસાધયિતુમમ્બ તદા ભવત્યાં
દૈવાદકાણ્ડશરદીવ સમુત્થિતાયામ્ ।
સ્તોકાવશેષસલિલાઃ સહસા બભૂવુઃ
સાકેતયૌવતવિલોચનવારિવાહાઃ ॥ ૫.૧૦॥ ૧૩૦॥

અન્તેવસન્નચરમસ્ય કવેઃ સ યોગી

વન્યાન્પ્રગૃહ્ય વિવિધાનુપદાવિશેષાન્ ।
આતસ્થુષીં રઘુકુલોચિતમૌપવાહ્યં
પ્રત્યુજ્જગામ ભવતીં ભરતોપનીતામ્ ॥ ૫.૧૧॥ ૧૩૧॥

માતસ્ત્વદાગમનમઙ્ગલદર્શિનીનાં
સાકેતપક્ષ્મલદૃશાં ચટુલાક્ષિભૃઙ્ગૈઃ ।
જાતાનિ તત્ર સહસા મણિપાદરક્ષે
વાતાયનાનિ વદનૈઃ શતપત્રિતાનિ ॥ ૫.૧૨॥ ૧૩૨॥

સાકેતસીમ્નિ ભવતી મણિપાદરક્ષે
માઙ્ગલ્યલાજનિકરૈરવકીર્યમાણા ।
કીર્તિસ્વયંવરપતેર્ભરતસ્ય કાલે var કીર્ત્યાઃ સ્વયંવરપતેઃ
વૈવાહિકી જનનિ વહ્નિશિખેવ રેજે ॥ ૫.૧૩॥ ૧૩૩॥

છત્રેન્દુમણ્ડલવતી મણિપાદુકે ત્વં
વ્યાધૂતચામરકલાપશરપ્રસૂના ।
સદ્યો બભૂવિથ સમગ્રવિકાસહેતુઃ
સાકેતપૌરવનિતાનયનોત્પલાનામ્ ॥ ૫.૧૪॥ ૧૩૪॥

પ્રૈક્ષન્ત વક્ત્રૈર્મણિપાદરક્ષે શત્રુઞ્જયં શૈલમિવાધિરૂઢામ્ ।
રામાભિધાનપ્રતિપન્નહર્ષૈરુત્તાનિતૈરુત્તરકોસલાસ્ત્વામ્ ॥ ૫.૧૫॥ ૧૩૫॥

દ્રષ્ટું તદા રાઘવપાદરક્ષે સીતામિવ ત્વાં વિનિવર્તમાનામ્ ।
આસન્નયોધ્યાપુરસુન્દરીણામૌત્સુક્યલોલાનિ વિલોચનાનિ ॥ ૫.૧૬॥ ૧૩૬॥

આસ્થાય તત્ર સ્ફુટબિન્દુનાદં સ્તમ્બેરમં તાદૃશસન્નિવેશમ્ ।
અદર્શયસ્ત્વં પુરમધ્યભાગે પાદાવનિ ત્વત્પ્રણવાશ્રયત્વમ્ ॥ ૫.૧૭॥ ૧૩૭॥

દશગ્રીવસ્તમ્બેરમદલનદુર્દાન્તહૃદયે
વિહારસ્વાચ્છન્દ્યાદ્વિશતિ રઘુસિંહે વનભુવમ્ ।
સ્વાવાત્સલ્યક્રોડીકૃતભરતશાબૈવ ભવતી var ભરતશાવેવ
નિરાબાધાં પાદાવનિ ન વિજહૌ કોસલગુહામ્ ॥ ૫.૧૮॥ ૧૩૮॥

કૈકેયીવરદાનદુર્દિનનિરાલોકસ્ય લોકસ્ય ચ-
ત્રાણાર્થં ભરતેન ભવ્યમનસા સાકેતમાનીયતે ।
રામત્યાગસહૈરસહ્યવિરહં રઙ્ગક્ષિતીન્દ્રસ્ય ત-
ત્પાદત્રાણમનન્યતન્ત્રફણિતેરાપીડમીડીમહિ ॥ ૫.૧૯॥ ૧૩૯॥

સમુપસ્થિતે પ્રદોષે સહસા વિનિવૃત્ય ચિત્રકૂટવનાત્ ।
અભજત્પુનર્જનપદં વત્સં ધેનુરિવ પાદુકે ભવતી ॥ ૫.૨૦॥ ૧૪૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પ્રતિપ્રસ્થાનપદ્ધતિઃ પઞ્ચમી ॥

## ૬. અધિકારપરિગ્રહપદ્ધતિઃ (૪૦)

અધીષ્ટે પાદુકા સા મે યસ્યાઃ સાકેતવાસિભિઃ ।
અન્વયવ્યતિરેકાભ્યામન્વમીયત વૈભવમ્ ॥ ૬.૧॥ ૧૪૧॥

મોચિતસ્થિરચરાનયત્નતઃ કોસલાન્ જનપદાનુપાસ્મહે ।
યેષુ કાંશ્વન બભૂવ વત્સરાન્ દૈવતં દનુજવૈરિપાદુકા ॥ ૬.૨॥ ૧૪૨॥

સામ્રાજ્યસમ્પદિવ દાસજનોચિતા ત્વં
  રામેણ સત્યવચસા ભરતાય દત્તા ।
સ ત્વાં નિવેશ્ય ચરણાવનિ ભદ્રપીઠે
  પૃથ્વીં બુભોજ બુભુજે ચ શોવિભૂતિમ્ ॥ ૬.૩॥ ૧૪૩॥

ભોગાનનન્યમનસાં મણિપાદુકે ત્વં
  પુષ્ણાસિ હન્ત ભજનામનુષઙ્ગસિદ્ધાન્ ।
તેનૈવ નૂનમભવદ્ભરતસ્ય સાધો-
  રપ્રાર્થિતં તદિહ રાજ્યમવર્જનીયમ્ ॥ ૬.૪॥ ૧૪૪॥

રામપ્રયાણજનિતં વ્યપનીય શોકં
  રત્નાસને સ્થિતવતી મણિપાદરક્ષે ।
પૃથ્વીં નિજેન યશસા વિહિતોત્તરીયા-
  મેકાતપત્રતિલકાં ભવતી વિતેને ॥ ૬.૫॥ ૧૪૫॥

રામાજ્ઞયા પરવતી પરિગૃહ્ય રાજ્યં
  રત્નાસનં રઘુકુલોચિતમાશ્રયન્તી ।
શુદ્ધાં પદાવનિ પુનર્ભવતી વિતેને
  સ્વાતન્ત્ર્યલેશકલુષાં ભરતસ્ય કીર્તિમ્ ॥ ૬.૬॥ ૧૪૬॥

પૌલસ્ત્યવીરવદનસ્તબકાવસાના-
  ત્પુષ્પાણિ દણ્ડકવનેષ્વપચેતુમિચ્છોઃ ।

રક્ષાધુરં ધૃતવતી મણિપાદુકે ત્વં
    રામસ્ય મૈથિલસુતાસહિતે પ્રચારે ॥ ૬.૭॥ ૧૪૭॥

પાદાવનિ પ્રચલચામરવૃન્દમધ્યે
    ભદ્રાસનાસ્તરગતા ભવતી વિરેજે ।
આકીર્ણદિવ્યસલિલે કટકે સુમેરો-
    રમ્ભોજિનીવ કલહાયિતહંસયૂથા ॥ ૬.૮॥ ૧૪૮॥

માન્યે રઘૂદ્વહપદે મણિપાદુકે ત્વાં
    વિન્યસ્ય વિગ્રહવતીમિવ રાજ્યલક્ષ્મીમ્ ।
આલોલમક્ષવલયી ભરતો જટાવા-
    નાલમ્બ્ય ચામરમનન્યમનાઃ સિષેવે ॥ ૬.૯॥ ૧૪૯॥

પ્રાપ્તે દિવં દશરથે ભરતે વિલક્ષે
    પર્યાકુલેષુ પરમુત્તરકોસલેષુ ।
ત્વં ચેદુપેક્ષિતવતી ક ઇવાભવિષ્ય-
    ત્ગોપાયિતા ગુહ્યસખસ્ય વિભોઃ પદં તત્ ॥ ૬.૧૦॥ ૧૫૦॥ var ગોપાયિતું
ભ્રાતુર્યદમ્બ વિરહાદ્ભરતે વિષણ્ણે
    દાક્ષિણ્યમાશ્રિતવતી મણિપાદુકે ત્વમ્ ।
આસીદશેષજગતાં શ્રવણામૃતં ત-
    દ્વાચાલકાહલસહં બિરુદં તદા તે ॥ ૬.૧૧॥ ૧૫૧॥

રાજ્યં તદા દશરથાદનુ રામતઃ પ્રાક્
    બિભ્રાણયા ચરણરક્ષિણિ વીતખેદમ્ ।
તુલ્યાધિકારભજનેન બભૂવ ધન્યો
    વંશસ્ત્વયાઽમ્બ મનુવંશમહીપતીનામ્ ॥ ૬.૧૨॥ ૧૫૨॥

વર્ષાણિ તાનિ વૃષલો ન તપાંસિ તેપે
    બાલો ન કશ્ચિદપિ મૃત્યુવશં જગામ ।
રાજ્યે તવામ્બ રઘુપુઙ્ગવપાદરક્ષે
    નૈવાપરં પ્રતિવિધેયમભૂત્પ્રસક્તમ્ ॥ ૬.૧૩॥ ૧૫૩॥

વિશ્વં ત્વદાશ્રિતપદામ્બુજસમ્ભવાયાં
    યસ્યાં પ્રતિષ્ઠિતમિદં મણિપાદરક્ષે ।
આસીદનન્યશરણા સમયે યથાવ-
    ત્સાઽપિ ત્વયા વસુમતી વિહિતપ્રતિષ્ઠા ॥ ૬.૧૪॥ ૧૫૪॥

પ્રાયેણ રામવિરહાવ્દ્યથિતા તદાની-
    મુત્સઙ્ગમાશ્રિતવતી તવ રાજ્યલક્ષ્મીઃ ।
તામેવ દેવિ નનુ જીવયિતું જલાર્દ્રા-
    મઙ્ગીચકાર ભવતી ભરતોપનીતામ્ ॥ ૬.૧૫॥ ૧૫૫॥

વીરવ્રતપ્રણયિનિ પ્રથમે રઘૂણાં
    પ્રાપ્તે ચિરાય ભરતે વ્રતમાસિધારમ્ ।
ત્યક્ત્વા પદાવનિ તદા વિવિધાન્ વિહારા-
    નેકાસિકાવ્રતમપૂર્વમવર્તયસ્ત્વમ્ ॥ ૬.૧૬॥ ૧૫૬॥

કાકુત્સ્થપાદવિરહપ્રતિપન્નમૌનાં
    નિષ્પન્દતામુપગતાં મણિપાદરક્ષે ।
આશ્વાસયન્નિવ મુહુર્ભરતસ્તદાનીં
    શીતૈરવીજયત ચામરમારુતૈસ્ત્વામ્ ॥ ૬.૧૭॥ ૧૫૭॥

યત્ર ક્વચિદ્વિહરતોऽપિ પદારવિન્દં
    રક્ષ્યં મયા રઘુપતેરિતિ ભાવયન્ત્યા ।
નિશ્શેષમેવ સહસા મણિપાદરક્ષે
    નિષ્કણ્ટકં જગદિદં વિદધે ભવત્યા ॥ ૬.૧૮॥ ૧૫૮॥

રામં ત્વયા વિરહિતં ભરતં ચ તેન
    ત્રાતું પદાવનિ તદા યદભૂત્પ્રતીતમ્ ।
રામાનુજસ્ય તવ ચામ્બ જગત્સમસ્તં var ચાનુ
    જાગર્તિ તેન ખલુ જાગરણવ્રતેન ॥ ૬.૧૯॥ ૧૫૯॥

અન્તઃપુરે પરિજનૈઃ સમયોપયાતૈ
    રભ્યર્ચિતા ભવસિ યા વિનયોપપન્નૈઃ ।
સા કોસલેશ્વરપદાવનિ ભૂપતીનાં
    સઙ્ઘટ્ટનં મકુટપઙ્ક્તિભિરન્વભૂસ્ત્વમ્ ॥ ૬.૨૦॥ ૧૬૦॥

પ્રાપ્યાધિકારમુચિતં ભુવનસ્ય ગુપ્ત્યૈ
    ભદ્રાસનં ભરતવન્દિતમાશ્રયન્ત્યા ।
મધ્યેऽવતીર્ણમિવ માધવપાદરક્ષે
    માતસ્ત્વયાऽપિ મનુવંશમહીપતીનામ્ ॥ ૬.૨૧॥ ૧૬૧॥

રાજાસને રઘુકુલોદ્વહપાદરક્ષે
    નીરાજનં સમભવત્ સમયોચિતં તે ।

શ્લાઘાવશેન બહુશઃ પરિઘૂર્ણિતાભિઃ
    સામન્તમૌલિમણિમઙ્ગલદીપિકાભિઃ ॥ ૬.૨૨॥ ૧૬૨॥

પૃથ્વીપતીનાં યુગપત્ કિરીટાઃ
    પ્રત્યર્થિનાં પ્રાણિતુમર્થિનાં ચ ।
પ્રાપુસ્તદા રાઘવપાદરક્ષે
    ત્વદીયમાસ્થાનિકપાદપીઠમ્ ॥ ૬.૨૩॥ ૧૬૩॥

પ્રણમ્ય રઙ્ગેશ્વરપાદરક્ષે
    દૂરોપનીતૈરુપદાવિશેષૈઃ ।
સભાજયન્તિ સ્મ તદા સભાયા-
    મુચ્ચૈસ્તરામુત્તરકોસલાસ્ત્વામ્ ॥ ૬.૨૪॥ ૧૬૪॥

અપાવૃતદ્વારમયન્ત્રિતાશ્વં
    રઙ્ગેશપાદાવનિ પૂર્વમાસીત્ ।
ત્વયા યદૃચ્છાસુખસુપ્તપાન્થં
    રામે વનસ્થેઽપિ પદં રઘૂણામ્ ॥ ૬.૨૫॥ ૧૬૫॥

અનન્યભક્તિર્મણિપાદુકે ત્વામભ્યર્ચયન્ દાશરથિર્દ્વિતીયઃ ।
વિકલ્પ્યમાનઃપ્રથમેન કીર્ત્યા વન્દ્યઃ સ્વયં વ્યોમસદાં બભૂવ ॥ ૬.૨૬॥ ૧૬૬॥

અરણ્યયોગ્યં પદમસ્પૃશન્તી રામસ્ય રાજાર્હપદે નિવિષ્ટા ।
આસ્થાનનિત્યાસિકયા નિરાસ્થઃસ્વર્ગૌકસાં સ્વૈરગતેર્વિઘાતમ્ ॥ ૬.૨૭॥ ૧૬૭॥

રાજાસને ચેદ્ભવતી નિષણ્ણા રઙ્ગેશપાદાવનિ તન્ન ચિત્રમ્ ।
યત્રાધિરૂઢાઃ ક્રમશઃ પુરા ત્વામુત્તંસયન્તે રઘુસાર્વભૌમાઃ ॥ ૬.૨૮॥ ૧૬૮॥

ભદ્રાસનં ચેત્પરિવૃત્તમાસીત્ દેવિ ક્ષણં દક્ષિણતોમુખં તે ।
કથં ભવેત્ કાઞ્ચનપાદરક્ષે રામસ્ય રક્ષોમૃગયાવિહારઃ ॥ ૬.૨૯॥ ૧૬૯॥

યાવત્ત્વયા રાઘવપાદરક્ષે જિગીષિતા રાક્ષસરાજધાની ।
માલેવ તાવલ્લુલિતા મદાન્ધૈરુદ્યાનશાખામૃગયૂથપૈસ્તે ॥ ૬.૩૦॥ ૧૭૦॥

મહીક્ષિતાં રાઘવપાદરક્ષે ભદ્રાસનસ્થાં ભવતીં સ્પૃશન્તઃ ।
પૂર્વં તથાત્વે નિયતેઽપિ ભૂયઃ કલ્યાણતામાનિશિરે કિરીટાઃ ॥ ૬.૩૧॥ ૧૭૧॥

અનિચ્છતઃ પાણ્ડરમાતપત્રં પિત્રા વિતીર્ણં મણિપાદરક્ષે ।
આસીત્ ત્વદર્થં વિધૃતેન તેન છાયા સમગ્રા ભરતસ્ય મૌલૌ ॥ ૬.૩૨॥ ૧૭૨॥

પાદુકે રઘુપતૌ યદૃચ્છયા પ્રસ્થિતે વનવિહારકૌતુકાત્ ।
આધિરાજ્યમધિગમ્યતે યુવામક્ષતં વસુમતીમરક્ષતમ્ ॥ ૬.૩૩॥ ૧૭૩॥

રઘુવીરપદાનુષઙ્ગમાત્રાત્પરિબર્હેષુ નિવેશિતા યદિ ત્વમ્ ।
અધિકારદિને કથં પુનસ્તે પરિવારાસ્તવ પાદુકે બભૂવુઃ ॥ ૬.૩૪॥ ૧૭૪॥

પુરુષાર્થચતુષ્ટયાર્થિનીનાં પરિષત્ તે મહિતા વસિષ્ઠમુખ્યૈઃ ।
ક્રયવિક્રયપટ્ટણં પ્રજાનામભવત્ કાઞ્ચનપાદુકે તદાનીમ્ ॥ ૬.૩૫॥ ૧૭૫॥

મનુજત્વતિરોહિતેન શક્યે વપુષૈકેન વિરોધિનાં નિરાસે ।
અભજદ્ભરતાદિભેદમીશઃ સ્વયમારાધયિતું પદાવનિ ત્વામ્ ॥ ૬.૩૬॥ ૧૭૬॥

મગધાઙ્ગકલિઙ્ગવઙ્ગમુખ્યાન્
    વિમતાન્ રન્ધ્રગવેષિણઃ સસૈન્યાન્ ।
રઘુપુઙ્ગવપાદુકે વિજિગ્યે
    ભરતઃ શાસનમુદ્વહન્ ભવત્યાઃ ॥ ૬.૩૭॥ ૧૭૭॥

અનિતરવહનીયં મન્ત્રિમુખ્યૈર્યદા ત-
    ત્ત્વયિ વિનિહિતમાસીત્ સૂર્યવંશાધિરાજ્યમ્ ।
રઘુપતિપદરક્ષે રત્નપીઠે તદાનીં
    શ્રિયમિવ દદૃશુસ્ત્વાં સાદરં લોકપાલાઃ ॥ ૬.૩૮॥ ૧૭૮॥

પરિહૃતદણ્ડકાધ્વગમનં પદરક્ષિણિ ત-
    ત્પરિણતવિશ્વસમ્પદુદયં યુવયોર્દ્વિતયમ્ ।
રઘુપતિરત્નપીઠમધિરુહ્ય તદા વિદધે
    વ્યપગતવૈરિભૂપનિલયં વસુધાવલયમ્ ॥ ૬.૩૯॥ ૧૭૯॥

પ્રાપ્તોદયા તદાનીં કિમપિ તમસ્તન્નિરાકરોદ્ભવતી ।
તનુરિવ મનુકુલજનુષાં પ્રસવિત્રી રત્નપાદુકે સવિતુઃ ॥ ૬.૪૦॥ ૧૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
અધિકારપરિગ્રહપદ્ધતિઃ ષષ્ઠી ॥

## ૭. અભિષેકપદ્ધતિઃ (૩૦)

પાહિ નઃ પાદુકે યસ્યા વિધાસ્યન્નભિષેચનમ્ ।

આભિષેચનિકં ભાણ્ડં ચક્રે રામઃ પ્રદક્ષિણમ્ ॥ ૭.૧॥ ૧૮૧॥

રાઘવસ્ય ચરણૌ પદાવનિ પ્રેક્ષિતું ત્વદભિષેકમીષતુઃ ।
આભિષેચનિકભાણ્ડસન્નિધૌ યત્પ્રદક્ષિણગતિઃ શનૈર્યયૌ ॥ ૭.૨॥ ૧૮૨॥

મૂર્ધાભિષિક્તૈર્નિયમેન વાહ્યૌ
    વિચિન્ત્ય નૂનં રઘુનાથપાદૌ ।
રત્નાસનસ્થાં મણિપાદુકે ત્વાં
    રામાનુજન્મા ભરતોઽભ્યષિઞ્ચત્ ॥ ૭.૩॥ ૧૮૩॥

ભ્રાતુર્નિયોગેઽપ્યનિવર્તમાનં રાજ્યાભિષેકં ચ પરિત્યજન્તમ્ ।
રામાનુજૌ તૌ નનુ પારતન્ત્ર્યાદુભાવુભાભ્યાં ભવતી જિગાય ॥ ૭.૪॥ ૧૮૪॥

નિવેશ્ય રઙ્ગેશ્વરપાદરક્ષે ભદ્રાસને સાદરમભ્યશિઞ્ચત્ ।
વશી વસિષ્ઠો મનુવંશજાનાં મહીક્ષિતાં વંશપુરોહિતસ્ત્વામ્ ॥ ૭.૫॥ ૧૮૫॥

કૃતાભિષેકા ભવતી યથાવત્ રઙ્ગેશપાદાવનિ રત્નપીઠે ।
ગઙ્ગાનિપાતસ્નપિતાં સુમેરોરધિત્યકાભૂમિમધશ્ચકાર ॥ ૭.૬॥ ૧૮૬॥

વસિષ્ઠમુખ્યૈર્વિહિતભિષેકાં રાજ્યાસને રામનિવેશયોગ્યે ।
તુષ્ટાવ રઙ્ગેશ્વરપાદરક્ષે પ્રાચેતસસ્ત્વાં પ્રથમઃ કવીનામ્ ॥ ૭.૭॥ ૧૮૭॥

રક્ષોવધાર્થં મણિપાદરક્ષે રામાત્મનો રઙ્ગપતેઃ પ્રવાસે ।
રક્ષોઽપકારાદ્ભવતી વિતેને રાજન્વતીં કોસલરાજધાનીમ્ ॥ ૭.૮॥ ૧૮૮॥

પ્રાપ્તાભિષેકા મણિપાદરક્ષે પ્રતાપમુગ્રં પ્રતિપદ્યમાના ।
શશાસ પૃથ્વીં ભવતી યથાવત્સાકેતસિંહાસનસાર્વભૌમી ॥ ૭.૯॥ ૧૮૯॥

દશાનનાદીન્મણિપાદરક્ષે જિગીષતો દાશરથેર્વિયોગાત્ ।
જાતોપતાપા ત્વયિ સંપ્રયુક્તૈસ્તીર્થોદકૈરુચ્છ્વસિતા ધરિત્રી ॥ ૭.૧૦॥ ૧૯૦॥

અધ્યાસિતં મનુમુખૈઃક્રમશોનરેન્દ્રૈ-
    રારોપ્ય દેવિ ભવતીં તપનીયપીઠમ્ ।
રાજ્યાભિષેકમનઘં મણિપાદરક્ષે
    રામોચિતં તવ વશં ભરતો વિતેને ॥ ૭.૧૧॥ ૧૯૧॥

સ્નેહેન દેવિ ભવતીં વિષયેઽભિષિઞ્ચન્
    દ્વિસ્સપ્તસઙ્ખ્યભુવનોદરદીપરેખામ્ ।
જાતં રઘૂદ્વહદિવાકરવિપ્રયોગા-

દન્ધં તમિસ્રમહરદ્ભરતઃ પ્રજાનામ્ ॥ ૭.૧૨॥ ૧૯૨॥

હસ્તાપચેયપુરુષાર્થફલપ્રસૂતે
મૂર્લં પદાવનિ મુકુન્દમહીરુહસ્ત્વમ્ ।
છાયાવિશેષમદિશદ્યદસૌ પ્રજાના-
માવર્જિતૈસ્ત્વયિ શુભૈરભિષેકતોયૈઃ ॥ ૭.૧૩॥ ૧૯૩॥

અહ્નાય રામવિરહાત્પરિખિન્નવૃત્તે-
રાશ્વાસનાય ભવતી મણિપાદરક્ષે ।
તીર્થાભિષેકમપદિશ્ય વસુન્ધરાયા-
શ્ચક્રે તદા સમુચિતં શિશિરોપચારમ્ ॥ ૭.૧૪॥ ૧૯૪॥

માલિન્યમાશ્રિતવતી મણિપાદરક્ષે
પઙ્કેન કેકયસુતાકલહોત્થિતેન ।
શુદ્ધિં પરામભિજગામ વસુન્ધરેયં
ત્વત્તઃ ક્ષણાન્નિપતિતૈરભિષેકતોયૈઃ ॥ ૭.૧૫॥ ૧૯૫॥

આવર્જિતં મુનિગણેન જગદ્વિભૂત્યૈ
તોયં પદાવનિ તદા ત્વયિ મન્ત્રપૂતમ્ ।
મૂલાવસેકસલિલં નિગમદ્રુમાણાં
શાપોદકં ચ સમભૂત્ક્ષણદાચારાણામ્ ॥ ૭.૧૬॥ ૧૯૬॥

વિપ્રોષિતે રઘુપતૌ ભવતી યથાર્હં
માન્યે પદે સ્થિતિમતી મનુવંશજાનામ્ ।
આત્મન્યથર્વનિપુણૈઃ પ્રહિતૈઃ પ્રજાના-
મશ્રૂણ્યપાસ્યદભિષેકજલપ્રવાહૈઃ ॥ ૭.૧૭॥ ૧૯૭॥

પ્રાયો વિશોષિતરસા પતિવિપ્રયોગા-
ત્પર્યાકુલીકૃતસમુદ્રપયોધરા ગૌઃ ।
અમ્બ ત્વદિયમભિષેકજલં પિબન્તી
ધેનુર્બભૂવ જગતાં ધનધાન્યદોગ્ધ્રી ॥ ૭.૧૮॥ ૧૯૮॥

વૃત્તે યથાવદભિષેકવિધૌ બભાસે
પશ્ચાત્તવામ્બ ભરતેન ધૃતઃ કિરીટઃ ।
આકસ્મિકસ્વકુલવિપ્લવશાન્તિહર્ષા-
ત્પ્રાપ્તસ્ત્વિષામિવ પતિર્મણિપાદુકે ત્વામ્ ॥ ૭.૧૯॥ ૧૯૯॥

મનુવંશપુરોહિતેન મન્ત્રૈ-
    રભિમન્ત્ર્ય ત્વયિ પાદુકે પ્રયુક્તમ્ ।
અભિષેકજલં ક્ષણેન રાજ્ઞાં
    શમયામાસ સમુત્થિતાન્પ્રતાપાન્ ॥ ૭.૨૦॥ ૨૦૦॥

પાદપાદુપહૃતા રઘૂદ્વહા-
    દાલવાલમિવ પીઠમાશ્રિતા ।
અભ્યષેચિ ભવતી તપોધનૈઃ
    પારિજાતલતિકેવ પાદુકે ॥ ૭.૨૧॥ ૨૦૧॥

અલઘુભિરભિષેકવ્યાપૃતૈરમ્બુભિસ્તે
    દિનકરકુલદૈન્યં પાદુકે ક્ષાલયિષ્યન્ ।
સ ખલુ કમલયોનેઃ સૂનુરાધત્ત મન્ત્રે-
    ષ્વધિકનિયમયોગાં શક્તિમાથર્વણેષુ ॥ ૭.૨૨॥ ૨૦૨॥

દિનકરકુલજાનાં દેવિ પૃથ્વીપતીનાં
    નિરુપધિમધિકારં પ્રાપ્નુવત્યાં ભવત્યામ્ ।
અજનિષત સમસ્તાઃ પાદુકે તાવકીન-
    સ્નપનસલિલયોગાન્નિમ્નગાસ્તુઙ્ગભદ્રાઃ ॥ ૭.૨૩॥ ૨૦૩॥

તવ વિધિવદુપાત્તે સાર્વભૌમાભિષેકે
    ભરતસમયવિદ્ભિઃ પાદુકે મન્ત્રિમુખ્યૈઃ ।
ત્વદવધિ નિજકર્મસ્થાયિનીનાં પ્રજાનાં
    પ્રથમયુગવિશેષાઃ પ્રાદુરાસન્ વિચિત્રાઃ ॥ ૭.૨૪॥ ૨૦૪॥

અવસિતરિપુશબ્દા નન્વભૂસ્ત્વં તદાનીં
    રઘુપતિપદરક્ષે લબ્ધરાજ્યાભિષેકા ।
ચલિતભુજલતાનાં ચામરગ્રાહિણીનાં
    મણિવલયનિનાદૈર્મેદુરાન્ મન્ત્રઘોષાન્ ॥ ૭.૨૫॥ ૨૦૫॥

સમુચિતમભિષેકં પાદુકે પ્રપ્નુવત્યાં
    ત્વયિ વિનિપતિતાનાં દેવિ તીર્થોદકાનામ્ ।
ધ્વનિરનુગતમન્ત્રઃ સીદતાં કોસલાનાં
    શમયિતુમલમાસીત્ સઙ્કુલાનાર્તનાદાન્ ॥ ૭.૨૬॥ ૨૦૬॥

દિવિષદનુવિધેયં દેવિ રાજ્યાભિષેકં
    ભરત ઇવ યદિ ત્વં પાદુકે નાન્વમંસ્થાઃ ।

કથમિવ રઘુવીરઃ કલ્પયેદલ્પયત્ન-
  સ્ત્રિચતુરશરપાતૈસ્તાદૃશં દેવકાર્યમ્ ॥ ૭.૨૭॥ ૨૦૭॥

કતિચન પદપદ્મસ્પર્શસૌખ્યં ત્યજન્તી
  વ્રતમતુલમધાસ્ત્વં વત્સરાન્ સાવધાના ।
રઘુપતિપદરક્ષે રાક્ષસૈસ્ત્રાસિતાનાં
  રણરણકવિમુક્તં યેન રાજ્યં સુરાણામ્ ॥ ૭.૨૮॥ ૨૦૮॥

અથર્વોપજ્ઞં તે વિધિવદભિષેકં વિદધતાં
  વસિષ્ઠાદીનામપ્યુપચિતચમત્કારભરયા ।
ત્વદાસ્થાન્યા રઙ્ગક્ષિતિરમણપાદાવનિ તદા
  લઘીયસ્યો જાતા રઘુપરિષદાહોપુરુષિકાઃ ॥ ૭.૨૯॥ ૨૦૯॥

અભિષેચયતુ સ રામઃ
  પદેન વા સ્પૃશતુ પાદુકે ભવતીમ્ ।
અવિશેષિતમહિમા ત્વં
  ક્વ વા વિશેષઃ ક્ષમાસમેતાનામ્ ॥ ૭.૩૦॥ ૨૧૦॥

ઇતિ કવિતાર્કિકસિહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કુતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
અભિષેકપદ્ધતિઃ સપ્તમી ॥

## ૮. નિર્યાતનાપદ્ધતિઃ (૩૦)

અભિષેકોત્સવાત્ તસ્માદ્યસ્યા નિર્યાતનોત્સવઃ ।
અત્યરિચ્યત તાં વન્દે ભવ્યાં ભરતદેવતામ્ ॥ ૮.૧॥ ૨૧૧॥

ઉપાસ્ય વર્ષાણિ ચતુર્દશ ત્વામુત્તારિકામુત્તરકોસલસ્થાઃ ।
સનન્દનાદ્યૈરપિ દુર્વિગાહં સાન્તાનિકં લોકમવાપુરગ્ર્યમ્ ॥ ૮.૨॥ ૨૧૨॥

પાદાવનિ પ્રત્યયિતો હનૂમાન્ સીતામિવ ત્વાં ચિરવિપ્રયુક્તામ્ ।
પ્રણમ્ય પૌલસ્ત્યરિપોરુદન્તં વિજ્ઞાપયામાસ વિનીતવેષઃ ॥ ૮.૩॥ ૨૧૩॥

તવાભિષેકાન્મણિપાદરક્ષે મૂલે નિષેકાદિવ વૃદ્ધિયોગ્યાત્ ।
જહુસ્તદૈવ ત્રિદશાઙ્ગનાનાં પ્રમ્લાનતાં પત્રલતાઙ્કુરાણિ ॥ ૮.૪॥ ૨૧૪॥

સર્વતસ્ત્વદભિષેકવાસરે સમ્યગુદ્ધૃતસમસ્તકણ્ટકે ।

રાઘવસ્ય વિપિનેષુ પાદુકે યત્રકામગમતા વ્યવસ્થિતા ॥ ૮.૫॥ ૨૧૫॥

કિં ચતુર્દશભિરેવ વત્સરૈર્નિત્યમેવ મણિપાદુકે યુવામ્ ।
પાદયોસ્ત્રિભુવનાધિરાજયોર્યૌવરાજ્યમધિગચ્છતં સ્વયમ્ ॥ ૮.૬॥ ૨૧૬॥

રામસ્ય રાક્ષસવધત્વરિતસ્ય કાલે
 પાદાવનિ પ્રકટયન્નિવ પાર્ષ્ણિગુપ્તિમ્ ।
આચિત્રકૂટમધિગમ્ય શશંસ વાર્તા-
 મવ્યાહતત્વદભિષેકમૃદઙ્ગનાદઃ ॥ ૮.૭॥ ૨૧૭॥

ભદ્રાણિ દેવિ જગતાં પ્રતિપાદયિષ્યન્
 પ્રાગેવ યેન ભવતીં ભરતોઽભ્યષિઞ્ચત્ ।
મન્યે કપીશ્વરવિભીષણયોર્યથાવત્-
 સન્તન્યતે સ્મ તત એવ કિલાભિષેકઃ ॥ ૮.૮॥ ૨૧૮॥

સમ્ભિદ્યમાનતમસાસરયૂપનીતૈઃ
 સંવર્ધિતસ્તવ શુભૈરભિષેકતોયૈઃ ।
મન્યે બભૂવ જલધિર્મણિપાદરક્ષે
 રામાસ્ત્રપાવકશિકાભિરશોષણીયઃ ॥ ૮.૯॥ ૨૧૯॥

પાદાવનિ ત્વદભિષેચનમઙ્ગલાર્થં
 ભેરીશતં ભૃશમતાડ્યત યત્પ્રતીતૈઃ ।
આકર્ણ્ય તસ્ય સહસા તુમુલં નિનાદં
 લઙ્કાકપાટનયનાનિ નિમીલિતાનિ ॥ ૮.૧૦॥ ૨૨૦॥

તાપોદ્ગમસ્ત્વદભિષેકજલપ્રવાહૈ-
 રુત્સારિતસ્ત્વરિતમુત્તરકોસલેભ્યઃ ।
લેભે ચિરાય રઘુપુઙ્ગવપાદરક્ષે
 લઙ્કાવરોધસુદૃશાં હૃદયેષુ વાસમ્ ॥ ૮.૧૧॥ ૨૨૧॥

આવર્જિતં વિધિવિદા મણિપાદરક્ષે
 પદ્માસનપ્રિયસુતેન પુરોહિતેન ।
આસીન્નિદાનમભિષેકજલં ત્વદીયં
 નક્તઞ્ચરપ્રણયિનીનયનોદકાનામ્ ॥ ૮.૧૨॥ ૨૨૨॥

દેવિ ત્વયા સ્નપનસમ્પદિ સંશ્રિતાયાં
 દગ્ધે પુરે દશમુખસ્ય વલીમુખેન ।

આસીત્ તતઃ પ્રભૃતિ વિશ્વજનપ્રતીત-
    મદ્ભ્યોઽગ્નિરિત્યવિતથં વચનં મુનીનામ્ ॥ ૮.૧૩॥ ૨૨૩॥

આયોધ્યકૈસ્ત્વદભિષેકસમિદ્ધહર્ષૈ-
    રાધ્માપિતાઃ શ્રુતિસુખં નનુ તે તદાનીમ્ ।
રામસ્ય રાક્ષસશિરોલવનેઽપ્યશામ્યન્
    યેષાં ધ્વનિર્વિજયશઙ્ખરવો બભૂવ ॥ ૮.૧૪॥ ૨૨૪॥

પ્રથયિતુમભિષેકં પાદુકે તાવકીનં
    દુરિતશમનદક્ષે દુન્દુભૌ તાડ્યમાને ।
સપદિ પરિગૃહીતં સાધ્વસં દેવિ નૂનં
    દશવદનધૂનાં દક્ષિણૈર્નેત્રકોશૈઃ ॥ ૮.૧૫॥ ૨૨૫॥

રઘુપતિપદરક્ષે રત્નપીઠે યદા ત્વા-
    મખિલભુવનમાન્યામભ્યષિઞ્ચદ્વસિષ્ઠઃ ।
દશમુખમહિષીભિર્દેવિ બાષ્પાયિતાભિઃ
    સ્તનયુગમભિષેક્તું તત્ક્ષણાદન્વમંસ્થાઃ ॥ ૮.૧૬॥ ૨૨૬॥

રામાસ્ત્રાણિ નિમિત્તમાત્રમિહ તે લબ્ધાભિષેકા સ્વયમ્
    રક્ષસ્તત્ ક્ષપયાઞ્ચકાર ભવતી ભદ્રાસનસ્થાયિની ।
યદ્ગોષ્ણામતિવેલદર્પદવથુજ્વાલોષ્મલાનાં તદા
    નિષ્પિષ્ટૈઃ કલધૌતશૈલશિખરૈઃ કર્પૂરચૂર્ણાયિતમ્ ॥ ૮.૧૭॥ ૨૨૭॥

શ્રુત્વૈવં હનુમન્મુખાદ્રઘુપતેઃ પ્રત્યાગતિં તત્ક્ષણા-
    દાસીદદ્ભરતાનુવર્તનવશાદારૂઢકુમ્ભસ્થલામ્ ।
કાલોન્નિદ્રકદુષ્ણદાનમદિરામાદ્યદ્દ્વિરેફધ્વનિ-
    શ્લાઘાચાટુભિરસ્તુતેવ ભવતીં શત્રુઞ્જયઃ કુઞ્જરઃ ॥ ૮.૧૮॥ ૨૨૮॥

પ્રત્યાગતસ્ય ભવતીમવલોક્ય ભર્તુઃ
    પાદારવિન્દસવિધે ભરતોપનીતામ્ ।
પૂર્વાભિષેકવિભવાભ્યુચિતાં સપર્યાં
    મધ્યે સતામકૃત મૈથિલરાજકન્યા ॥ ૮.૧૯॥ ૨૨૯॥

સમ્પ્રેક્ષ્ય મૈથિલસુતા મણિપાદરક્ષે
    પ્રત્યુદ્ગતસ્ય ભવતીં ભરતસ્ય મૌલૌ ।
નિર્દિશ્ય સા નિભૃતમઞ્જલિના પુરસ્તાત્-
    તારાદિકાઃ પ્રિયસખીરશિષત્ પ્રણન્તુમ્ ॥ ૮.૨૦॥ ૨૩૦॥

તુલ્યેઽપિ દેવિ રઘુવીરપદાશ્રયત્વે
    પૂર્વાભિશેકમધિગમ્ય ગરીયસી ત્વમ્ ।
તેનૈવ ખલ્વભજતાં મણિપાદરક્ષે
    રક્ષઃપ્લવઙ્ગમપતી ભવતીં સ્વમૂર્ધ્ના ॥ ૮.૨૧॥ ૨૩૧॥

નિર્વૃત્તરાક્ષસચમૂમૃગયાવિહારો
    રઙ્ગેશ્વરઃ સ ખલુ રાઘવવંશગોપ્તા ।
વંશક્રમાદુપનતં પદમાદદાનો
    માન્યં પુનસ્ત્વયિ પદં નિદધે સ્વકીયમ્ ॥ ૮.૨૨॥ ૨૩૨॥

તત્તાદૃશોશ્ચરણયોઃ પ્રણિપત્ય ભર્તુઃ
    પૌરાસ્ત્વયા વિધૃતયોઃ પ્રતિપન્નસત્ત્વાઃ ।
પ્રાપ્તાભિષેકવિભવામપિ પાદુકે ત્વા-
    માનન્દબાષ્પસલિલૈઃ પુનરભ્યષિઞ્ચન્ ॥ ૮.૨૩॥ ૨૩૩॥

માતસ્ત્વયૈવ સમયે વિષમેઽપિ સમ્યક્
    રાજન્વતીં વસુમતીમવલોક્ય રામઃ ।
સઞ્જીવનાય ભરતસ્ય સમગ્રભક્તેઃ
    સત્યપ્રતિશ્રવતયૈવ ચકાર રાજ્યમ્ ॥ ૮.૨૪॥ ૨૩૪॥

પાદાવનિ પ્રતિગતસ્ય પુરીમયોધ્યાં
    પૌલસ્ત્યહન્તુરભિષેકજલાર્દ્રમૂર્તેઃ ।
અંસે યથાર્હમધિવાસ્ય નિજૈર્યશોભિઃ
    કસ્તૂરિકેવ નિહિતા વસુધા ત્વયૈવ ॥ ૮.૨૫॥ ૨૩૫॥

યાઽસૌ ચતુર્દશ સમાઃ પતિવિપ્રયુક્તા
    વિશ્વમ્ભરા ભગવતી વિધૃતા ભવત્યા ।
વિન્યસ્ય તાં રઘુપતેર્ભુજશૈલશૃઙ્ગે
    ભૂયોઽપિ તેન સહિતાં ભવતી બભાર ॥ ૮.૨૬॥ ૨૩૬॥

નિસ્તીર્ણદુઃખજલધેરનઘસ્ય દેવિ
    ત્વત્સમ્પ્રયુક્તરઘુનાથપદાન્વયેન ।
સદ્યઃ સનન્દનમુખૈરપિ દુર્નિરીક્ષા
    સામ્રાજ્યસમ્પદપરા ભરતસ્ય જજ્ઞે ॥ ૮.૨૭॥ ૨૩૭॥

નિર્ગત્ય દેવિ ભરતાઞ્જલિપદ્મમધ્યાદ્

ભૂયઃ સમાગતવતી પુરુષોત્તમેન ।
પદ્મેવ ભદ્રમખિલં મણિપાદરક્ષે
પ્રાદુશ્ચકાર ભવતી જગતાં ત્રયાણામ્ ॥ ૮.૨૮॥ ૨૩૮॥

રઘુપતિમધિરોપ્ય સ્વોચિતે રત્નપીઠે
પ્રગુણમભજથાસ્ત્વં પાદુકે પાદપીઠમ્ ।
તદપિ બહુમતિસ્તે તાદૃશી નિત્યમાસીત્
ક્ક નુ ખલુ મહિતાનાં કલ્પ્યતે તારતમ્યમ્ ॥ ૮.૨૯॥ ૨૩૯॥

અનુવૃત્તરામભાવઃ શઙ્કે નિર્વિષ્ટચક્રવર્તિપદામ્ ।
અધુનાઽપિ રઙ્ગનાથઃ સચમત્કારં પદેન ભજતિ ત્વામ્ ॥ ૮.૩૦॥ ૨૪૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
અષ્ટમી નિર્યાતનાપદ્ધતિઃ ॥

## ૯. વન્દિવૈતાલિકપદ્ધતિઃ (૧૦)

નમસ્તે પાદુકે પુંસાં સંસારાર્ણવસેતવે ।
યદારોહસ્ય વેદાન્તા વન્દિવૈતાલિકાઃ સ્વયમ્ ॥ ૯.૧॥ ૨૪૧॥

ઉચિતમુપચરિષ્યન્ રઙ્ગનાથ પ્રભાતે
વિધિશિવસનકાદ્યાન્ બાહ્યકક્ષ્યાનિરુદ્ધાન્ ।
ચરણકમલસેવાસૌખ્યસામ્રાજ્યભાજાં
પ્રથમવિહિતભાગાં પાદુકામાદ્રિયેથાઃ ॥ ૯.૨॥ ૨૪૨॥

પદ્માજુષ્ટં ભજતુ ચરણં પાદુકા લબ્ધવારા
પ્રત્યાસન્નાસ્તવ પરિજનાઃ પ્રાતરાસ્થાનયોગ્યાઃ ।
અર્ધોન્મેષાદધિકસુભગામર્ધનિદ્રાનુષઙ્ગાં
નાભીપદ્મે તવ નયનયોર્નાથ પશ્યન્તુ શોભામ્ ॥ ૯.૩॥ ૨૪૩॥

ઉપનમતિ મુહૂર્તં શેષસિદ્ધાન્તસિદ્ધં
તદિહ ચરણરક્ષા રઙ્ગનાથ ત્વયૈષા ।
મૃદુપદમધિરૂઢા મઞ્જુભિઃ શિઞ્જિતૈઃ સ્વૈ-
રુપદિશતુ જનાનામુત્સવારમ્ભવાર્તામ્ ॥ ૯.૪॥ ૨૪૪॥

રઙ્ગાધીશ મરુદ્ગણસ્ય મકુટાદામ્નાયવૃન્દસ્ય વા

પ્રત્યાનીય સમર્પિતા વિધિમુખૈર્વારક્રમાદાગતૈઃ ।
વાહારોહણસમ્ભૃતં શ્રમભરં સમ્યગ્વિનેતું ક્ષમા
લીલાસઞ્ચરણપ્રિયા સ્પૃશતુ તે પાદામ્બુજં પાદુકા ॥ ૯.૫॥ ૨૪૫॥

વૃત્તં ક્રમેણ બહુધા નિયુતં વિધીના-
મર્ધં દ્વિતીયમિદમઙ્કુરિતં તવાહ્નઃ ।
નીલાસખીભિરુપનીય નિવેશ્યમાના
મઙ્ક્તું પ્રભો ત્વરયતે મણિપાદુકા ત્વામ્ ॥ ૯.૬॥ ૨૪૬॥

દિવ્યાપ્સરોભિરુપદર્શિતદીપવર્ગે
રઙ્ગાધિરાજ સુભગે રજનીમુખેઽસ્મિન્ ।
સંરક્ષિણી ચરણયોઃ સવિલાસવૃત્તિ-
નીરાજનાસનમસૌ નયતુ સ્વયં ત્વામ્ ॥ ૯.૭॥ ૨૪૭॥

આસનાદુચિતમાસનાન્તરં રઙ્ગનાથ યદિ ગન્તુમીહસે ।
સન્નતેન વિધિના સમર્પિતાં સપ્રસાદમધિરોહ પાદુકામ્ ॥ ૯.૮॥ ૨૪૮॥

પરિજનવનિતાભિઃ પ્રેષિતઃ પ્રાઞ્જલિસ્ત્વાં
પ્રણમતિ મદનોઽયં દેવ શુદ્ધાન્તદાસઃ ।
ફણિપતિશયનીયં પ્રાપયિત્રી સલીલં
પદકમલમિયં તે પાદુકા પર્યુપાસ્તામ્ ॥ ૯.૯॥ ૨૪૯॥

ઇતિ નિગમવન્દિવચસા સમયે સમયે ગૃહીતસઙ્કેતઃ ।
અભિસરતિ રઙ્ગનાથઃ પ્રતિપદભોગાય પાદુકે ભવતીમ્ ॥ ૯.૧૦॥ ૨૫૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
વૈતાલિકપદ્ધતિર્નવમી ॥

## ૧૦. શ‍ૃઙ્ગારપદ્ધતિઃ (૧૦)

શૌરેઃ શ‍ૃઙ્ગારચેષ્ટાનાં પ્રસૂતિં પાદુકાં ભજે ।
યામેષ ભુઙ્ક્તે શુદ્ધાન્તાત્પૂર્વં પશ્ચાદપિ પ્રભુઃ ॥ ૧૦.૧॥ ૨૫૧॥

પ્રણતત્રિદશેન્દ્રમૌલિમાલામકરન્દાર્દ્રપરાગપઙ્કિલેન ।
અનુલિમ્પતિ પાદુકે સ્વયં ત્વામનુરૂપેણ પદેન રઙ્ગનાથ ॥ ૧૦.૨॥ ૨૫૨॥

અવદાતહિમાંશુકાનુષક્તં
    પદરક્ષે ત્વયિ રઙ્ગિણઃ કદાચિત્ ।
કિમપિ સ્થિતમદ્વિતીયમાલ્યં
    વિરલાવસ્થિતમૌક્તિકં સ્મરામિ ॥ ૧૦.૩॥ ૨૫૩॥

અસહાયગૃહીતરઙ્ગનાથામવરોધાઙ્ગણસીમ્નિ પાદુકે ત્વામ્ ।
સુદૃશઃ સ્વયમર્ચયન્તિ દૂરાદવતંસોત્પલવાસિતૈરપાઙ્ગૈઃ ॥ ૧૦.૪॥ ૨૫૪॥

નિર્વિશ્યમાનમપિ નૂતનસન્નિવેશં
    કૈવલ્યકલ્પિતવિભૂશણકાયકાન્તિમ્ ।
કાલેષુ નિર્વિશસિ રઙ્ગયુવાનમેકા
    શ઼ૃઙ્ગારનિત્યરસિકં મણિપાદરક્ષે ॥ ૧૦.૫॥ ૨૫૫॥

નિદ્રાયિતસ્ય કમિતુર્મણિપાદુકે ત્વં
    પર્યઙ્કિકાપરિસરં પ્રતિપદ્યમાના ।
શ્વાસાનિલપ્રચલિતેન ભજસ્યભીક્ષ્ણં
    નાભીસરોજરજસા નવમઙ્ગરાગમ્ ॥ ૧૦.૬॥ ૨૫૬॥

શયિતવતિ રજન્યાં પાદુકે રઙ્ગબન્ધૌ
    ચરણકમલપાર્શ્વે સાદરં વર્તસે ત્વમ્ ।
ફણિપતિશયનીયાદુત્થિતસ્ય પ્રભાતે
    પ્રથમનયનપાતં પાવનં પ્રાપ્નુકામા ॥ ૧૦.૭॥ ૨૫૭॥

ચરણકમલસઙ્ગાદ્રઙ્ગનાથસ્ય નિત્યં
    નિગમપરિમલં ત્વં પાદુકે નિર્વમન્તી ।
નિયતમતિશયાના વર્તસે સાવરોધં
    હૃદયમધિવસન્તીં માલિકાં વૈજયન્તીમ્ ॥ ૧૦.૮॥ ૨૫૮॥

ઉપનિષદબલાભિર્નિત્યમુત્તંસનીયં
    કિમપિ જલધિકન્યાહસ્તસંવાહનાર્હમ્ ।
તવ તુ ચરણરક્ષે દેવિ લીલારવિન્દં
    ચરણસરસિજં તચ્ચારુ ચાણૂરહન્તુઃ ॥ ૧૦.૯॥ ૨૫૯॥

અખિલાન્તઃપુરવારેષ્વનેકવારં પદાવનિ સ્વૈરમ્ ।
અનુભવતિ રઙ્ગનાથો વિહારવિક્રાન્તિસહચરીં ભવતીમ્ ॥ ૧૦.૧૦॥ ૨૬૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય

શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
શૃઙ્ગારપદ્ધતિર્દશમી ॥

## ૧૧. સઞ્ચારપદ્ધતિઃ (૬૦)

“અગ્રતસ્તે ગમિશ્યામિ મૃદ્નન્તી કુશકણ્ટકાન્” ।
ઇતિ સીતાઽપિ યદ્વૃત્તિમિયેષ પ્રણમામિ તામ્ ॥ ૧૧.૧॥ ૨૬૧॥

શરદઃ શતમમ્બ પાદુકે સ્યાં
  સમયાહૂતપિતામહસ્તુતાનિ ।
મણિમણ્ટપિકાસુ રઙ્ગભર્તુ
  સ્ત્વદધીનાનિ ગતાગતાનિ પશ્યન્ ॥ ૧૧.૨॥ ૨૬૨॥

ત્વદધીનપરિક્રમો મુકુન્દસ્તદધીનસ્તવ પાદુકે વિહારઃ ।
ઇતરેતરપારતન્ત્ર્યમિત્થં યુવયોઃ સિદ્ધમનન્યતન્ત્રભૂમ્નોઃ ॥ ૧૧.૩॥ ૨૬૩॥

રજસા તમસા ચ દુષ્ટસત્વે
  ગહને ચેતસિ મામકે મુકુન્દઃ ।
ઉચિતં મૃગયાવિહારમિચ્છન્
  ભવતીમાદૃત પાદુકે પદાભ્યામ્ ॥ ૧૧.૪॥ ૨૬૪॥

ક્ષમયા જગતામપિ ત્રયાણા
  મવને દેવિ પદાવનિ ત્વયૈવ ।
અભિગમ્યતમોઽપિ સંશ્રિતાના-
  મભિગન્તા ભવતિ સ્વયં મુકુન્દઃ ॥ ૧૧.૫॥ ૨૬૫॥

શિરસા ભવતીં દધાતિ કશ્ચિ-
  દ્વિધૃતઃ કોઽપિ પદસ્પૃશા ભવત્યા ।
ઉભયોર્મધુવૈરિપાદરક્ષે ત્વદધીનાં
  ગતિમામનન્તિ સન્તઃ ॥ ૧૧.૬॥ ૨૬૬॥

સ્પૃશતઃ શિરસા પદેન ચ ત્વાં
  ગતિમુદ્દિશ્ય મુકુન્દપાદુકે દ્વૌ ।
અવરોહતિ પશ્ચિમઃ પદાત્ સ્વા-
  દધિરોહત્યનઘસ્તદેવ પૂર્વઃ ॥ ૧૧.૭॥ ૨૬૭॥

સમયેષ્વપદિશ્ય જૈત્રયાત્રાં વિવિધાન્તઃપુરવાગુરાવ્યતીતઃ ।

નિયતં મણિપાદુકે ભવત્યા રમતે વર્ત્મનિ રઙ્ગસાર્વભૌમઃ ॥ ૧૧.૮॥ ૨૬૮॥

નિજસંહનનપ્રસક્તલાસ્યં ચરતિ ત્વામધિરુહ્ય રઙ્ગનાથઃ ।
પદરક્ષિણિ પાવનત્વમાસ્તાં રસિકાસ્વાદમતઃ પરં ન વિદ્મઃ ॥ ૧૧.૯॥ ૨૬૯॥

પદયોરનયોઃ પરસ્ય પુંસ-
    સ્તદનુગ્રાહ્યવિહારપદ્ધતેર્વા ।
શિરસો મણિપાદુકે શ્રુતીનાં
    મનસો વા મમ ભૂષણં ત્વમેકા ॥ ૧૧.૧૦॥ ૨૭૦॥

કૃપયા મધુવૈરિપાદરક્ષે
    કઠિને ચેતસિ મામકે વિહર્તુમ્ ।
મકુટેષુ દિવૌકસાં વિધત્તે
    ભવતી રત્નવિસંસ્થુલેષુ યોગ્યામ્ ॥ ૧૧.૧૧॥ ૨૭૧॥

ચરણદ્વયમર્ભકસ્ય શૌરેઃ
    શરદમ્ભોરુહચાતુરીધુરીણમ્ ।
શકટાસુરતાડનેઽપિ ગુપ્તં
    તવ શક્ત્યા કિલ પાદુકે તદાસીત્ ॥ ૧૧.૧૨॥ ૨૭૨॥

ઉત્તસ્થુષો રઙ્ગશયસ્ય શેષાદાસ્થાનસિંહાસનમારુરુક્ષોઃ ।
મધ્યેનિશાન્તં મણિપાદુકે ત્વાં લીલાપદન્યાસસખીં પ્રપદ્યે ॥ ૧૧.૧૩॥ ૨૭૩॥

પ્રાપ્તાધિકારાઃ પતયઃ પ્રજાનામુત્તંસિતામુત્તમપાદુકે ત્વામ્ ।
રઙ્ગેશિતુઃ સ્વૈરવિહારકાલે સંયોજયન્ત્યઙ્ઘ્રિસરોજયુગ્મે ॥ ૧૧.૧૪॥ ૨૭૪॥

ત્વયાઽનુબદ્ધાં મણિપાદરક્ષે લીલાગતિં રઙ્ગશયસ્ય પુંસઃ ।
નિશામયન્તો ન પુનર્ભજન્તે સંસારકાન્તારગતાગતાનિ ॥ ૧૧.૧૫॥ ૨૭૫॥

વ્યૂહાનુપૂર્વીરુચિરાન્ વિહારાન્
    પદક્રમેણ પ્રતિપદ્યમાના ।
બિભર્ષિ નિત્યં મણિપાદુકે ત્વં
    મુરદ્વિષો મૂર્તિરિવ ત્રિલોકીમ્ ॥ ૧૧.૧૬॥ ૨૭૬॥

પદેષુ મન્દેષુ મહત્સ્વપિ ત્વં
    નીરન્ધ્રસંશ્લેષવતી મુરારેઃ ।
પ્રત્યાયનાર્થં કિલ પાદુકે નઃ
    સ્વાભાવિકં દર્શયસિ પ્રભાવમ્ ॥ ૧૧.૧૭॥ ૨૭૭॥

કૃપાવિશેષાત્ ક્ષમયા સમેતાં
  પ્રવર્તમાનાં જગતો વિભૂત્યૈ ।
અવૈમિ નિત્યં મણિપાદુકે ત્વા-
  માકસ્મિકીં રઙ્ગપતેઃ પ્રસત્તિમ્ ॥ ૧૧.૧૮॥ ૨૭૮॥

ઉપાગતાનામુપતાપશાન્ત્યૈ
  સુખાવગાહાં ગતિમુદ્વહન્તીમ્ ।
પશ્યામિ શૌરેઃ પદવાહિનીં ત્વાં
  નિમ્નેષુ તુઙ્ગેષુ ચ નિર્વિશેષામ્ ॥ ૧૧.૧૯॥ ૨૭૯॥

સહ પ્રયાતા સતતં પ્રયાણે
  પ્રાપ્તાસને સંશ્રિતપાદપીઠા ।
અલઙ્ઘનીયા સહજેન ભૂમ્ના
  છાયેવ શૌરેર્મણિપાદુકે ત્વમ્ ॥ ૧૧.૨૦॥ ૨૮૦॥

પદસ્પૃશા રઙ્ગપતિર્ભવત્યા વિચક્રમે વિશ્વમિદં ક્ષણેન ।
તદસ્ય મન્યે મણિપાદરક્ષે ત્વયૈવ વિખ્યાતમુરુક્રમત્વમ્ ॥ ૧૧.૨૧॥ ૨૮૧॥

સઞ્ચારયન્તી પદમન્વતિષ્ઠઃ સહાયકૃત્યં મણિપાદરક્ષે ।
માતસ્ત્વમેકા મનુવંશગોપ્તુર્ગોપાયતો ગૌતમધર્મદારાન્ ॥ ૧૧.૨૨॥ ૨૮૨॥

ત્વત્તસ્ત્રિવિષ્ટપચરાનસપત્નયિષ્ય-
  ન્નારુહ્ય તાર્ક્ષ્યમવરુહ્ય ચ તત્ક્ષણેન ।
શુદ્ધાન્તભૂમિષુ પુનર્મણિપાદરક્ષે
  વિશ્રામ્યતિ ત્વયિ વિહારવશેન શૌરિઃ ॥ ૧૧.૨૩॥ ૨૮૩॥

વિક્રમ્ય ભૂમિમખિલાં બલિના પ્રદિષ્ટાં
  દેવે પદાવનિ દિવં પરિમાતુકામે ।
આસીદતો દિનકરસ્ય કરોપતાપા-
  ત્સંરક્ષિતું પદસરોજમુપર્યભૂસ્ત્વમ્ ॥ ૧૧.૨૪॥ ૨૮૪॥

ત્વત્સઙ્ગમાન્નનુ સકૃદ્વિધિસંપ્રયુક્તા
  શુદ્ધિં પરામધિજગામ શિવત્વહેતુમ્ ।
રઙ્ગાધિરાજપદરક્ષિણિ કીદૃશી સા
  ગઙ્ગા બભૂવ ભવદીયગતાગતેન ॥ ૧૧.૨૫॥ ૨૮૫॥

વૃદ્ધિં ગવાં જનયિતું ભજતા વિહારાન્

કૃષ્ણેન રઙ્ગરસિકેન કૃતાશ્રયાયાઃ ।
સઞ્ચારતસ્તવ તદા મણિપાદરક્ષે
વૃન્દાવનં સપદિ નન્દનતુલ્યમાસીત્ ॥ ૧૧.૨૬॥ ૨૮૬॥

માતસ્ત્રયીમયતયા ચરણપ્રમાણે
દ્વે વિક્રમેષુ વિવિધેષુ સહાયભૂતે ।
નાથસ્ય સાધુપરિરક્ષણકર્મણિ ત્વં
દુષ્કૃદ્વિનાશનદશાસુ વિહઙ્ગરાજઃ ॥ ૧૧.૨૭॥ ૨૮૭॥

પાદાવનિ ક્વચન વિક્રમણે ભુજાનાં
પઞ્ચાયુધી કરરુહૈર્ભજતે વિકલ્પમ્ ।
નિત્યં ત્વમેવ નિયતા પદયોર્મુરારે-
સ્તેનાસિ નૂનમવિકલ્પસમાધિયોગ્યા ॥ ૧૧.૨૮॥ ૨૮૮॥

અક્ષેત્રવિદ્ભિરધિગન્તુમશક્યવૃત્તિ-
ર્માતસ્ત્વયા નિરવધિર્નિધિરપ્રમેયઃ ।
રથ્યાન્તરેષુ ચરણાવનિ રઙ્ગસઙ્ગી
વાત્સલ્યનિઘ્નમનસા જનસાત્ કૃતોઽસૌ ॥ ૧૧.૨૯॥ ૨૮૯॥

સમ્પદ્યતે સમુચિતં ક્રમમાશ્રયન્ત્યા
સદ્વર્ત્મના ભગવતોઽપિ ગતિર્ભવત્યા ।
ઈષ્ટે પદાવનિ પુનઃ ક ઇવેતરેષાં
વ્યાવર્તનસ્ય વિષમાદપથપ્રચારાત્ ॥ ૧૧.૩૦॥ ૨૯૦॥

રઙ્ગેશ્વરેણ સહ લાસ્યવિશેષભાજો
લીલોચિતેષુ તવ રત્નશિલાતલેષુ ।
મધ્યે સ્થિતાનિ કતિચિન્મણિપાદરક્ષે
સભ્યાન્ વિશેષમનુયોક્તુમિતિ પ્રતીમઃ ॥ ૧૧.૩૧॥ ૨૯૧॥

નિત્યં પદાવનિ નિવેશ્ય પદં ભવત્યાં
નિષ્પન્દકલ્પપરિમેયપરિચ્છદાનિ ।
શૃઙ્ગારશીતલતરાણિ ભવન્તિ કાલે
રઙ્ગેશ્વરસ્ય લલિતાનિ ગતાગતાનિ ॥ ૧૧.૩૨॥ ૨૯૨॥

ભોગાર્ચનાનિ કૃતિભિઃ પરિકલ્પિતાનિ
પ્રીત્યૈવ રઙ્ગનૃપતિઃ પ્રતિપદ્યમાનઃ ।
પશ્યત્સુ નિત્યમિતરેષુ પરિચ્છદેષુ

પ્રત્યાસનં ભજતિ કાઞ્ચનપાદુકે ત્વામ્ ॥ ૧૧.૩૩॥ ૨૯૩॥

અન્તસ્તૃતીયનયનૈઃ સ્વયમુત્તમાઙ્ગૈ-
રાવિર્ભવિષ્યદતિરિક્તમુખામ્બુજૈર્વા ।
ન્યસ્યન્તિ રઙ્ગરસિકસ્ય વિહારકાલે
વારક્રમેણ કૃતિનો મણિપાદુકે ત્વામ્ ॥ ૧૧.૩૪॥ ૨૯૪॥

રઙ્ગેશ્વરે સમધિરૂઢવિહઙ્ગરાજે
માતઙ્ગરાજવિધૃતાં મણિપાદુકે ત્વામ્ ।
અન્વાસતે વિધૃતચારુસિતાતપત્રાઃ
સ્વર્ગૌકસઃ સુભગચામરલોલહસ્તાઃ ॥ ૧૧.૩૫॥ ૨૯૫॥

વિષ્ણોઃ પદં ગતિવશાદપરિત્યજન્તીં
લોકેષુ નિત્યવિષમેષુ સમપ્રચારામ્ ।
અન્વેતુમર્હતિ ધૃતામખિલૈઃ સુરેન્દ્રૈ-
ર્ગઙ્ગા કથં નુ ગરુડધ્વજપાદુકે ત્વામ્ ॥ ૧૧.૩૬॥ ૨૯૬॥

ભિક્ષામપેક્ષ્ય દનુજેન્દ્રગૃહં પ્રયાતુ-
ર્ગુપ્ત્યૈ ગવાં વિહરતો વહતશ્ચ દૂત્યમ્ ।
તત્તાદૃશાનિ ચરણાવનિ રઙ્ગભર્તુ-
સ્ત્વત્સઙ્ગમેન સુભગાનિ વિચેષ્ટિતાનિ ॥ ૧૧.૩૭॥ ૨૯૭॥

નિર્વ્યજ્યમાનનવતાલલયપ્રથિમ્ના
નિર્યન્ત્રણેન નિજસઞ્ચરણક્રમેણ ।
મૃદ્નાસિ રઙ્ગનૃપતેર્મણિપાદુકે ત્વં
દુઃખાત્મકાન્પ્રણમતાં દુરિતપ્રરોહાન્ ॥ ૧૧.૩૮॥ ૨૯૮॥

નિત્યં ય એવ જગતો મણિપાદરક્ષે
સત્તાસ્થિતિપ્રયતનેષુ પરં નિદાનમ્ ।
સોઽપિ સ્વતન્ત્રચરિતસ્ત્વદધીનવૃત્તિઃ
કા વા કથા તદિતરેષુ મિતમ્પચેષુ ॥ ૧૧.૩૯॥ ૨૯૯॥

નિર્વિષ્ટનાગશયનેન પરેણ પુંસા
ન્યસ્તે પદે ત્વયિ પદાવનિ લોકહેતોઃ ।
સ્વર્ગૌકસાં ત્વદનુધાવનતત્પરાણાં
સદ્યઃ પદાનિ વિપદામપદં ભવન્તિ ॥ ૧૧.૪૦॥ ૩૦૦॥

શરદુપગમકાલે સન્ત્યજન્ યોગનિદ્રાં
 શરણમુપગતાનાં ત્રાણહેતોઃ પ્રયાસ્યન્ ।
જલધિદુહિતુરઙ્ગાન્મન્દમાદાય દેવિ
 ત્વયિ ખલુ નિદધાતિ સ્વં પદં રઙ્ગનાથઃ ॥ ૧૧.૪૧॥ ૩૦૧॥

સ્પૃશસિ પદસરોજં પાદુકે નિર્વિઘાતં
 પ્રવિશસિ ચ સમસ્તાં દેવિ શુદ્ધાન્તકક્ષ્યામ્ ।
અપરમપિ મુરારેઃ પૂર્વમાભીરકન્યા-
 સ્વભિસરણવિધીનામગ્રિમા સાક્ષિણી ત્વમ્ ॥ ૧૧.૪૨॥ ૩૦૨॥

પ્રતિભવનમનન્યે પાદુકે ત્વત્પ્રભાવા-
 દ્વિવિધવપુષિ દેવે વિભ્રમદ્યૂતકાલે ।
અભિલષિતસપત્નીગેહયાત્રાવિઘાતં
 ગ્લહયતિ રહસિ ત્વાં ષોડશસ્ત્રીસહસ્રમ્ ॥ ૧૧.૪૩॥ ૩૦૩॥

તટભુવિ યમુનાયાશ્છન્નવૃત્તે મુકુન્દે
 મુહુરધિગમહેતોર્મુહ્યતાં યૌવનાનામ્ ।
શમયિતુમલમાસીચ્છઙ્ખચક્રાદિચિહ્ના
 પ્રતિપદવિચિકિત્સાં પાદુકે પદ્ધતિસ્તે ॥ ૧૧.૪૪॥ ૩૦૪॥

અધિગતબહુશાખાન્ મઞ્જુવાચઃ શુકાદીન્
 સરસિજનિલયાયાઃ પ્રીતયે સઙ્ગ્રહીતુમ્ ।
પ્રકટિતગુણજાલં પાદુકે રઙ્ગબન્ધો-
 રુપનિષદટવીષુ ક્રીડિતં ત્વત્સનાથમ્ ॥ ૧૧.૪૫॥ ૩૦૫॥

મુનિપરિષદિ ગીતં ગૌતમીરક્ષણં તે
 મુહુરનુકલયન્તો મઞ્જુવાચઃ શકુન્તાઃ ।
ઉષસિ નિજકુલાયાદુત્થિતા દણ્ડકેષુ
 સ્વયમપિ પદરક્ષે સ્વૈરમામ્રેડયન્તિ ॥ ૧૧.૪૬॥ ૩૦૬॥

યમનિયમવિશુદ્ધૈર્યન્ન પશ્યન્તિ ચિત્તૈઃ
 શ્રુતિષુ ચુલુકમાત્રં દૃશ્યતે યસ્ય ભૂમા ।
સુલભનિખિલભાવં માંસદૃષ્ટેર્જનસ્ય
 સ્વયમુપહરસિ ત્વં પાદુકે તં પુમાંસમ્ ॥ ૧૧.૪૭॥ ૩૦૭॥

નિધિમિવ નિરપાયં ત્વામનાદૃત્ય મોહા-
 દહમિવ મમ દોષં ભાવયન્ ક્ષુદ્રમર્થમ્ ।

મયિ સતિ કરુણાયાઃ પૂર્ણપાત્રે ત્વયા કિં
    પરમુપગમનીયઃ પાદુકે રઙ્ગનાથ ॥ ૧૧.૪૮॥ ૩૦૮॥

કમપિ કનકસિન્ધોઃ સૈકતે સઞ્ચરન્તં
    કલશજલધિકન્યામેદિનીદત્તહસ્તમ્ ।
અનિશમનુભવેયં પાદુકે ત્વય્યધીનં
    સુચરિતપરિપાકં સૂરિભિઃ સેવનીયમ્ ॥ ૧૧.૪૯॥ ૩૦૯॥

પરિસરમુપયાતા પાદુકે પશ્ય માતઃ
    કરણવિલયખેદાત્ કાન્દિશીકે વિવેકે ।
પુરુષમુપનયન્તી પુણ્ડરીકાક્ષમગ્રે
    પુનરુદરનિવાસક્લેશવિચ્છેદનં નઃ ॥ ૧૧.૫૦॥ ૩૧૦॥

સા મે ભૂયાત્ સપદિ ભવતી પાદુકે તાપશાન્ત્યૈ
    યામારૂઢો દિવમિવ શુભૈઃ સેવ્યમાનો મરુદ્ભિઃ ।
સૌદામિન્યા સહ કમલયા સહ્યજાવૃદ્ધિહેતુઃ
    કાલે કાલે ચરતિ કરુણાવર્ષુકઃ કૃષ્ણમેઘઃ ॥ ૧૧.૫૧॥ ૩૧૧॥

સત્યાલ્લોકાત્ સકલમહિતાત્ સ્થાનતો વા રઘૂણાં
    શઙ્કે માતઃ સમધિકગુણં સૈકતં સહ્યજાયાઃ ।
પૂર્વં પૂર્વં ચિરપરિચિતં પાદુકે યત્ ત્યજન્ત્યા
    નીતો નાથસ્તદિદમિતરન્નીયતે ન ત્વયાઽસૌ ॥ ૧૧.૫૨॥ ૩૧૨॥

અગ્રે દેવિ ત્વયિ સુમનસામગ્રિમૈરન્તરઙ્ગૈ-
    ર્વિન્યસ્તાયાં વિનયગરિમાવર્જિતાદુત્તમાઙ્ગાત્ ।
દત્તે પાદં દરમુકુલિતં ત્વત્પ્રભાવાતિશઙ્કી
    દેવઃ શ્રીમાન્ દનુજમથનો જૈત્રયાત્રાસ્વનન્યઃ ॥ ૧૧.૫૩॥ ૩૧૩॥

પૌરોદન્તાન્પરિકલયિતું પાદુકે સઞ્ચરિષ્ણો-
    ર્વ્યક્તાવ્યક્તા વશિકવિશિખાવર્તિની રઙ્ગભર્તુઃ ।
વેલાતીતશ્રુતિપરિમલૈર્વ્યક્તિમભ્યેતિ કાલ્યે
    વિન્યાસસ્તે વિબુધપરિષન્મૌલિવિન્યાસદૃશ્યૈઃ ॥ ૧૧.૫૪॥ ૩૧૪॥

આસંસ્કારાદ્ દ્વિજપરિષદા નિત્યમભ્યસ્યમાના
    શ્રેયોહેતુઃ શિરસિ જગતઃ સ્થાયિની સ્વેન ભૂમ્ના ।
રઙ્ગાધીશે સ્વયમુદયિનિ ક્ષેમુમન્ધં તમિસ્રં
    ગાયત્રીવ ત્રિચતુરપદા ગણ્યસે પાદુકે ત્વમ્ ॥ ૧૧.૫૫॥ ૩૧૫॥

ભવતીં પરસ્ય પુરુષસ્ય રઙ્ગિણો
    મહિમાનમેવ મણિપાદુ મન્મહે ।
કથમન્યથા સ્વમહિમપ્રતિષ્ઠિતઃ
    પ્રતિતિષ્ઠતિ ત્વયિ પદાત્પદં પ્રભુઃ ॥ ૧૧.૫૬॥ ૩૧૬॥

તિથિરષ્ટમી યદવતારવૈભવા-
    ત્પ્રથમા તિથિસ્ત્રિજગતામજાયત ।
મણિપાદુકે તમુપનીય વીથિકા-
    સ્વતિથીકરોષિ તદનન્યચક્ષુષામ્ ॥ ૧૧.૫૭॥ ૩૧૭॥

અપારપ્રખ્યાતેરશરણશરણ્યત્વયશસા
    નનુ ત્વં રઙ્ગેન્દોશ્ચરણકમલસ્યાપિ શરણમ્ ।
યયા લભ્યઃ પઙ્ગુપ્રભૃતિભિરસૌ રઙ્ગનગર-
    પ્રતોલીપર્યન્તે નિધિરનઘવાચાં નિરવધિઃ ॥ ૧૧.૫૮॥ ૩૧૮॥

તત્તદ્દાસગૃહાઙ્ગણપ્રણયિનઃ શ્રીરઙ્ગશ઼ૃઙ્ગારિણો
    વાલ્લભ્યાદવિભક્તમન્થરગતિસ્ત્વં મે ગતિઃ પાદુકે ।
લીલાપઙ્કજહલ્લકોત્પલગલન્માધ્વીકસેકોત્થિતા
    યત્રામોદવિકલ્પના વિવૃણુતે શુદ્ધાન્તવારક્રમમ્ ॥ ૧૧.૫૯॥ ૩૧૯॥

સમ્ભવતુ પાદરક્ષે સત્યસુપર્ણાદિરૌપવાહ્યગણઃ ।
યાત્રાસુ રઙ્ગભર્તુઃ પ્રથમપરિસ્પન્દકારણં ભવતી ॥ ૧૧.૬૦॥ ૩૨૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
સઞ્ચારપદ્ધતિરેકાદશી ॥

## ૧૨. પુષ્પપદ્ધતિઃ (૩૦)

શૌરેઃ સઞ્ચારકાલેષુ પુષ્પવૃષ્ટિર્દિવશ્ચ્યુતા ।
પર્યવસ્યતિ યત્રૈવ પ્રપદ્યે તાં પદાવનીમ્ ॥ ૧૨.૧॥ ૩૨૧॥

દૈવતં મમ જગત્ત્રયાર્ચિતા દિવ્યદમ્પતિવિહારપાદુકા ।
પાણિપાદકમલાર્પણાત્ તયોર્યા ભજત્યનુદિનં સભાજનમ્ ॥ ૧૨.૨॥ ૩૨૨॥

તવ રઙ્ગરાજમણિપાદુ તતો વિહિતાર્હણઃ સુરસરિત્પયસા ।

અવતંસચન્દ્રકલયા ગિરિશો નવકેતકીદલમિવાર્ચયતિ ॥ ૧૨.૩॥ ૩૨૩॥

કુસુમેષુ સમર્પિતેષુ ભક્ત્યૈ-
 સ્ત્વયિ રઙ્ગેશપદાવનિ પ્રતીમઃ ।
શઠકોપમુનેસ્ત્વદેકનામ્નઃ
 સુભગં યત્ સુરભિત્વમસ્ય નિત્યમ્ ॥ ૧૨.૪॥ ૩૨૪॥

પદે પરસ્મિન્ ભુવને વિધાતુઃ
 પુણ્યૈઃ પ્રસૂનૈઃ પુલિને સરય્વાઃ ।
મધ્યે ચ પાદાવનિ સહ્યસિન્ધો-
 રાસીચ્ચતુઃસ્થાનમિવાર્ચનં તે ॥ ૧૨.૫॥ ૩૨૫॥

તવૈવ રઙ્ગેશ્વરપાદરક્ષે સૌભાગ્યમવ્યાહતમાપ્તુકામાઃ ।
સુરદ્રુમાણાં પ્રસવૈઃ સુજાતૈરભ્યર્ચયન્ત્યપ્સરસો મુહુસ્ત્વામ્ ॥ ૧૨.૬॥ ૩૨૬॥

નિવેશિતાં રઙ્ગપતેઃ પદાબ્જે મન્યે સપર્યાં મણિપાદરક્ષે ।
ત્વદર્પણાદાપતિતામપશ્યદ્ ગાણ્ડીવધન્વા ગિરિશોત્તમાઙ્ગે ॥ ૧૨.૭॥ ૩૨૭॥

પત્રાણિ રઙ્ગનૃપતેર્મનિપાદરક્ષે
 દ્વિત્રાણ્યપિ ત્વયિ સમર્પ્ય વિભૂતિકામાઃ ।
પર્યાયલબ્ધપુરુહૂતપદાઃ શચીનાં
 પત્રાઙ્કુરાણિ વિલિખન્તિ પયોધરેષુ ॥ ૧૨.૮॥ ૩૨૮॥

નિર્વર્તયન્તિ તવ યે નિચિતાનિ પુષ્પૈ-
 ર્વૈહારિકાણ્યુપવનાનિ વસુન્ધરાયામ્ ।
કાલેન તે કમલલોચનપાદરક્ષે
 ક્રીડન્તિ નન્દનવને કૃતિનઃ પુમાંસઃ ॥ ૧૨.૯॥ ૩૨૯॥

અર્ચન્તિ યે મુરભિદો મણિપાદરક્ષે
 ભાવાત્મકૈરપિ પરં ભવતીં પ્રસૂનૈઃ ।
મન્દારદામસુભગૈર્મુકુટૈરજસ્રં
 વૃન્દારકાઃ સુરભયન્તિ પદં તદીયમ્ ॥ ૧૨.૧૦॥ ૩૩૦॥

અસ્પૃષ્ટદોષપરિમર્ષમલઙ્ઘ્યમન્યૈ-
 ર્હસ્તાપચેયમખિલં પુરુષાર્થવર્ગમ્ ।
ચિત્રં જનાર્દનપદાવનિ સાધકાનાં
 ત્વય્યર્પિતાઃ સુમનસઃ સહસા ફલન્તિ ॥ ૧૨.૧૧॥ ૩૩૧॥

વન્દારુભિઃ સુરગણૈસ્ત્વયિ સંપ્રયુક્તા
    માલા વિભાતિ મધુસૂદનપાદરક્ષે ।
વિક્રાન્તવિષ્ણુપદસંશ્રયબદ્ધસખ્યા
    ભાગીરથીવ પરિરમ્ભણકાઙ્ક્ષિણી તે ॥ ૧૨.૧૨॥ ૩૩૨॥

યે નામ રઙ્ગનૃપતેર્મણિપાદુકે ત્વા-
    મભ્યર્ચયન્તિ કમલૈરધિકર્તુકામાઃ ।
આરોપયત્યવહિતા નિયતિઃ ક્રમાત્ તાન્
    કલ્પાન્તરીયકમલાસનપત્રિકાસુ ॥ ૧૨.૧૩॥ ૩૩૩॥

ત્વય્યર્પિતાનિ મનુજૈર્મણિપાદરક્ષે
    દૂર્વાઙ્કુરાણિ સુલભાન્યથવા તુલસ્યઃ ।
સારાધિકાઃ સપદિ રઙ્ગનરેન્દ્રશક્ત્યા
    સંસારનાગદમનૌષધયો ભવન્તિ ॥ ૧૨.૧૪॥ ૩૩૪॥

આરાધ્ય નૂનમસુરાર્દનપાદુકે ત્વા-
    મામુષ્મિકાય વિભવાય સહસ્રપત્રૈઃ ।
મન્વન્તરેષુ પરિવર્તિષુ દેવિ મર્ત્યાઃ
    પર્યાયતઃ પરિણમન્તિ સહસ્રનેત્રાઃ ॥ ૧૨.૧૫॥ ૩૩૫॥

ધન્યૈસ્ત્વયિ ત્રિદશરક્ષકપાદરક્ષે
    પુષ્પાણિ કાઞ્ચનમયાનિ સમર્પિતાનિ ।
વિસ્રંસિના વિનમતો ગિરિશોત્તમાઙ્ગા-
    દારગ્વધેન મિલિતાન્યપૃથગ્ભવન્તિ ॥ ૧૨.૧૬॥ ૩૩૬॥

વિશ્વોપસર્ગશમનં ત્વયિ મન્યમાનૈ-
    ર્વૈમાનિકૈઃ પ્રણિહિતં મણિપાદરક્ષે ।
પદ્માસહાયપદપદ્મનખાર્ચિષસ્તે
    પુષ્પોપહારવિભવં પુનરુક્તયન્તિ ॥ ૧૨.૧૭॥ ૩૩૭॥

નાકૌકસાં શમયિતું પરિપન્થિવર્ગાન્
    નાથે પદં ત્વયિ નિવેશયિતું પ્રવૃત્તે ।
ત્વત્સંશ્રિતાં વિજહતસ્તુલસીં વમન્તિ
    પ્રસ્થાનકાહલરવાન્પ્રથમં દ્વિરેફાઃ ॥ ૧૨.૧૮॥ ૩૩૮॥

રઙ્ગેશપાદપરિભોગસુજાતગન્ધાં
    સંપ્રાપ્ય દેવિ ભવતીં સહ દિવ્યપુષ્પૈઃ ।

નિત્યોપદર્શિતરસં ન કિલાદ્રિયન્તે
    નાભીસરોજમપિ નન્દનચઞ્ચરીકાઃ ॥ ૧૨.૧૯॥ ૩૩૯॥

પ્રાગેવ કાઞ્ચનપદાવનિ પુષ્પવર્ષા-
    ત્સંવર્તિતે શમિતદૈત્યભયૈઃ સુરેન્દ્રૈઃ ।
પદ્મેક્ષણસ્ય પદપદ્મનિવેશલાભે
    પુષ્પાભિષેકમુચિતં પ્રતિપદ્યસે ત્વમ્ ॥ ૧૨.૨૦॥ ૩૪૦॥

દિશિદિશિ મુનિપત્ન્યો દણ્ડકારણ્યભાગે
    ન જહતિ બહુમાનાન્નૂનમદ્યાપિ મૂલમ્ ।
રઘુપતિપદરક્ષે ત્વત્પરિષ્કારહેતો-
    રપચિતકુસુમાનામાશ્રમાનોકહાનામ્ ॥ ૧૨.૨૧॥ ૩૪૧॥

ઘટયસિ પરિપૂર્ણાન્ કૃષ્ણમેઘપ્રચારે
    કૃતિભિરુપહૃતૈસ્ત્વં કેતકીગર્ભપત્રૈઃ ।
વરતનુપરિણામાદ્ધામતઃ શ્યામલાનાં
    પ્રણતિસમયલગ્નાન્પાદુકે મૌલિચન્દ્રાન્ ॥ ૧૨.૨૨॥ ૩૪૨॥

પરિચરણનિયુક્તૈઃ પાદુકે રઙ્ગભર્તુઃ
    પવનતનયમુખ્યૈરર્પિતાં ત્વત્સમીપે ।
વિનતવિધિમુખેભ્યો નિર્વિશેષાં દ્વિરેફાઃ
    કથમપિ વિભજન્તે કાઞ્ચનીં પદ્મપઙ્ક્તિમ્ ॥ ૧૨.૨૩॥ ૩૪૩॥

વિધિશિવપુરુહૂતસ્પર્શિતૈર્દિવ્યપુષ્પૈ-
    સ્ત્વયિ સહ નિપતન્તસ્તત્તદુદ્ધાનભૃઙ્ગાઃ ।
મધુરિપુપદરક્ષે મઞ્જુભિઃ સ્વૈર્નિનાદૈ-
    રવિદિતપરમાર્થાન્ નૂનમધ્યાપયન્તિ ॥ ૧૨.૨૪॥ ૩૪૪॥

પ્રશમયતિ જનાનાં સંજ્વરં રઙ્ગભર્તુઃ
    પરિસરચલિતાનાં પાદુકે ચામરાણામ્ ।
અનુદિનમુપયાતૈરુત્થિતં દિવ્યપુષ્પૈ-
    ર્નિગમપરિમલં તે નિર્વિશન્ ગન્ધવાહઃ ॥ ૧૨.૨૫॥ ૩૪૫॥

અખિલભુવનરક્ષાનાટિકાં દર્શયિષ્ય-
    ન્નનિમિષતરુપુષ્પૈરર્ચિતે રઙ્ગમધ્યે ।
અભિનયમનુરૂપં શિક્ષયત્યાત્મના ત્વાં
    પ્રથમવિહિતલાસ્યઃ પાદુકે રઙ્ગનાથઃ ॥ ૧૨.૨૬॥ ૩૪૬॥

અગલિતનિજરાગાં દેવિ વિષ્ણોઃ પદં ત-
　ત્રિભુવનમહનીયાં પ્રાપ્ય સન્ધ્યામિવ ત્વામ્ ।
ભવતિ વિબુધમુક્તૈઃ સ્પષ્ટતારાનુષઙ્ગં
　પરિસરપતિતૈસ્તે પારિજાતપ્રસૂનૈઃ ॥ ૧૨.૨૭॥ ૩૪૭॥

વ્યઞ્જન્ત્યેતે વિભવમનઘં રઞ્જયન્તઃ શ્રુતીર્નઃ
　પ્રાધ્વં રઙ્ગક્ષિતિપતિપદં પાદુકે ધારયન્ત્યાઃ ।
નાદૈરન્તર્નિહિતનિગમૈર્નન્દનોદ્યાનભૃઙ્ગા
　દિવ્યૈઃ પુષ્પૈઃ સ્નપિતવપુષો દેવિ સૌસ્નાતિકાસ્તે ॥ ૧૨.૨૮॥ ૩૪૮॥

કિં પુષ્પૈસ્તુલસીદલૈરપિ કૃતં દૂર્વાઽપિ દૂરે સ્થિતા
　ત્વત્પૂજાસુ મુકુન્દપાદુ કૃપયા ત્વં કામધેનુઃ સતામ્ ।
પ્રત્યગ્રાહૃતદર્ભપલ્લવલવગ્રાસાભિલાષોન્મુખી
　ધેનુસ્તિષ્ઠતુ સા વસિષ્ઠભવનદ્વારોપકણ્ઠસ્થલે ॥ ૧૨.૨૯॥ ૩૪૯॥

ચૂડારગ્વધરજસા ચૂર્ણસ્નપનં વિધાય તે પૂર્વમ્ ।
રઙ્ગેશપાદુકે ત્વામભિષિઞ્ચતિ મૌલિગઙ્ગયા શમ્ભુઃ ॥ ૧૨.૩૦॥ ૩૫૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પુષ્પપદ્ધતિર્દ્વાદશી ॥

## ૧૩. પરાગપદ્ધતિઃ (૩૦)

પાન્તુ વઃ પદ્મનાભસ્ય પાદુકાકેલિપાંસવઃ ।
અહલ્યાદેહનિર્માણપર્યાયપરમાણવઃ ॥ ૧૩.૧॥ ૩૫૧॥

તવ સઞ્ચરણાદ્રજો વિધૂતં યદિદં રઙ્ગનરેન્દ્રપાદરક્ષે ।
અલમેતદનાવિલાનિ કર્તું કતકક્ષોદ ઇવાશુ માનસાનિ ॥ ૧૩.૨॥ ૩૫૨॥

પુનરુક્તપિતામહાનુભાવાઃ પુરુષાઃ કેચિદમી પુનન્તિ વિશ્વમ્ ।
મધુવૈરિપદારવિન્દબન્ધોરપરાગાસ્તવ પાદુકે પરાગૈઃ ॥ ૧૩.૩॥ ૩૫૩॥

અભિયુક્તજનો નિજાર્ભકાણાં બહુશો રઙ્ગનરેન્દ્રપાદરક્ષે ।
અવલેપપિશાચમોચનાર્થં રજસા લિમ્પતિ તાવકેન દેહાન્ ॥ ૧૩.૪॥ ૩૫૪॥

શિરસા પરિગૃહ્ય લોકપાલાસ્તવ રઙ્ગેશ્વરપાદુકે રજાંસિ ।
વિષમેષુ બલેષુ દાનવાનાં વ્યપનીતાન્યશિરસ્ત્રમાવિશન્તિ ॥ ૧૩.૫॥ ૩૫૫॥

કૃતિનઃ શિરસા સમુદ્વહન્તઃ કતિચિત્ કેશવપાદુકે રજસ્તે ।
રજસરતમસોઽપિ દૂરભૂતં પરિપશ્યન્તિ વિશુદ્ધમેવ સત્વમ્ ॥ ૧૩.૬॥ ૩૫૬॥

અધિકં પદમાશ્રિતોઽપિ વેધાઃ પ્રયતો રઙ્ગધુરીણપાદરક્ષે ।
અભિવાઞ્છતિ સઙ્ગમં પરાગૈરભિજાતૈસ્તવ દેવિ નાભિજાતઃ ॥ ૧૩.૭॥ ૩૫૭॥

શુદ્ધસત્ત્વવપુષૈવ ભવત્યા પાદુકે વિરજસૌ હરિપાદૌ ।
અસ્તુ કિં પુનરિદં રજસા તે શુદ્ધસત્ત્વમયતા મનુજાનામ્ ॥ ૧૩.૮॥ ૩૫૮॥

તદ્રજસ્તવ તનોતિ પાદુકે
    માનસાન્યકઠિનાનિ દેહિનામ્ ।
પ્રસ્તરસ્ય પદવીગતસ્ય ય-
    દ્વ્યાચકાર મુનિધર્મદારતામ્ ॥ ૧૩.૯॥ ૩૫૯॥

રઙ્ગેશયસ્ય પુરુષસ્ય જગદ્વિભૂત્યૈ
    રથ્યાપરિક્રમવિધૌ મનિપાદરક્ષે ।
સીમન્તદેશમનવદ્યસરસ્વતીનાં
    સિન્દૂરયન્તિ ભવતીચરિતાઃ પરાગાઃ ॥ ૧૩.૧૦॥ ૩૬૦॥

માન્યેન રઙ્ગનૃપતેર્મણિપાદરક્ષે
    ચૂડાપદાનિ રજસા તવ ભૂષયન્તઃ ।
કાલક્રમેણ ભજતાં કમલાસનત્વં
    નાભીસરોજરજસાં નિવસન્તિ મધ્યે ॥ ૧૩.૧૧॥ ૩૬૧॥

માતર્મુકુન્દચરણાવનિ તાવકીના-
    શ્ચિન્તાવશીકરણચૂર્ણવિશેષકલ્પાઃ ।
સઞ્ચારપાંસુકણિકાઃ શિરસા વહન્તો
    વિશ્વં પુનન્તિ પદપદ્મપરાગલેશૈઃ ॥ ૧૩.૧૨॥ ૩૬૨॥

આયોજિતાન્યમલધીભિરનન્યલભ્યે
    પાદાવનિ શ્રુતિવધૂપટવાસકૃત્યે ।
ત્વત્સઞ્ચરપ્રચલિતાનિ રજાંસિ શૌરેઃ
    પ્રખ્યાપયન્તિ પદપદ્મપરાગશોભામ્ ॥ ૧૩.૧૩॥ ૩૬૩॥

મૂર્ધાનમમ્બ મુરભિન્મણિપાદરક્ષે

યેષાં કદાઽપિ રજસા ભવતી પુનાતિ ।
ત્વામેવ તે સુકૃતિનઃ સ્નપયન્તિ કાલે
મન્દારદામરજસા મકુટચ્યુતેન ॥ ૧૩.૧૪॥ ૩૬૪॥

રથ્યાવિહાર રજસા પરિધૂસરાઙ્ગીં
રઙ્ગેશ્વરસ્ય લલિતેષુ મહોત્સવેષુ ।
પ્રસ્ફોટયત્યવનતો મણિપાદુકે ત્વાં
ગૌરીપતિઃ સ્વયમિભાજિનપલ્લવેન ॥ ૧૩.૧૫॥ ૩૬૫॥

નેદીયસાં નિજપરાગનિવેશપૂર્વં
સ્પૃષ્ટ્વા શિરાંસિ ભવતી ભવરોગભાજામ્ ।
ગાઢં નિપીડ્ય ગરુડધ્વજપાદરક્ષે
માનગ્રહં શમયતીવ પરૈરસાધ્યમ્ ॥ ૧૩.૧૬॥ ૩૬૬॥

આપાતવલ્લવતનોરકુમારયૂનઃ
પાદાવનિ પ્રવિશતો યમુનાનિકુઞ્જાન્ ।
આસીદનઙ્ગસમરાત્પુરતઃ પ્રવૃત્તઃ
સેનાપરાગ ઇવ તે પદવીપરાગઃ ॥ ૧૩.૧૭॥ ૩૬૭॥

ગઙ્ગાપગાતટલતાગૃહમાશ્રયન્ત્યાઃ
પાદાવનિ પ્રચલિતં પદવીરજસ્તે ।
પ્રાયેણ પાવનતમં પ્રણતસ્ય શમ્ભોર્-
ઉદ્ધૂલનં કિમપિ નૂતનમાતનોતિ ॥ ૧૩.૧૮॥ ૩૬૮॥

અન્તે તદા ત્વમવિલમ્બિતમાનયન્તી
રઙ્ગાદ્ભુજઙ્ગશયનં મણિપાદરક્ષે ।
કામં નિવર્તયિતુમર્હસિ સજ્જ્વરં મે
કર્પૂરચૂર્ણપટલૈરિવ ધૂલિભિસ્તે ॥ ૧૩.૧૯॥ ૩૬૯॥

રઙ્ગેશપાદસહધર્મચરિ ત્વદીયાન્
મૌલૌ નિવેશ્ય મહિતાન્પદવીપરાગાન્ ।
સન્તસ્ત્રિવર્ગપદવીમતિલઙ્ઘયન્તો
મૌલૌ પદં વિદધતે વિબુધેશ્વરાણામ્ ॥ ૧૩.૨૦॥ ૩૭૦॥

માતસ્તદા માધવપાદરક્ષે ત્વયિ પ્રસક્તં ત્વરયોપયાન્ત્યામ્ ।
પરામૃશેયં પદવીપરાગં પ્રાણૈઃ પ્રયાણાય સમુજ્જિહાનૈઃ ॥ ૧૩.૨૧॥ ૩૭૧॥

તથાગતા રાઘવપાદરક્ષે સમ્પશ્યમાનેષુ તપોધનેષુ ।
આસીદહલ્યા તવ પાંસુલેશૈરપાંસુલાનાં સ્વયમગ્રગણ્યા ॥ ૧૩.૨૨॥ ૩૭૨॥

પશ્યામિ પદ્મેક્ષણપાદરક્ષે ભવામ્બુધિં પાતુમિવ પ્રવૃત્તાન્ ।
ભક્તોપયાનત્વરયા ભવત્યાઃ પર્યસ્યમાનાન્પદવીપરાગાન્ ॥ ૧૩.૨૩॥ ૩૭૩॥

પઞ્ચાયુધી ભૂષણમેવ શૌરેર્યતસ્તવૈતે મણિપાદરક્ષે ।
વિતન્વતે વ્યાપ્તદિશઃ પરાગાઃ શાન્તોદયાઞ્છત્રુચમૂપરાગાન્ ॥ ૧૩.૨૪॥ ૩૭૪॥

પરિણતિમકઠોરાં પ્રાપ્તયા યત્પ્રભાવા-
દલભ શિલયા સ્વાન્ ગૌતમો ધર્મદારાન્ ।
પુનરુપજનિશઙ્કાવારકં પાદુકે ત-
ત્પ્રશમયતિ રજસ્તે રાગયોગં પ્રજાનામ્ ॥ ૧૩.૨૫॥ ૩૭૫॥

રજનિવિગમકાલે રામગાથાં પઠન્તઃ
કુશિકતનયમુખ્યાઃ પાદુકે ભાવયન્તે ।
ઉપલશકલસક્તૈસ્ત્વત્પરાગૈરકાણ્ડે
જનિતમુનિકલત્રાન્ દણ્ડકારણ્યભાગાન્ ॥ ૧૩.૨૬॥ ૩૭૬॥

શુભસરણિરજોભિઃ શોભયન્તી ધરિત્રીં
પરિણતિરમણીયાન્પ્રક્ષરન્તી પુમર્થાન્ ।
ભવસિ ભુવનવન્દ્યા પાદુકે રઙ્ગભર્તુઃ
શરણમુપગતાનાં શાશ્વતી કામધેનુઃ ॥ ૧૩.૨૭॥ ૩૭૭॥

પવનતરલિતસ્તે પાદુકે રઙ્ગભર્તુ-
ર્વિહરણસમયેષુ વ્યાપ્તવિશ્વઃ પરાગઃ ।
વિષમવિષયવર્ત્મવ્યાકુલાનામજસ્રં
વ્યપનયતિ જનાનાં વાસનારેણુજાલમ્ ॥ ૧૩.૨૮॥ ૩૭૮॥

નિષ્પ્રત્યૂહમુપાસિષીમહિ મુહુર્નિશ્શેષદોષચ્છિદો
નિત્યં રઙ્ગધુરન્ધરસ્ય નિગમસ્તોમાર્ચિતે પાદુકે ।
ધત્તે મૂર્ધભિરાદિપદ્મજનિતા તત્તાદૃશી સન્તતિ-
ર્યત્સઞ્ચારપવિત્રિતક્ષિતિરજઃપઙ્ક્તિં ચતુઃપઞ્ચષૈઃ ॥ ૧૩.૨૯॥ ૩૭૯॥

રજસા પરોરજસ્ત-ન્ન ખલુ ન લઙ્ઘ્યેત ભગવતોઽપિ પદમ્ ।
કિમુત હૃદયં મદીયં ભવતી યદિ નામ પાદુકે ન સ્યાત્ ॥ ૧૩.૩૦॥ ૩૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય

શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પરાગપદ્ધતિસ્ત્રયોદશી ॥

## ૧૪. નાદપદ્ધતિઃ (૧૦૦)

શ્રુતીનાં ભૂષણાનાં તે શઙ્કે રઙ્ગેન્દ્રપાદુકે ।
મિથઃ સઙ્ઘર્ષસઞ્જાતં રજઃ કિમપિ શિઞ્જિતમ્ ॥ ૧૪.૧॥ ૩૮૧॥

મુરભિન્મણિપાદુકે ભવત્યાઃ સ્તુતિમાકર્ણયતાં મયા નિબદ્ધામ્ ।
અવધીરયસીવ મઞ્જુનાદૈરચમત્કારવચાંસિ દુર્જનાનામ્ ॥ ૧૪.૨॥ ૩૮૨॥

વિહિતેષ્વભિવાદનેષુ વેદૈર્ગમનોદીરિતગર્ભરત્નનાદા ।
મધુરં મધુવૈરિપાદરક્ષે ભવતી પ્રત્યભિવાદનં વિધત્તે ॥ ૧૪.૩॥ ૩૮૩॥

સ્વદતે કિમિહૈવ રઙ્ગનાથો
    મયિ તિષ્ઠન્ યદિ વા પદે પરસ્મિન્ ।
ઇતિ પૃચ્છસિ દેવિ નૂનમસ્માન્
    મધુરૈસ્ત્વં મણિપાદુકે નિનાદૈઃ ॥ ૧૪.૪॥ ૩૮૪॥

અવરોધગતસ્ય રઙ્ગભર્તુર્ગુતિષુ વ્યઞ્જિતગર્ભરત્નનાદા ।
પ્રતિસઁલ્લપસીવ પાદુકે ત્વં કમલાનૂપુરમઞ્જુશિઞ્જિતાનામ્ ॥ ૧૪.૫॥ ૩૮૫॥

મુરભિચ્ચરણારવિન્દરૂપં મહિતાનન્દમવાપ્ય પૂરુષાર્થમ્ ।
અનઘૈર્મણિપાદુકે નિનાદૈરહમન્નાદ ઇતીવ ગાયસિ ત્વમ્ ॥ ૧૪.૬॥ ૩૮૬॥

મદુવૈરિપદામ્બુજં ભજન્તી મણિપાદાવનિ મઞ્જુશિઞ્જિતેન ।
પઠસીવ મુહુઃ સ્વયં પ્રજાનામપરોપઘ્નમરિષ્ટશાન્તિમન્ત્રમ્ ॥ ૧૪.૭॥ ૩૮૭॥

શ્રુતિભિઃ પરમં પદં મુરારેરનિદહ્કારમનેવમિત્યુપાત્તમ્ ।
ઇદમિત્થમિતિ બ્રવીષિ નૂનં મણિપાદાવનિ મઞ્જુભિઃ પ્રણાદૈઃ ॥ ૧૪.૮॥ ૩૮૮॥

મુનયઃ પ્રણિધાનસન્નિરુદ્ધે હૃદિ રઙ્ગેશ્વરરત્નપાદુકે ત્વામ્ ।
વિનિવેશ્ય વિભાવયન્ત્યનન્યાઃ પ્રણવસ્ય પ્રણિધિં તવ પ્રણાદમ્ ॥ ૧૪.૯॥ ૩૮૯॥

મધુરં મણિપાદુકે પ્રવૃત્તે ભવતી રઙ્ગપતેર્વિહારકાલે ।
અભયાર્થનયા સમભ્યુપેતાનવિસંવાદયતીવ મઞ્જુનાદૈઃ ॥ ૧૪.૧૦॥ ૩૯૦॥

શ્રવસોર્મમ પારણાં દિશન્તી મણિપાદાવનિ મઞ્જુલૈઃ પ્રણાદૈઃ ।
રમયા ક્ષમયા ચ દત્તહસ્તં સમયે રઙધુરીણમાનયેથાઃ ॥ ૧૪.૧૧॥ ૩૯૧॥

અનુયાતિ નિત્યમમૃતાત્મિકાં કલાં
    તવ રઙ્ગચન્દ્રમણિપાદુ ઝઙ્કૃતમ્ ।
શ્રવસા મુખેન પરિભુજ્ય યત્ક્ષણા-
    દજરામરત્વમુપયાન્તિ સાધવઃ ॥ ૧૪.૧૨॥ ૩૯૨॥

પરુષૈરજસ્રમસતામનર્થકૈઃ પરિવાદપૈશુનવિકત્થનાદિભિઃ ।
મધુકૈટભારિમણિપાદુકે મમ શ્રુતિદુષ્કૃતાનિ
        વિનિવારય સ્વનૈઃ ॥ ૧૪.૧૩॥ ૩૯૩॥

પાદુકે પરિજનસ્ય દૂરતઃ સૂચયન્તિ ખલુ તાવકાઃ સ્વનાઃ ।
લીલયા ભુજગતલ્પમુજ્જ◌ તઃ શ્રીમતસ્ત્રિચતુરાન્પદક્રમાન્ ॥ ૧૪.૧૪॥ ૩૯૪॥

દેવિ દૈત્યદમનાય સત્વરં પ્રસ્થિતસ્ય મણિપાદુકે પ્રભોઃ ।
વિશ્વમઙ્ગલવિશેષસૂચકં શાકુનં ભવતિ તાવકં રુતમ્ ॥ ૧૪.૧૫॥ ૩૯૫॥

દાતુમર્હસિ તદા મમ શ્રુતૌ દેવિ રઙ્ગપતિરત્નપાદુકે ।
વિહ્વલસ્ય ભવદીયશિઞ્જિતં સ્વાદુકર્ણરસનારસાયનમ્ ॥ ૧૪.૧૬॥ ૩૯૬॥

અહમુપરિસમસ્તદેવતાનામુપરિ મમૈષ વિભાતિ વાસુદેવઃ ।
તદિહ પરતરં ન કિઞ્ચિદસ્માદિતિ વદસીવ પદાવનિ પ્રણાદૈઃ ॥ ૧૪.૧૭॥ ૩૯૭॥

અવનતવિબુધેન્દ્રમૌલિમાલામ-
    ધુમદશિક્ષિતમન્થરપ્રયાતા ।
પ્રથયસિ પરિરબ્ધશૌરિપાદા
    મણિકલહેન વિયાતજલ્પિતાનિ ॥ ૧૪.૧૮॥ ૩૯૮॥

આસ્થાનેષુ ત્રિદશમહિતાન્ વર્તયિત્વા વિહારાન્
    સ્થાને સ્થાને નિજપરિજનં વારયિત્વા યથાર્હમ્ ।
વાસાગારં સ્વયમુપસરન્પાદુકે મઞ્જુનાદા-
    માપર્યઙ્કાન્ન ખલુ ભવતીં રઙ્ગનાથો જહાતિ ॥ ૧૪.૧૯॥ ૩૯૯॥

અન્તર્ન્યસ્તૈર્મણિભિરુદિતં પાદુકે રઙ્ગબન્ધૌ
    મન્દં મન્દં નિહિતચરણે મઞ્જુલં તે નિનાદમ્ ।
પશ્યન્ત્યાદિક્રમપરિણતેઃ પ્રાક્તનીં તાં પરાયા
    મન્યે મિત્રાવરુણવિષયાદુચ્ચરન્તીમવસ્થામ્ ॥ ૧૪.૨૦॥ ૪૦૦॥

પ્રખ્યાતાનાં પરિષદિ સતાં કારયિત્વા પ્રતિજ્ઞાં
    પ્રાયેણ ત્વાં પ્રથિતવિભવાં વર્ણયન્તી મયા ત્વમ્ ।

પાદન્યાસક્રમમનુગુણં પ્રાપ્ય રઙ્ગાધિરાજા-
    ત્પધારમ્ભાન્ ગણયસિ પરં પાદુકે સ્વૈર્નિનાદૈઃ ॥ ૧૪.૨૧॥ ૪૦૧॥

વિષ્ણોરસ્મિન્પદસરસિજે વૃત્તિભેદૈર્વિચિત્રૈ-
    રૈદમ્પર્યં નિગમવચસામૈકકણ્ઠ્યેન સિદ્ધમ્ ।
ઇત્થં પુંસામનિપુણધિયાં પાદુકે ત્વં તદેવ
    સ્પૃષ્ટ્વા સત્યં વદસિ નિયતં મઞ્જુના શિઞ્જિતેન ॥ ૧૪.૨૨॥ ૪૦૨॥

આમ્નાયૈસ્ત્વામનિતરપરૈઃ સ્તોતુમભ્યુદ્યતાનાં
    મધ્યે ભક્ત્યા મધુવિજયિનઃ પાદુકે મોહભાજામ્ ।
શિક્ષાતત્ત્વસ્ખલિતવચસાં શિક્ષયસ્યેવ પુંસાં
    માત્રાદીનિ સ્વયમનુપદં મઞ્જુભિઃ સ્વૈર્નિનાદૈઃ ॥ ૧૪.૨૩॥ ૪૦૩॥

લક્ષ્મીકાન્તં કમપિ તરુણં રથ્યયા નિષ્પતન્તં
    રાગાદ્ દ્રષ્ટું ત્વરિતમનસાં રાજધાનીવધૂનામ્ ।
પ્રત્યાદેશં ભજતિ મધુરૈઃ પાદુકે શિઞ્જિતૈસ્તે
    ચેતોહારી કુસુમધનુષઃ શિંઞ્જિનીમઞ્જુનાદઃ ॥ ૧૪.૨૪॥ ૪૦૪॥

રઙ્ગાધીશે સહ કમલયા સાદરં યાયજૂકૈઃ
    સારં દિવ્યં સવનહવિષાં ભોક્તુમાહૂયમાને ।
નેદીયોભિર્નિગમવચસાં નિત્યમંહઃપ્રતીપૈઃ
    પ્રત્યાલાપં દિશતિ ભવતી પાદુકે શિઞ્જિતૈઃ સ્વૈઃ ॥ ૧૪.૨૫॥ ૪૦૫॥

ઉપાસ્ય નૂનં મણિપાદુકે ત્વાં રઙ્ગેશપાદામ્બુજરાજહંસીમ્ ।
પત્યુઃ પ્રજાનામલભન્ત પૂર્વં મઞ્જુસ્વનં વાહનરાજહંસાઃ ॥ ૧૪.૨૬॥ ૪૦૬॥

અનાદિમાયારજનીવશેન પ્રસ્વાપભાજાં પ્રતિબોધનાર્હામ્ ।
પશ્યામિ નિત્યોદિતવાસરસ્ય પ્રભાતનાન્દીમિવ પાદુકે ત્વામ્ ॥ ૧૪.૨૭॥ ૪૦૭॥

શ ૃણોતુ રઙ્ગાધિપતિઃ પ્રજાનામાર્તધ્વનિં ક્વાપિ સમુજ્જિહાનમ્ ।
ઇતીવ મત્વા મણિપાદુકે ત્વં મન્દપ્રચારૈર્મૃદુશિઞ્જિતાઽસિ ॥ ૧૪.૨૮॥ ૪૦૮॥

અન્તે મમાર્તિં શમયિષ્યતસ્તામગ્રેસરાણ્યાપતતો મુરારેઃ ।
શ્રમોપપન્નઃ શ ૃણુયાં ભવત્યાઃ શીતાનિ પાદાવનિ શિઞ્જિતાનિ ॥ ૧૪.૨૯॥ ૪૦૯॥

સ્વાદૂનિ રઙ્ગેશ્વરપાદરક્ષે શ્રોત્રૈઃ પિબન્તસ્તવ શિઞ્જિતાનિ ।
પચન્ત્યવિદ્યોપચિતાનશેષાન્તર્ગતાનાત્મવિદઃ કષાયાન્ ॥ ૧૪.૩૦॥ ૪૧૦॥

અવૈમિ રઙ્ગાધિપતેઃ સકાશાદવેક્ષમાણેષુ જનેષુ રક્ષામ્ ।

ઉદારનાદાં મણિપાદુકે ત્વામોમિત્યનુજ્ઞાક્ષરમુદ્ગિરન્તીમ્ ॥ ૧૪.૩૧॥ ૪૧૧॥

મધુદ્વિષઃ સ્વૈરવિહારહેતુર્મઞ્જુસ્વનાન્ શિક્ષયસીવ માતઃ ।
પર્યન્તભાજોર્મણિપાદરક્ષે પદ્માધરણ્યોર્મણિનૂપુરાણિ ॥ ૧૪.૩૨॥ ૪૧૨॥

પ્રાસ્થાનિકેષુ સમયેષુ સમાગતેષુ
    પ્રાપ્તા પદં પરિચિતં દ્વિજપુઙ્ગવેન ।
પુષ્ણાસિ રઙ્ગનૃપતેર્મણિપાદુકે ત્વં
    પુણ્યાહઘોષમિવ ગર્ભમણિપ્રણાદૈઃ ॥ ૧૪.૩૩॥ ૪૧૩॥

આર્તધ્વનેરુચિતમુત્તરમન્તકાલે
    કર્ણેષુ મઞ્જુનિનદેન કરિષ્યસીતિ ।
વાસં ભજન્તિ કૃતિનો મણિપાદરક્ષે
    પુણ્યેષુ દેવિ પુલિનેષુ મરુદ્વૃધાયાઃ ॥ ૧૪.૩૪॥ ૪૧૪॥

દૂત્યે બલેર્વિમથને શકટસ્ય ભઙ્ગે
    યાત્રોત્સવેષુ ચ વિભોઃ પ્રતિપન્નસખ્યા ।
વીરાયિતાનિ બિરુદોપહિતાનિ નૂનં
    મઞ્જુસ્વનૈઃ પ્રથયસે મણિપાદુકે ત્વમ્ ॥ ૧૪.૩૫॥ ૪૧૫॥

સ્તોતું પ્રવૃત્તમપિ માં નિગમસ્તુતાં ત્વાં
    વ્યાસજ્યમાનકરણં વિષયેષ્વજસ્રમ્ ।
અન્તર્મણિધ્વનિભિરચ્યુતપાદુકે ત્વં
    સમ્બોધયસ્યનુકલં સહજાનુકમ્પા ॥ ૧૪.૩૬॥ ૪૧૬॥

દેવસ્ય દાનવરિપોર્મણિપાદરક્ષે
    પ્રસ્થાનમઙ્ગલવિધૌ પ્રતિપન્નનાદામ્ ।
મા ભૈષ્ટ સાધવ ઇતિ સ્વયમાલપન્તીં
    જાને જગત્રિતયરક્ષણદીક્ષિતાં ત્વામ્ ॥ ૧૪.૩૭॥ ૪૧૭॥

સ્વચ્છન્દવિભ્રમગતૌ મણિપાદુકે ત્વં
    પાદારવિન્દમધિગમ્ય પરસ્ય પુંસઃ ।
જાતસ્વના પ્રતિપદં જપસીવ સૂક્તં
    વિદ્રાવણં કિમપિ વૈરિવરૂથિનીનામ્ ॥ ૧૪.૩૮॥ ૪૧૮॥

રક્ષાર્થમાશ્રિતજનસ્ય સમુજ્જિહાને
    રઙ્ગેશ્વરે શરદિ શેષભુજઙ્ગતલ્પાત્ ।

નાદાસ્તવ શ્રુતિસુખા મણિપાદરક્ષે
    પ્રસ્થાનશઙ્ખનિનદાત્પ્રથમે ભવન્તિ ॥ ૧૪.૩૯॥ ૪૧૯॥

નિત્યં પદામ્બુરુહયોરિહ ગોપિકાં ત્વાં
    ગોપીજનપ્રિયતમો મણિપાદરક્ષે ।
સમ્બન્નઘોષવિભવાં ગતિભિર્નિજાભિઃ
    પ્રીત્યૈવ ન ત્યજતિ રઙ્ગસમાશ્રિતોઽપિ ॥ ૧૪.૪૦॥ ૪૨૦॥

પ્રાયઃ પદાવનિ વિભોઃ પ્રણતાર્તિહન્તુઃ
    પ્રસ્થાનમઙ્ગલવિધૌ પ્રથમોદ્યતાનિ ।
ત્વચ્છિઞ્જિતાનિ સપદિ સ્વયમારભન્તે
    કાલોચિતાન્ કનકકાહલશઙ્ગનાદાન્ ॥ ૧૪.૪૧॥ ૪૨૧॥

આમ્રેડિતશ્રુતિગણૈર્નિનદૈર્મણીના-
    મામ્નાયવેદ્યમનુભાવમભઙ્ગુરં તે ।
ઉદ્ગાસ્યતાં નિયતમિચ્છસિ સામગાનાં
    તાનપ્રદાનમિવ શૌરિપદાવનિ ત્વમ્ ॥ ૧૪.૪૨॥ ૪૨૨॥

રથ્યાસુ રઙ્ગનૃપતેર્મણિપાદરક્ષે
    ત્વદ્ગર્ભરત્નજનિતો મધુરઃ પ્રણાદઃ ।
સન્દર્શનોત્સુકધિયાં પુરસુન્દરીણાં
    સમ્પદ્યતે શ્રવણમોહનમન્ત્રઘોષઃ ॥ ૧૪.૪૩॥ ૪૨૩॥

આકસ્મિકેષુ સમયેષ્વપવાર્ય ભૃત્યા-
    નન્તઃપુરં વિશતિ રઙ્ગપતૌ સલીલમ્ ।
વ્યામોહનેન ભવતી સુદૃશામધીતે
    મઞ્જુસ્વનેન મદનોપનિષદ્રહસ્યમ્ ॥ ૧૪.૪૪॥ ૪૨૪॥

યાત્રાવિહારસમયેષુ સમુત્થિતં તે
    રઙ્ગાધિપસ્ય ચરણાવનિ મઞ્જુનાદમ્ ।
પર્યાકુલેન્દ્રિયમૃગગ્રહણાય પુંસાં
    સમ્મોહનં શબરગીતમિવ પ્રતીમઃ ॥ ૧૪.૪૫॥ ૪૨૫॥

પ્રાયેણ સહ્યદુહિતર્નદરાજકન્યા
    જામાતુરાગમનસૂચનમીહમાના ।
મઞ્જુપ્રણાદસુભગૈર્મણિપાદુકે ત્વા-
    મન્તર્યુતામકૃત યૌતકરત્નખણ્ડૈઃ ॥ ૧૪.૪૬॥ ૪૨૬॥

નિત્યં વિહારસમયે નિગમાનુયાતૈઃ-
    ર્વિક્ષેપતાણ્ડવિતગર્ભમણિપ્રસૂતૈઃ ।
નાદૈઃ સ્વયં નરકમર્દનપાદરક્ષે
    નાદાવસાનનિલયં વદસીવ નાથમ્ ॥ ૧૪.૪૭॥ ૪૨૭॥

સાધારણેષુ યુવયોર્મણિપાદરક્ષે
    દેવસ્ય દાનવરિપોસ્ત્રિષુ વિક્રમેષુ ।
અદ્યાપિ શિઞ્જિતમિષાદનુવર્તમાનં
    ન્યૂનાધિકત્વવિષયં કલહં પ્રતીમઃ ॥ ૧૪.૪૮॥ ૪૨૮॥

પ્રાયઃ પદાવનિ વિભોઃ પ્રણયાપરાધે
    માનગ્રહં શમયિતું મહિષીજનાનામ્ ।
ઉચ્ચારયન્તિ નિનદૈસ્તવ ગર્ભરત્ના-
    ન્યુદ્ઘાતમક્ષરમુપાશ્રયભારતીનામ્ ॥ ૧૪.૪૯॥ ૪૨૯॥

અન્તશ્ચરેષુ પવનેષુ જિતેષ્વભિજ્ઞાઃ
    પ્રત્યઙ્મુખીં પરિણમય્ય મનઃપ્રવૃત્તિમ્ ।
આસ્વાદયન્તિ સરસં મણિપાદરક્ષે
    નાદાવસાનસમયે ભવતીનિનાદમ્ ॥ ૧૪.૫૦॥ ૪૩૦॥

દાક્ષિણ્યમત્ર નિયતં નિયતા સુધાઽસ્મિ-
    ન્નિત્યુદ્ગતો નિયતમચ્યુતપાદરક્ષે ।
પ્રત્યેકસંશ્રિતપદસ્તુતયે ભવત્યોઃ
    સઙ્ઘર્ષવાદ ઇવ મધ્યમણિપ્રણાદઃ ॥ ૧૪.૫૧॥ ૪૩૧॥

સઞ્ચારકેલિકલહાયિતગર્ભરત્ના
    સાંસિદ્ધિકં સકલજન્તુષુ સાર્વભૌમમ્ ।
રક્ષાર્થિનાં પ્રથયસીવ પદાવનિ ત્વં
    રઙ્ગેશ્વરસ્ય નિરવગ્રહમાનૃશંસ્યમ્ ॥ ૧૪.૫૨॥ ૪૩૨॥

પ્રાપ્તું પરં પુરિશયં પુરુષં મુનીના-
    મભ્યસ્યતામનુદિનં પ્રણવં ત્રિમાત્રમ્ ।
શ્રીરઙ્ગરાજચરણાવનિ શિઞ્જિતં તે
    શઙ્કે સમુન્નયનસામવિશેષઘોષમ્ ॥ ૧૪.૫૩॥ ૪૩૩॥

નિત્યં સમાહિતધિયામુપન્દર્શયન્તી

નાગેશયં કિમપિ ધામ નિજોર્ધ્વભાગે ।
હૃત્કર્ણિકામનુગતા મણિપાદુકે ત્વં
મઞ્જુસ્વના સ્ફુરસિ વાગ્ભ્રમરી પરેવ ॥ ૧૪.૫૪॥ ૪૩૪॥

માનેષુ દાનવરિપોર્મણિપાદરક્ષે
ત્વામાશ્રિતેષુ નિગમેષ્વવધીરિતેષુ ।
મઞ્જુસ્વનૈર્વદસિ મૈવમિતીવ માત-
ર્વેલાં લિલઙ્ઘયિષતો મનુજાન્નિરોદ્ધુમ્ ॥ ૧૪.૫૫॥ ૪૩૫॥

ક્રન્દત્સુ કાતરતયા કરણવ્યપાયે
રઙ્ગોપશલ્યશયિતેષુ જનેષ્વલક્ષ્યમ્ ।
આસીદસિ ત્વરિતમસ્ખલિતાનુકમ્પા
માતેવ મઞ્જુનિનદા મણિપાદ્કે ત્વમ્ ॥ ૧૪.૫૬॥ ૪૩૬॥

ભાસ્વત્સુવર્ણવપુષાં મણિપાદરક્ષે
પદ્માસહાયપદપદ્મવિભૂષણાનામ્ ।
મઞ્જીરશિઞ્જિતવિકલ્પિતમઞ્જુનાદા
મઞ્જૂષિકેવ ભવતી નિગમાન્તવાચામ્ ॥ ૧૪.૫૭॥ ૪૩૭॥

રઙ્ગેશપાદકમલાત્ ત્વદધીનવૃત્તે-
રન્યેષુ કેષુચિદલક્ષ્યમનન્યવેદ્યમ્ ।
આમ્નાયગૂઢમબહિર્મણિભિઃ ક્વણદ્ભિ-
ર્નેદીયસાં પ્રથયસીવ નિજાનુભાવમ્ ॥ ૧૪.૫૮॥ ૪૩૮॥

કાલોપપન્નકરણાત્યયનિર્વિચેષ્ટે
જાતશ્રમે મયિ જનાર્દનપાદરક્ષે ।
આશ્વાસનાય પુરતઃ પ્રસરન્તુ માત-
ર્વાર્તાહરાસ્તવ રવાઃ શમિતાર્તયો મે ॥ ૧૪.૫૯॥ ૪૩૯॥

સંરક્ષણાય સમયે જગતાં ત્રયાણાં
યાત્રાસુ રઙ્ગનૃપતેરુપતસ્થુષીષુ ।
સમ્પત્સ્યતે શ્રુતિસુખૈર્મણિપાદરક્ષે
મઙ્ગલ્યસૂક્તિરનઘા તવ મઞ્જુનાદૈઃ ॥ ૧૪.૬૦॥ ૪૪૦॥

ગર્ભોપલૈર્ગમનવેગવશાદ્વિલોલૈ-
ર્વાચાલિતા મધુભિદો મણિપાદુકે ત્વમ્ ।
પ્રસ્તૌષિ ભાવિતધિયાં પથિ દેવયાને

પ્રસ્થાનમઙ્ગલમૃદઙ્ગવિશેષઘોષમ્ ॥ ૧૪.૬૧॥ ૪૪૧॥

પર્યઙ્કમાશ્રિતવતો મણિપાદુકે ત્વં
પાદં વિહાય પરિકલ્પિતમૌનમુદ્રા ।
શ્રોતું પ્રભોરવસરં દિશસીવ માત-
ર્નાભીસરોજશયિતાર્ભકસામગીતિમ્ ॥ ૧૪.૬૨॥ ૪૪૨॥

ભોગાય દેવિ ભવતી મણિપાદરક્ષે
પદ્માસહાયમધિરોપ્ય ભુજઙ્ગતલ્પે ।
વિશ્વસ્ય ગુપ્તિમધિકૃત્ય વિહારહીના
વાચંયમા કિમપિ ચિન્તયતીવ કાર્યમ્ ॥ ૧૪.૬૩॥ ૪૪૩॥

નિત્યપ્રબોધસુભગે પુરુષે પરસ્મિન્
નિદ્રામુપેયુષિ તદેકવિહારશીલા ।
મઞ્જુસ્વનં વિજહતી મણિપાદુકે ત્વં
સંવેશમિચ્છસિ પરં ચરણાન્તિકસ્થા ॥ ૧૪.૬૪॥ ૪૪૪॥

લાસ્યં વિહાય કિમપિ સ્થિતમાશ્રયન્તી
રઙ્ગેશ્વરેણ સહિતા મણિમણ્ડપેષુ ।
મઞ્જુસ્વનેષુ વિરતેષ્વપિ વિશ્વમેત-
ન્મૌનેન હન્ત ભવતી મુખરીકરોતિ ॥ ૧૪.૬૫॥ ૪૪૫॥

વિસ્માપિતેવ ભવતી મણિપાદરક્ષે
વૈરોચનેર્વિતરણેન તથાવિધેન ।
એતાવતાઽલમિતિ દેવિ ગૃહીતપાદા
નાથં ત્રિવિક્રમમવારયતેવ નાદૈઃ ॥ ૧૪.૬૬॥ ૪૪૬॥

સામાનિ રઙ્ગનૃપતિઃ સરસં ચ ગીતં
લીલાગતેષુ વિનિવારયતિ સ્વતન્ત્રઃ ।
શ્રોતું તવ શ્રુતિસુખાનિ વિશેષવેદી
મઞ્જૂનિ કાઞ્ચનપદાવનિ શિઞ્જિતાનિ ॥ ૧૪.૬૭॥ ૪૪૭॥

તત્તાદૃશીં પ્રથયતા રુચિરાં સ્વરેખાં
વર્ણાધિકેન મધુસૂદનપાદરક્ષે ।
પશ્યન્તિ ચિત્તનિકષે વિનિવેશ્ય સન્તો
મઞ્જુસ્વનેન તવ નૈગમિકં સુવર્ણમ્ ॥ ૧૪.૬૮॥ ૪૪૮॥

મુગ્ધસ્ય હન્ત ભવતીં સ્તુવતો મમૈતા-
ન્યાકર્ણ્ય નૂનમયથાયથ જલ્પિતાનિ ।
ઇત્થં વદ ત્વમિતિ શિક્ષયિતું પ્રણાદાન્
મઞ્જૂનુદીરયસિ માધવપાદુકે ત્વમ્ ॥ ૧૪.૬૯॥ ૪૪૯॥

આદૌ સહસ્રમિતિ યત્સહસા મયોક્તં
તૃષ્ટૂષતા નિરવધિં મહિમાર્ણવં તે ।
આમ્રેડયસ્યથ કિમેતદમૃષ્યમાણા
મઞ્જુસ્વનેન મધુજિન્મણિપાદુકે ત્વમ્ ॥ ૧૪.૭૦॥ ૪૫૦॥

પરિમિતપરિબર્હં પાદુકે સઞ્ચરિષ્ણૌ
ત્વયિ વિનિહિતપાદે લીલયા રઙ્ગનાથે ।
નિયમયતિ વિપઞ્ચીં નિત્યમેકાન્તસેવી
નિશમયિતુમુદારાન્નારદસ્તે નિનાદાન્ ॥ ૧૪.૭૧॥ ૪૫૧॥

વિહરતિ વિશિખાયાં રઙ્ગનાથે સલીલં
ગમનવશવિલોલૈર્ગર્ભરત્નૈઃ ક્વણન્ત્યાઃ ।
મણિવલયનિનાદૈર્મઞ્જુલૈસ્તે દિશન્તિ
પ્રતિવચનમુદારં પાદુકે પૌરનાર્યઃ ॥ ૧૪.૭૨॥ ૪૫૨॥

અનુકૃતસવનીયસ્તોત્રશસ્ત્રાં નિનાદૈ-
રનુગતનિગમાં ત્વામાસ્થિતો રઙ્ગનાથઃ ।
અનિતરવિબુધાર્હં હવ્યમાસ્વાદયિષ્યન્
વિશતિ ચરણરક્ષે યજ્ઞવાટં દ્વિજાનામ્ ॥ ૧૪.૭૩॥ ૪૫૩॥

ચરણકમલમેતદ્રઙ્ગનાથસ્ય નિત્યં
શરણમિતિ જનાનાં દર્શયન્તી યથાવત્ ।
પ્રતિપદમપિ હૃદ્યં પાદુકે સ્વાદુભાવા-
દનુવદતિ પરં તે નાદમામ્નાયપઙ્ક્તિઃ ॥ ૧૪.૭૪॥ ૪૫૪॥

રહિતભુજગતલ્પે ત્વત્સનાથે પ્રજાનાં
પ્રતિભયશમનાય પ્રસ્થિતે રઙ્ગનાથે ।
પ્રથમમુદયમાનઃ પાદુકે તૂર્યઘોષા-
ત્પ્રતિફલતિ નિનાદઃ પાઞ્ચાજન્યે ત્વદીયઃ ॥ ૧૪.૭૫॥ ૪૫૫॥

વકુલધરતનુસ્ત્વં સંહિતાં યામપશ્યઃ
શ્રુતિપરિષદિ તસ્યાઃ સૌરભં યોજયન્તિ ।

હરિચરણસરોજામોદસમ્મોદિતાયાઃ
    પ્રતિપદરમણીયાઃ પાદુકે તે નિનાદાઃ ॥ ૧૪.૭૬॥ ૪૫૬॥

દનુતનયનિહન્તુર્જૈત્રયાત્રાનુકૂલે
    શરદુપગમકાલે સહ્યજામાપતન્તિ ।
શ્રુતિમધુરમુદારં શિક્ષિતું તે નિનાદં
    પરિહૃતનિજવાસાઃ પાદુકે રાજહંસાઃ ॥ ૧૪.૭૭॥ ૪૫૭॥

વિહરણસમયેષુ પ્રત્યહં રઙ્ગભર્તુ-
    શ્ચરણનખમયૂખૈઃ સોત્તરીયા વિશુદ્ધૈઃ ।
પરિણમયસિ નાદં પાદુકે ગર્ભરત્નૈ-
    ર્દમયિતુમિવ શિષ્યાન્ દીર્ઘિકારાજહંસાન્ ॥ ૧૪.૭૮॥ ૪૫૮॥

પરિષદિ વિરતાયાં પાદુકે રઙ્ગભર્તુઃ
    પરિજનમપવાર્ય પ્રસ્થિતસ્યાવરોધાન્ ।
મણિનિકરસમુદ્યન્મઞ્જુનાદાપદેશા-
    દભિલપસિ યથાર્હં નૂનમાલોકશબ્દમ્ ॥ ૧૪.૭૯॥ ૪૫૯॥

ગુરુજનનિયતં તદ્ગોપિકાનાં સહસ્રં
    દિનકરતનયાયાઃ સૈકતે દિવ્યગોપઃ ।
વશમનયદયત્નાદ્વંશનાદાનુયાતૈ-
    સ્તવ ખલુ પદરક્ષે તાદૃશૈર્મઞ્જુનાદૈઃ ॥ ૧૪.૮૦॥ ૪૬૦॥

નિજપદવિનિવેશાન્નિર્વિશેષપ્રચારાન્
    પરિણમયતિ ભક્તાન્ રઙ્ગનાથો યથા મામ્ ।
ઇતિ વિહરણકાલે મઞ્જુશિઞ્જાવિશેષૈ-
    ર્હિતમુપદિશસીવ પ્રાણિનાં પાદુકે ત્વમ્ ॥ ૧૪.૮૧॥ ૪૬૧॥

અયમયમિતિ તૈસ્તૈઃ કલ્પિતાનધ્વભેદાન્
    પ્રતિપદમવલોક્ય પ્રાણિનાં વ્યાકુલાનામ્ ।
ચટુલમણિકલાપૈઃ શૌરિપાદાવનિ ત્વં
    મુખરયસિ વિહારૈર્મુક્તિઘણ્ટાપથાગ્ર્યમ્ ॥ ૧૪.૮૨॥ ૪૬૨॥

પદકમલમુદારં દર્શયન્તી મુરારેઃ
    કલમધુરનિનાદા ગર્ભરત્નૈર્વિલોલૈઃ ।
વિષમવિષયતૃષ્ણાવ્યાકુલાનિ પ્રજાના-
    મભિમુખયસિ નૂનં પાદુકે માનસાનિ ॥ ૧૪.૮૩॥ ૪૬૩॥

મધુરિપુપદરક્ષે મન્દબુદ્ધૌ મયિ ત્વા-
　　મનવધિમહિમાનં ત્વત્પ્રસાદાત્ સ્તુવાને ।
મણિનિકરસમુત્થૈર્મઞ્જુનાદૈઃ કવીના-
　　મુપરમયસિ તાંસ્તાન્નૂનમુત્સેકવાદાન્ ॥ ૧૪.૮૪॥ ૪૬૪॥

શરણમુપગતે ત્વાં શાર્ઙ્ગિણઃ પાદરક્ષે
　　સકૃદિતિ વિધિસિદ્ધં ત્યક્તુકામે વિમોહાત્ ।
પ્રચલિતમણિજાલવ્યઞ્જિતૈઃ શિઞ્જિતૈઃ સ્વૈ-
　　રલમલમિતિ નૂનં વારયસ્યાદરેણ ॥ ૧૪.૮૫॥ ૪૬૫॥

વિકલકરણવૃત્તૌ વિહ્વલાઙ્ગે વિલક્ષં
　　વિલપતિ મયિ મોહાદ્બિભ્રતી શૌરિપાદમ્ ।
પરિસરમધિગન્તું પશ્ય પાદાવનિ ત્વં
　　પ્રતિભયમખિલં મે ભર્ત્સયન્તી નિનાદૈઃ ॥ ૧૪.૮૬॥ ૪૬૬॥

કરણવિગમકાલે કાલહુઙ્કારશઙ્કી
　　દ્રુતપદમુપગચ્છન્ દત્તહસ્તઃ પ્રિયાભ્યામ્ ।
પરિણમયતુ કર્ણે રઙ્ગનાથઃ સ્વયં નઃ
　　પ્રણવમિવ ભવત્યાઃ પાદુકે મઞ્જુનાદમ્ ॥ ૧૪.૮૭॥ ૪૬૭॥

કમલવનસખીં તાં કૌમુદીમુદ્વહન્તં
　　સવિધમુપનયન્તી તાદૃશં રઙ્ગચન્દ્રમ્ ।
પ્રલયદિનસમુત્થાન્પાદુકે મામકીનાન્
　　પ્રશમય પરિતાપાન્ શીતલૈઃ શિઞ્જિતૈઃ સ્વૈઃ ॥ ૧૪.૮૮॥ ૪૬૮॥

પ્રશમયતુ ભયં નઃ પશ્ચિમશ્વાસકાલે
　　રહસિ વિહરણં તે રઙ્ગનાથેન સાર્ધમ્ ।
નિયતમનુવિધત્તે પાદુકે યન્નિનાદો
　　નિખિલભુવનરક્શાઘોષણાઘોષલીલામ્ ॥ ૧૪.૮૯॥ ૪૬૯॥

ત્રિકવિનિહિતહસ્તં ચિન્તયિત્વા કૃતાન્તં
　　ગતવતિ હૃદિ મોહં ગચ્છતા જીવિતેન ।
પરિકલયતુ બોધં પાદુકે શિઞ્જિતં તે
　　ત્વરયિતુમિવ સજ્જં ત્વદ્વિધેયં મુકુન્દમ્ ॥ ૧૪.૯૦॥ ૪૭૦॥

ઉપઘ્નં સંવિત્તેરુપનિષદુપોદ્ઘાતવચનં

તવ શ્રાવં શ્રાવં શ્રુતિસુભગમન્તર્મણિરવમ્ ।
વિજૃમ્ભન્તે નૂનં મધુમથનપાદાવનિ મમ
દ્રવીભૂતદ્રાક્ષામધુરિમધુરીણાઃ ફણિતયઃ ॥ ૧૪.૯૧॥ ૪૭૧॥

વિલાસૈઃ ક્રીણન્તો નિખિલજનચેતાંસિ વિવિધા
વિહારાસ્તે રઙ્ગક્ષિતિરમણપાદાવનિ મુહુઃ ।
વિગાહન્તામન્તર્મમ વિલુઠદન્તર્મણિશિલા-
ખલાત્કારવ્યાજક્ષરદમૃતધારાધમનયઃ ॥ ૧૪.૯૨॥ ૪૭૨॥

શ્રુતિશ્રેણીસ્થેયશ્રુતિસુભગશિઞ્જામુખરિતાં
ભજેમ ત્વાં પદ્મારમણચરણત્રાયિણિ પરમ્ ।
ન મુદ્રાનિદ્રાણદ્રવિણકણવિશ્રાણનદશા-
વિશાલાહઙ્કારં કમપિ ઘનહુઙ્કારપરુષમ્ ॥ ૧૪.૯૩॥ ૪૭૩॥

તવૈતચ્છ્રીરઙ્ગક્ષિતિપતિપદત્રાયિણિ નૃણાં
ભવત્યાગશ્ચિન્તારણરણકભઙ્ગાય રણિતમ્ ।
શરીરે સ્વં ભાવં પ્રથયતિ યદાકર્ણનવશા-
ન્ન નઃ કર્ણે ભાવી યમમહિષઘન્ટાઘણઘણઃ ॥ ૧૪.૯૪॥ ૪૭૪॥

પરિત્રસ્તાઃ પુણ્યદ્રવપતનવેગાત્પ્રથમતઃ
ક્ષરદ્ભિઃ શ્રીરઙ્ગક્ષિતિરમણપાદાવનિ તદા ।
વિદામાસુર્દેવા બલિમથનસંરમ્ભમનઘૈઃ
પ્રણાદૈસ્તે સદ્યઃ પદકમલવિક્રાન્તિપિશુનૈઃ ॥ ૧૪.૯૫॥ ૪૭૫॥

સ્વેષુ સ્વેષુ પદેષુ કિં નિયમયસ્યષ્ટૌ દિશામીશ્વરાન્
સ્વૈરાલાપકથાઃ પ્રવર્તયસિ કિં ત્રય્યા સહાસીનયા ।
રઙ્ગેશસ્ય સમસ્તલોકમહિતં પ્રાપ્તા પદામ્ભોરુહં
મા ભૈષીરિતિ મામુદીરયસિ વા મઞ્જુસ્વનૈઃ પાદુકે ॥ ૧૪.૯૬॥ ૪૭૬॥

રઙ્ગે દેવિ રથાઙ્ગપાણિચરણસ્વચ્છન્દલીલાસખિ
સ્તોકસ્પન્દિતરમ્યવિભ્રમગતિપ્રસ્તાવકં તાવકમ્ ।
કાલોપાગતકાલકિઙ્કરચમૂહુઙ્કારપારમ્પરી-
દુર્વારપ્રતિવાવદૂકમનઘં શ્રોષ્યામિ શિઞ્જારવમ્ ॥ ૧૪.૯૭॥ ૪૭૭॥

ત્વચ્છિઞ્જારવશર્કરારસસદાસ્વાદાત્ સતામુન્મદા
માતર્માધવપાદુકે બહુવિદાં પ્રાયઃ શ્રુતિર્મુહ્યતિ ।
સારાસારસકૃદ્વિમર્શનપરિમ્લાનાક્ષરગ્રન્થિભિ-

    ગ્રન્થૈસ્ત્વામિહ વર્ણયામ્યહમતસ્ત્રાસત્રપાવર્જિતઃ ॥ ૧૪.૯૮॥ ૪૭૮॥

તવામ્બ કિલ ખેલતાં ગતિવશેન ગર્ભાશ્મનાં
    રમારમણપાદુકે કિમપિ મઞ્જુભિઃ શિઞ્જિતૈઃ ।
પદસ્તુતિવિધાયિભિસ્ત્વદનુભાવસિદ્ધાન્તિભિઃ
    સયૂથ્યકલહાયિતં શ્રુતિશતં સમાપદ્યતે ॥ ૧૪.૯૯॥ ૪૭૯॥

ક્ષિપતિ મણિપાદરક્ષે નાદૈર્નૂનં સમાશ્રિતત્રાણે ।
રઙ્ગેશ્વરસ્ય ભવતી રક્ષાપેક્ષાપ્રતીક્ષણવિલમ્બમ્ ॥ ૧૪.૧૦૦॥ ૪૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
નાદપદ્ધતિશ્ચતુર્દશી ॥

## ૧૫. રત્નસામાન્યપદ્ધતિઃ (૫૦)

ઉદર્ચિષસ્તે રઙ્ગેન્દ્રપાદાવનિ બહિર્મણીન્ ।
અન્તર્મણિરવં શ્રુત્વા મન્યે રોમાઞ્ચિતાકૃતીન્ ॥ ૧૫.૧॥ ૪૮૧॥

વિધેહિ શૌરેર્મણિપાદુકે ત્વં
    વિપદ્યમાને મયિ રશ્મિજાલૈઃ ।
આસીદતામન્તકકિઙ્કરાણાં
    વિત્રાસનાન્ વેત્રલતાવિશેષાન્ ॥ ૧૫.૨॥ ૪૮૨॥

મુકુન્દપાદાવનિ મધ્યનાડ્યા
    મૂર્ધન્યયા નિષ્પતતો મુમુક્ષોઃ ।
આબ્રહ્મલોકાદવલમ્બનાર્થં
    રત્નાનિ તે રશ્મિગણં સૃજન્તિ ॥ ૧૫.૩॥ ૪૮૩॥

અસૂર્યભેદ્યાં રજનીં પ્રજાનામ્
    આલોકમાત્રેણ નિવારયન્તી ।
અમોઘવૃત્તિર્મણિપાદરક્ષે
    મુરદ્વિષો મૂર્તિમતી દયા ત્વમ્ ॥ ૧૫.૪॥ ૪૮૪॥

રઙ્ગેશપાદાવનિ તાવકાનાં
    રત્નોપલાનાં દ્યુતયઃ સ્ફુરન્તિ ।
શ્રેયઃફલાનાં શ્રુતિવલ્લરીણામ્

ઉપઘ્નશાખા ઇવ નિર્વ્યપાયાઃ ॥ ૧૫.૫॥ ૪૮૫॥

કસ્યાપિ પુંસઃ કનકાપગાયાઃ
પુણ્યે સલીલં પુલિને શયાલોઃ ।
સમીપવૃત્તિર્મણિપાદુકે ત્વં
સંવાહયન્તીવ પદં કરૈઃ સ્વૈઃ ॥ ૧૫.૬॥ ૪૮૬॥

દિદૃક્ષમાણસ્ય પરં નિધાનં
સ્નેહાન્વિતે યોગદશાવિશેષે ।
સંવિત્પ્રદીપં મણિપાદરક્ષે
સન્ધુક્ષયન્તીવ મરીચયસ્તે ॥ ૧૫.૭॥ ૪૮૭॥

સમાધિભાજાં તનુતે ત્વદીયા
રઙ્ગેશપાદાવનિ રત્નપઙ્ક્તિઃ ।
સ્થાનં પ્રયાતું તમસઃ પરં ત-
ત્પ્રદીપકૃત્યં પ્રભયા મહત્યા ॥ ૧૫.૮॥ ૪૮૮॥

બધ્નાસિ રઙ્ગેશ્વરપાદરક્ષે
મન્યે યથાર્હં મણિરશ્મિજાલૈઃ ।
સેવાનતાનાં ત્રિદશેશ્વરાણાં
શેષાપટીં શેખરસન્નિકૃષ્ટામ્ ॥ ૧૫.૯॥ ૪૮૯॥

ભજન્તિ રઙ્ગેશ્વરપાદરક્ષે
પ્રકલ્પયન્તો વિવિધાન્પુમર્થાન્ ।
ઉદર્ચિષશ્ચિન્તયતાં જનાનાં
ચિન્તામણિત્વં મણયસ્ત્વદીયાઃ ॥ ૧૫.૧૦॥ ૪૯૦॥

નાથસ્ય દત્તે નદરાજકન્યા
પાતું શુભાન્પાદનખેન્દુરશ્મીન્ ।
મણિપ્રભાભિઃ પ્રતિપન્નપક્ષાં
લીલાચકોરીમિવ પાદુકે ત્વામ્ ॥ ૧૫.૧૧॥ ૪૯૧॥

જનસ્ય રઙ્ગેશ્વરપાદુકે ત્વં
જાતાનુકંપા જનયસ્યયત્નાત્ ।
આકૃષ્ય દૂરાન્મણિરશ્મિજાલૈ-
રનન્યલક્ષાણિ વિલોચનાનિ ॥ ૧૫.૧૨॥ ૪૯૨॥

રઙ્ગેશપાદાવનિ તાવકીનૈઃ
    સ્પૃષ્ટાઃ કદાચિન્મણિરશ્મિપાશૈઃ ।
કાલસ્ય ઘોરં ન ભજન્તિ ભૂયઃ
    કારાગૃહાન્તેષુ કશાભિઘાતમ્ ॥ ૧૫.૧૩॥ ૪૯૩॥

રત્નાનિ રઙ્ગેશ્વરપાદરક્ષે
    ત્વદાશ્રિતાન્યપ્રતિઘૈર્મયૂખૈઃ ।
આસેદુષીણાં શ્રુતિસુન્દરીણાં
    વિતન્વતે વર્ણનિચોલલક્ષ્મીમ્ ॥ ૧૫.૧૪॥ ૪૯૪॥

નિદ્રારસપ્રણયિનો મણિપાદરક્ષે
    રઙ્ગેશ્વરસ્ય સવિધં પ્રતિપદ્યમાના ।
શય્યાફણીન્દ્રમભિતો ભવતી વિધત્તે
    રત્નાંશુભિર્યવનિકામિવ દર્શનીયામ્ ॥ ૧૫.૧૫॥ ૪૯૫॥

સદ્યસ્ત્વદુદ્ગ્રહદશાનમિતાકૃતીનાં
    સ્રસ્તાંશુકં નિજરુચા મણિપાદુકે ત્વમ્ ।
પદ્માસહાયપરિવારવિલાસિનીનાં
    પટ્ટાંશુકૈરિવ પયોધરમાવૃણોષિ ॥ ૧૫.૧૬॥ ૪૯૬॥

દેવસ્ય રઙ્ગવસતેઃ પુરતઃ પ્રવૃત્તૈ-
    રુદ્ધૂતવિશ્વતિમિરાં મણિરશ્મિજાલૈઃ ।
મન્યે મદીયહૃદયાયતનપ્રવેશ-
    માઙ્ગલ્યદીપકણિકાં મણિપાદુકે ત્વામ્ ॥ ૧૫.૧૭॥ ૪૯૭॥

આકીર્ણરત્નનિકરાં મણિપાદુકે ત્વાં
    રઙેશ્વરસ્ય લલિતાં વિપણિં પ્રતીમઃ ।
યત્સંશ્રયેણ ભવતિ સ્થિરભક્તિમૂલ્યં
    કૈવલ્યમત્ર જગતાં ક્રયવિક્રયાર્હમ્ ॥ ૧૫.૧૮॥ ૪૯૮॥

વ્યઙ્ક્તું ક્ષમં ભગવતો જગદીશ્વરત્વં
    વજ્રાઙ્કુશધ્વજસરોરુહચક્રચિહ્નમ્ ।
આશ્લિષ્ય નિર્ભરરુચિં મણિપાદુકે ત્વા-
    માસીદનાભરણસુન્દરમઙ્ઘ્રિપદ્મમ્ ॥ ૧૫.૧૯॥ ૪૯૯॥

રત્નપ્રભાપટલચક્રમનોહરા ત્વં
    પદ્મારુણં પદમિદં ત્વયિ રઙ્ગભર્તુઃ ।

મન્યે તદેતદુભયં મણિપાદરક્ષે
    ચક્રાબ્જમણ્ડલમકિઞ્ચનરક્ષણાર્થમ્ ॥ ૧૫.૨૦॥ ૫૦૦॥

ત્રાસાત્સ્વયં પ્રણમતાં દનુજેશ્વરાણાં
    સઙ્ખ્યેડવલૂનશિરસામપિ મૌલિરત્નૈઃ ।
આયોજયત્યનુકલં મણિપાદુકે ત્વાં
    સૈરન્ધ્રિકેવ મુરવૈરિકૃપાણધારા ॥ ૧૫.૨૧॥ ૫૦૧॥

આસ્કન્દનાનિ વિબુધેન્દ્રશિખામણીનાં
    ત્વામાશ્રિતાન્યસુરસૂદનપાદરક્ષે ।
રત્નાનિ તે સ્તુતિસુવર્ણપરીક્ષણાર્થે
    નૂનં ભજન્તિ નિકષોપલતાં કવીનામ્ ॥ ૧૫.૨૨॥ ૫૦૨॥

પાદાવનિ પ્રણયિનાં પ્રતિપાદિતાર્થાં
    ક્રીડાસરોજમિવ શૌરિપદં વહન્તીમ્ ।
પ્રત્યુપ્તરત્નનિકરપ્રતિપન્નશોભાં
    પશ્યામિ રોહણગિરેરધિદેવતાં ત્વામ્ ॥ ૧૫.૨૩॥ ૫૦૩॥

યામેવ રત્નકિરણૈર્મણિપાદાક્ષે
    ક્રીડાસરોજમિવ શૌરિપદં ભજન્તીમ્ । var વહન્તીમ્
પ્રત્યુપ્તરત્નનિકરપ્રતિપન્નશોભાં
    પશ્યામિ રોહણગિરેરધિદેવતાં ત્વામ્ ॥ ૧૫.૨૪॥ ૫૦૪॥

રત્નાઙ્કુરૈરવિરલા મણિપાદરક્ષે
    પાકોન્મુખૈઃ પરિગતા પુરુષાર્થસસ્યૈઃ ।
દેવેન રઙ્ગપતિના જગતાં વિભૂત્યૈ
    કેદારિકેવ કૃપયા પરિકલ્પિતા ત્વમ્ ॥ ૧૫.૨૫॥ ૫૦૫॥

નિર્ધૂતમોહતિમિરાસ્તવ રત્નદીપૈ-
    ર્નિર્વિશ્યમાનવિભવં નદરાજપુત્ર્યા ।
પ્રત્યક્ષયન્તિ નિગમાન્તનિગૂધમર્થં
    પાદાવનિ ત્વયિ નિવેશિતભાવબન્ધાઃ ॥ ૧૫.૨૬॥ ૫૦૬॥

રત્નોપલપ્રકરસમ્ભવ એષ દૂરા-
    દ્રઙ્ગાધિરાજચરણાવનિ તાવકીનઃ ।
આર્દ્રાપરાધપરિખિન્નધિયાં પ્રજાના-
    માશ્વાસનાર્થ ઇવ ભાતિ કરપ્રસારઃ ॥ ૧૫.૨૭॥ ૫૦૭॥

વ્યામુહ્યતો વિષયિબાલમૃગાન્મદીયાન્
    સંસારઘર્મજનિતાસુ મરીચિકાસુ ।
પાદાવનિ પ્રગુણરત્નમરીચિજાલૈ-
    રાકૃષ્ય વિશ્રમય કેશવકાન્તિસિન્ધૌ ॥ ૧૫.૨૮॥ ૫૦૮॥

અન્તર્નિધાય મુનિભિઃ પરિરક્ષમાણામ્-
    આત્મીયરશ્મિગુણિતાં મણિપાદરક્ષે ।
રઙ્ગેશપાદકમલપ્રતિપન્નમુદ્રાં
    નીવીમવૈમિ ભવતીં નિગમાન્તવાચામ્ ॥ ૧૫.૨૯॥ ૫૦૯॥

રામસ્ય રઙ્ગવસતેશ્ચરણાનુષઙ્ગા-
    ત્કાષ્ઠાં ગતાં પરમપાવનતાં દધાના ।   var  ભુવનપાવનતામ્
પાદાવનિ પ્રચુરરત્નશિલાનિબદ્ધા
    સંસારસન્તરણસેતુરસિ પ્રજાનામ્ ॥ ૧૫.૩૦॥ ૫૧૦॥

દિવિષન્મકુટેષુ સઞ્ચરન્ત્યાઃ પ્રચુરસ્તે મણિપાદુકે પ્રકાશઃ ।
દિવિ રઙ્ગપતેર્મહોત્સવાર્થં વિતતા વન્દનમાલિકેવ ભાતિ ॥ ૧૫.૩૧॥ ૫૧૧॥

પ્રભવન્તિ દવીયસાં સ્વભાવા-
    ત્તવ રત્નાનિ મુકુન્દપાદરક્ષે ।
અયસામિવ હન્ત લોહકાન્તાઃ
    કઠિનાનાં મનસાં વિકર્ષણાય ॥ ૧૫.૩૨॥ ૫૧૨॥

પરિપશ્યતિ દેવિ રઙ્ગનાથે રહસિ ત્વં સવિધે નિવિશ્ય લક્ષ્મ્યાઃ ।
પરિપુષ્યસિ રત્નધામભિઃ સ્વૈરનસૂયેવ મનોજ્ઞમઙ્ગરાગમ્ ॥ ૧૫.૩૩॥ ૫૧૩॥

તવ રત્નકરાર્પિતં નવીનં પરિગૃહ્ય સ્થિરમંશુકં મનોજ્ઞમ્ ।
જરદંશુકત્સુખેન દેહં કૃતિનઃ કેશવપાદુકે ત્યજન્તિ ॥ ૧૫.૩૪॥ ૫૧૪॥

અભિતો મણિપાદુકે નિબદ્ધૈઃ
    કૃતસંસ્કારવિશેષમાત્મરત્નૈઃ ।
કુરુતે ભવતી પદં મુરારેઃ
    કઠિનેઽસ્મિન્ હૃદિ મે નિવેશયોગ્યમ્ ॥ ૧૫.૩૫॥ ૫૧૫॥

નિજરત્નકરાઞ્ચલૈર્મદીયાનપરાધાનવધૂય દત્તસામ્યા ।
રમયા સહિતસ્ય રઙ્ગભર્તુઃ પદયોરર્પય પાદુકે સ્વયં મામ્ ॥ ૧૫.૩૬॥ ૫૧૬॥

રશ્મિજાલપરિવેષબન્ધુરા રઙ્ગભૂમિપતિરત્નપાદુકે ।
વિશ્વલોચનવિહઙ્ગહારિણી વાગુરેવ વિતતા વિરાજસે ॥ ૧૫.૩૭॥ ૫૧૭॥

માનસામ્બુજવિકાસહેતુભિઃ સેવિતા મણિગણૈઃ પ્રભાકરૈઃ ।
પાદુકે વહસિ સદ્ભિરાશ્રિતાં દેવિ વિષ્ણુપદસમ્પદં નવામ્ ॥ ૧૫.૩૮॥ ૫૧૮॥

અધિશયિતફણિશ્વરસ્ય શૌરેઃ
  સ્વયમધિરૂઢપદોપધાનપાર્શ્વા ।
મણિવલયજુષા કરેણ મન્દં
  સ્પૃશસિ પદાવનિ પાદયોર્યુગં તત્ ॥ ૧૫.૩૯॥ ૫૧૯॥

ભવત્યન્તે ત્વાં પ્રણતસ્ય જન્તો-
  સ્તદોકોઽગ્રજ્વલનં ત્વત્પ્રકાશૈઃ ।
યતો નાડ્યા મધ્યમયા વિનિર્યન્
  ગતિં વિન્દેત્ કેશવપાદરક્ષે ॥ ૧૫.૪૦॥ ૫૨૦॥

અશિથિલપરિણદ્ધા રશ્મિજાલૈર્મણીનાં
  દુરધિગમતમં નઃ પારમારોપયન્તી ।
કમલનયનમાદ્યં કર્ણધારં દધાના
  ભવસિ ભવપયોધેઃ પાદુકે પોતપાત્રી ॥ ૧૫.૪૧॥ ૫૨૧॥

મણિગણકિરણૈસ્તે કલ્પિતે ગુલ્મભેદે
  મૃગયુરિવ કુરઙ્ગીં ત્વાં પુરસ્કૃત્ય ભવ્યામ્ ।
હરતિ ચરણરક્ષે ભક્તિપાશાવરુદ્ધં
  હૃદયહરિણયૂથં પ્રાણિનાં રઙ્ગનાથઃ ॥ ૧૫.૪૨॥ ૫૨૨॥

પરિચિતપદમૂલા પાદુકે રઙ્ગિણસ્ત્વં
  પ્રભવતિ ભુજમધ્યે કૌસ્તુભોઽયં તથાઽપિ ।
ભવતિ ભૃશમધસ્તાત્ તેજસા ભવ્યભૂમ્ના
  શલભિતદુરિતાનાં તાવકાનાં મણીનામ્ ॥ ૧૫.૪૩॥ ૫૨૩॥

કલ્પશ્રેણીદિનપરિણતૌ જન્તુજાલે પ્રસુપ્તે
  વિષ્વગ્વ્યાપ્તે જગતિ તમસા પાદુકે તાદૃશેન ।
સ્ત્યાનાલોકૈસ્તવ મણિગણૈર્વાસગેહપ્રદીપાઃ
  સમ્પદ્યન્તે સહ કમલયા જાગરૂકસ્ય યૂનઃ ॥ ૧૫.૪૪॥ ૫૨૪॥

શ્રીરઙ્ગેન્દોશ્ચરણકમલદ્વન્દ્વસેવાવલેપા-

દારૂઢાયાં ત્વયિ મખભુજામાનતાન્ મૌલિભાગાન્ ।
તેષાં ચૂડામણિભિરનઘૈસ્તાવકાનાં મણીનાં
કેશાકેશિ પ્રભવતિ મિથસ્ત્રાસલેશોજ્ઝિતાનામ્ ॥ ૧૫.૪૫॥ ૫૨૫॥

ત્વદ્રત્નોપલરશ્મિપઞ્જરતનુત્રાણં સ્થિરં બિભ્રતો
માતર્માધવપાદુકે ન તુ પુનર્હસ્તૈઃ સ્પૃશન્ત્યાકુલૈઃ ।
દૂરોત્સિક્તદુરાઢ્યજિહ્મગબિલદ્વાઃપાલકોપાનલ-
જ્વાલામિત્રકઠોરવેત્રલતિકાદત્તાર્ધચન્દ્રં વપુઃ ॥ ૧૫.૪૬॥ ૫૨૬॥

સંવર્તોદિતસૂર્યકોટિસદૃશીં રઙ્ગેશપાદાવનિ
પ્રસ્તૌષિ પ્રતિયત્નરત્નનિકરજ્યોતિશ્છટામુદ્ભટામ્ ।
તન્મન્યે ત્વદનન્યસૂરિપરિષન્મધ્યે નિવેશાય ન-
સ્તાદૃગ્વાસરસેઽપિ ભેત્તુમચિરાદસ્માકમન્ધન્તમઃ ॥ ૧૫.૪૭॥ ૫૨૭॥

સલીલં વિન્યસ્ય ત્વયિ ચરણરક્ષે નિજપદં
યદૃચ્છાનિષ્ક્રાન્તે વિહરતિ હરૌ રઙ્ગરસિકે ।
દિશાસૌધાનષ્ટૌ જનયસિ તદા નિર્ભરમિલ-
ન્મણિચ્છાયામાયાઘનઘટિતકેતુવ્યતિકરાન્ ॥ ૧૫.૪૮॥ ૫૨૮॥

મહાર્ઘૈરાશ્લિષ્ટાં મણિભિરવધૂતદ્યુમણિભિઃ
કથઞ્ચિત્ ક્ષેત્રજ્ઞૈરધિગતપદામમ્બ ભવતીમ્ ।
મુકુન્દેન ત્રાતું પદકમલમૂલે વિનિહિતાં
નિરાબાધાં મન્યે નિધિમનઘવાચાં નિરવધિમ્ ॥ ૧૫.૪૯॥ ૫૨૯॥

તાપત્રયં નિરુન્ધે પચતિ કષાયાન્ વિશોષયતિ પઙ્કમ્ ।
તેજસ્ત્રિતયમિદં તે શઙ્કે રઙ્ગેન્દ્રપાદુકે તેજઃ ॥ ૧૫.૫૦॥ ૫૩૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
રત્નસામાન્યપદ્ધતિઃ પઞ્ચદશી ॥

## ૧૬. બહુરત્નપદ્ધતિઃ (૫૦)

મુખબાહૂરુપાદેભ્યો વર્ણાન્ સૃષ્ટવતઃ પ્રભોઃ ।
પ્રપદ્યે પાદુકાં રત્નૈર્વ્યક્તવર્ણવ્યવસ્થિતિમ્ ॥ ૧૬.૧॥ ૫૩૧॥

મણિભિઃ સિતરક્તપીતકૃષ્ણૈર્ભવતી કાઞ્ચનપાદુકે વિચિત્રા ।

યુગભેદવિકલ્પિતં મુરારેર્યુગપદ્દર્શયતીવ વર્ણભેદમ્ ॥ ૧૬.૨॥ ૫૩૨॥

નવરત્નવિચિત્રિતા મુરારેઃ પદયોસ્ત્વં મણિપાદુકે વિભાસિ ।
નવખણ્ડવતી વસુન્ધરેવ પ્રણયાજ્જન્મપદં સમાશ્રયન્તી ॥ ૧૬.૩॥ ૫૩૩॥

સહસા વિનિવેદ્ય સાપરાધાન્
    ત્વદધીનસ્વપદે મુકુન્દપાદે ।
અરુણોપલસક્તમૌક્તિકશ્રીઃ
    સ્મયમાનેવ વિભાસિ પાદુકે ત્વમ્ ॥ ૧૬.૪॥ ૫૩૪॥

બહુરત્નસમુદ્ભવં મયૂખં તવ મન્યે મણિપાદુકે મુરારેઃ ।
ચરણોપગતં મયૂરપિઞ્છં મકુટારોહણસાહસં પ્રમાર્ષ્ટુમ્ ॥ ૧૬.૫॥ ૫૩૫॥

પ્રભયા હરિનીલમૌક્તિકાનાં
    વિકસન્ત્યા દિશસીવ પાદુકે ત્વમ્ ।
મધુભિચ્ચરણારવિન્દલક્ષ્મ્યાઃ
    સ્રજમિન્દીવરપુણ્ડરીકબદ્ધામ્ ॥ ૧૬.૬॥ ૫૩૬॥

તવ માધવપાદુકે મણીનાં પ્રભયા દેવિ સિતાસિતારુણાનામ્ ।
વહતે ગિરિશસ્ય મૌલિગઙ્ગા કુમુદેન્દીવરપદ્મકાનનાનિ ॥ ૧૬.૭॥ ૫૩૭॥

પૃથગ્વિધાનાં દ્યુતિભિર્મણીનાં ત્વાં પાદુકે લોહિતશુક્લકૃષ્ણામ્ ।
વિહારહેતોરિહ રઙ્ગભર્તુઃ પાદાનુષક્તાં પ્રકૃતિં પ્રતીમઃ ॥ ૧૬.૮॥ ૫૩૮॥

તમાલનીલદ્યુતિમિન્દ્રનીલૈર્મુક્તાનુવિદ્ધાં મણિપાદુકે ત્વામ્ ।
અવૈમિ રઙ્ગેશ્વરકાન્તિસિન્ધોર્વેલામવિશ્રાન્તગતાગતાર્હામ્ ॥ ૧૬.૯॥ ૫૩૯॥

અવૈમિ રઙ્ગેશ્વરપાદુકાભ્યામકાલકાલ્યં વિભવં વિધાતુમ્ ।
વજ્રેન્દ્રનીલવ્યપદેશદૃશ્યં બન્દીકૃતં નૂનમહસ્ત્રિયામમ્ ॥ ૧૬.૧૦॥ ૫૪૦॥

પદસ્ય ગોપ્ત્રી ભવતી મુરારેર્મણિસ્પૃશા મૌક્તિકરત્નભાસા ।
અન્તર્દૃશં સાઞ્જનયા મુનીનામનક્તિ કર્પૂરશલાકયેવ ॥ ૧૬.૧૧॥ ૫૪૧॥

મુક્તામયૂખપ્રકરૈઃ સુભદ્રા કૃષ્ણા મહેન્દ્રોપલરશ્મિજાલૈઃ ।
માન્યા મુરારેર્મણિપાદુકે ત્વં વિહારયુક્તા વિજયં વૃણોષિ ॥ ૧૬.૧૨॥ ૫૪૨॥

વિચિત્રવર્ણાં મણિપાદુકે ત્વાં
    છન્દોમયીં સામનિબદ્ધગીતિમ્ ।
મુનીન્દ્રજુષ્ટાં દ્વિપદાં મુરારેઃ

    પ્રત્યાયિકાં કાઞ્ચિદૃચં પ્રતીમઃ ॥ ૧૬.૧૩॥ ૫૪૩॥

પ્રસેદુષી ગોત્રભિદઃ પ્રણામૈઃ પુષ્ણાસિ રઙ્ગેશ્વરપાદુકે ત્વમ્ ।
મણિપ્રભાસંવલનાપદેશાત્પ્રાયસ્તદર્હાણિ શરાસનાનિ ॥ ૧૬.૧૪॥ ૫૪૪॥

શોણાશ્મનાં તવ હરિન્મણિરશ્મિભિન્નં
    બાલાતપં બલિવિમર્દનપાદરક્ષે ।
શ્યામીકૃતં શુકશકુન્તગણપ્રવેશા-
    ચ્છઙ્કે સતાં કિમપિ શાલિવનં વિપક્વમ્ ॥ ૧૬.૧૫॥ ૫૪૫॥

સમ્ભિદ્યમાનમણિવિદ્રુમમૌક્તિકશ્રીઃ ।
    સૈરન્ધ્રિકેવ ભવતી મણિપાદરક્ષે ।
પ્રસ્તૌતિ રઙ્ગનૃપતેશ્ચરણારવિન્દે
    કસ્તૂરિકાઘુસૃણચન્દનપઙ્કચર્ચામ્ ॥ ૧૬.૧૬॥ ૫૪૬॥

આતન્વતીમસુરમર્દનપાદરક્ષે
    શુદ્ધાન્તપક્ષ્મલદૃશાં મદનેન્દ્રજાલમ્ ।
વૈહારિકીં વિવિધરત્નમયૂખલક્ષા-
    ન્મન્યે સમુદ્વહસિ મોહનપિઞ્છિકાં ત્વમ્ ॥ ૧૬.૧૭॥ ૫૪૭॥

રત્નૈર્વ્યવસ્થિતસિતાસિતશોણવર્ણૈ-
    રાલોકવદ્ભિરજહચ્છ્રુતિસન્નિકર્ષૈઃ ।
દ્રષ્ટું મુકુન્દચરણાવનિમેષદૃશ્યૌ
    સન્દૃશ્યસે જનનિ સમ્ભૃતનેત્રપઙ્ક્તિઃ ॥ ૧૬.૧૮॥ ૫૪૮॥

ગારુત્મતાન્તરિતમૌક્તિકપઙ્ક્તિલક્ષા-
    દ્દૂર્વામધૂકરચિતં દુરિતોપશાન્ત્યૈ ।
માતઃ સ્વયં વહસિ મુગ્ધધિયાં પ્રજાનાં
    મઙ્ગલ્યમાલ્યમિવ માધવપાદુકે ત્વમ્ ॥ ૧૬.૧૯॥ ૫૪૯॥

રઙ્ગાધિરાજપદરક્ષિણિ રાજતે તે
    વજ્રોપસઙ્ઘટિતમૌક્તિકવિદ્રુમશ્રીઃ ।
સક્તા ચિરં મનસિ સંયમિનાં નિવાસા-
    ત્સૂર્યેન્દુવહ્નિમયમણ્ડલવાસનેવ ॥ ૧૬.૨૦॥ ૫૫૦॥

આસક્તવાસવશિલાશકલાસ્ત્વદીયાઃ
    પદ્માસહાયપદરક્ષિણિ પદ્મરાગાઃ ।

પ્રત્યક્ષયન્તિ કમપિ ભ્રમરાભિલીનં
    પાદારવિન્દકમરન્દરસપ્રવાહમ્ ॥ ૧૬.૨૧॥ ૫૫૧॥

અન્તઃપુરાણિ સમયેષ્વભિગન્તુમેકા
    રઙ્ગેશિતુર્ગ્રપયસીવ પદાવનિ ત્વમ્ ।
મુક્તાંશુજાલમિલનાદ્રુચિરૈઃ પ્રવાલૈ-
    ર્બિમ્બાધરં સ્મિતવિશેષયુતં પ્રિયાણામ્ ॥ ૧૬.૨૨॥ ૫૫૨॥

રઙ્ગેશ્વરસ્ય મૃગયોશ્ચરણાવસક્તાં
    રક્ષઃકપીન્દ્રમકુટેષુ નિવેશયોગ્યામ્ ।
મન્યે પદાવનિ નિબદ્ધવિચિત્રરત્નાં
    માયામૃગસ્ય રચિતામિવ ચર્મણા ત્વામ્ ॥ ૧૬.૨૩॥ ૫૫૩॥

બધ્નાસિ રઙ્ગપતિવિભ્રમપાદુકે ત્વં
    માયાકિરાતમકુટે નવબર્હમાલામ્ ।
આકૃષ્ટવાસવધનુશ્શકલૈર્મણીના-
    મન્યોન્યસઙ્ઘટિતકર્બુરિતૈર્મયૂખૈઃ ॥ ૧૬.૨૪॥ ૫૫૪॥

અન્યોન્યબન્ધુરહરિન્મણિપદ્મરાગા
    રઙ્ગેશ્વરસ્ય ચરણાવનિ રાજસે ત્વમ્ ।
આત્મોપમાનવિભવાચ્ચરિતાર્થયન્તી
    શૈલાત્મજાગિરિશયોરિવ મૂર્તિમેકામ્ ॥ ૧૬.૨૫॥ ૫૫૫॥

તાપત્રયપ્રશમનાય સમાશ્રિતાનાં
    સન્દર્શિતારુણસિતાસિતરત્નપઙ્ક્તિઃ ।
પુષ્ણાસિ રઙ્ગનૃપતેર્મણિપાદુકે ત્વં
    પ્રાયઃ સરોજકુમુદોત્પલકાનનાનિ ॥ ૧૬.૨૬॥ ૫૫૬॥

દેહદ્યુતિં પ્રકટયન્તિ મહેન્દ્રનીલાઃ
    શૌરેઃ પદામ્બુજરુચિં તવ પદ્મરાગાઃ ।
અન્યોન્યલબ્ધપરભાગતયા ત્વમીષા-
    માભાતિ કાન્તિરપરા મણિપાદરક્ષે ॥ ૧૬.૨૭॥ ૫૫૭॥

આકીર્ણમૌક્તકહરિન્મણિપદ્મરાગા-
    મમ્ભોજલોચનપદાવનિ ભાવયે ત્વામ્ ।
તત્પાદવિશ્રમજુષાં શ્રુતિસુન્દરીણાં
    વર્ણોપધાનમિવ મૌલિનિવેશયોગ્યમ્ ॥ ૧૬.૨૮॥ ૫૫૮॥

આસન્નવાસવશિલાશકલાસ્ત્વદીયાઃ
પદ્મેક્ષણસ્ય પદરક્ષિણિ પદ્મરાગાઃ ।
સમ્ભાવયન્તિ સમયે ક્વચિદુષ્ણભાનોઃ
સદ્યઃપ્રસૂતયમુનાસુભગામાસ્થામ્ ॥ ૧૬.૨૯॥ ૫૫૯॥

મુક્તેન્દ્રનીલમણિભિર્વિહિતે ભવત્યાઃ
પઙ્ક્તી દૃઢે પરમપૂરુષપાદરક્ષે ।
મન્યે સમાશ્રિતજનસ્ય તવાનુભાવા-
દુન્મોચિતે સુકૃતદુષ્કૃતશૃઙ્ખલે દ્વે ॥ ૧૬.૩૦॥ ૫૬૦॥

ઉદ્ગીર્ણગાઢતમસો હરિનીલભઙ્ગા-
સ્તારાવિશેષરુચિરાણિ ચ મૌક્તિકાનિ ।
ત્વત્સઙ્ગમાત્સરસિજેક્ષણપાદરક્ષે
સંયોજયન્તિ નિશયા ભવમૌલિચન્દ્રમ્ ॥ ૧૬.૩૧॥ ૫૬૧॥

વિષ્ણોઃ પદેન ઘટિતા મણિપાદુકે ત્વં
વ્યક્તેન્દ્રનીલરુચિરુજ્જ્વલમૌક્તિકશ્રીઃ ।
કાલેષુ દીવ્યસિ મરુદ્ભિરુદીર્યમાણા
કાદમ્બિનીવ પરિતઃ સ્ફુટવારિબિન્દુઃ ॥ ૧૬.૩૨॥ ૫૬૨॥

ભાસા સ્વયં ભગવતો મણિપાદરક્ષે
મુક્તાન્વિતા મરતકોપલપદ્ધતિસ્તે ।
નિત્યાવગાહનસહં સકલસ્ય જન્તો-
ર્ગઙ્ગાન્વિતં જનયતીવ સમુદ્રમન્યમ્ ॥ ૧૬.૩૩॥ ૫૬૩॥

સૂર્યાત્મજા હરિશિલામણિપઙ્ક્તિલક્ષા-
ત્ત્વાં નિત્યમાશ્રિતવતી મણિપાદરક્ષે ।
આદૌ જનાર્દનપદે ક્શણમાત્રલગ્ના-
માસન્નમૌક્તિકરુચા હસતીવ ગઙ્ગામ્ ॥ ૧૬.૩૪॥ ૫૬૪॥

પર્યન્તસઙ્ઘટિતભાસુરપદ્મરાગાઃ
પદ્મોદરભ્રમકાન્તિમુશસ્ત્વદીયાઃ ।
ત્વત્સંશ્રયેણ ચરણાવનિ શક્રનીલાઃ
પીતામ્બરેણ પુરુષેણ તુલાં લભન્તે ॥ ૧૬.૩૫॥ ૫૬૫॥

શઙ્કે પદાવનિ સદા પરિચિન્વતી ત્વં

રઙ્ગેશિતુશ્ચરણપઙ્કજસૌકુમાર્યમ્ ।
અગ્રે મહોભિરરુણોપલમૌક્તિકાનાં
પ્રાજ્યાં વિનિક્ષિપસિ પલ્લવપુષ્પપઙ્ક્તિમ્ ॥ ૧૬.૩૬॥ ૫૬૬॥

નિર્ગચ્છતા ચરણરક્ષિણિ નીયમાના
રઙ્ગેશ્વરેણ ભવતી રણદીક્ષિતેન ।
સૂતે સુરારિસુભટીનયનામ્બુજાનાં
જ્યૌત્સ્નીં નિશામિવ સિતાસિતરત્નભાસા ॥ ૧૬.૩૭॥ ૫૬૭॥

મરકતહરિતાઙ્ગી મેદુરા પદ્મરાગૈ-
રભિનવજલબિન્દુવ્યક્તમુક્તાફલશ્રીઃ ।
કલયસિ પદરક્ષે કૃષ્ણમેઘપ્રચારાત્-
કનકસરિદનૂપે શાદ્વલં સેન્દ્રગોપમ્ ॥ ૧૬.૩૮॥ ૫૬૮॥

વિરચિતસુરસિન્ધોવિષ્ણુપાદરવિન્દા-
ત્સમધિકમનુભાવં પાદુકે દર્શયન્તી ।
વલભિદુપલમુક્તાપદ્મરાગપ્રકાશૈઃ
પરિણમયસિ નૂનં પ્રાપ્તશોણં પ્રયાગમ્ ॥ ૧૬.૩૯॥ ૫૬૯॥

વિવિધમણિમયૂખૈર્વ્યક્તપક્ષાં વિચિત્રૈ-
ર્જલનિધિદુહિતુસ્ત્વાં વેદ્મિ લીલાચકોરીમ્ ।
અનિશમવિકલાનાં પાદુકે રઙ્ગભર્તુ-
શ્ચરણનખમણીનાં ચન્દ્રિકામાપિબન્તીમ્ ॥ ૧૬.૪૦॥ ૫૭૦॥

ચરણકમલસેવાસઙ્ગિનાં રઙ્ગભર્તુ-
ર્વિનયગરિમભાજાં વર્જિતૈરાતપત્રૈઃ ।
પુનરપિ પદરક્ષે પુષ્યસિ ત્વં સુરાણાં
બહુવિધમણિકાન્ત્યા બર્હિપિચ્છાતપત્રમ્ ॥ ૧૬.૪૧॥ ૫૭૧॥

મરકતરુચિપત્રા મૌક્તિકસ્મેરપુષ્પા
સ્ફુટકિસલયશોભાભાસુરૈઃ પદ્મરાગૈઃ ।
ફલમખિલમુદારા રઙ્ગનાથસ્ય પાદે
કલયતિ ભવતી નઃ કલ્પવલ્લીવ કાચિત્ ॥ ૧૬.૪૨॥ ૫૭૨॥

બહુમણિરુચિરાઙ્ગીં રઙ્ગનાથસ્ય પાદા-
ન્નિજશિરસિ ગિરીશો નિક્ષિપન્પાદુકે ત્વામ્ ।
સ્મરતિ લલિતમન્તર્લાલનીયં ભવાન્યા-

સ્તરલઘનકલાપં શણ્મુખસ્યૌપવાહ્યમ્ ॥ ૧૬.૪૩॥ ૫૭૩॥

વિવિધમણિસમુત્થૈર્વ્યક્તમાપાદયન્તીં
દિવસરજનિસન્ધ્યાયૌગપદ્યે મયૂખૈઃ ।
ઉપનિષદુપગીતાં પાદુકે રઙ્ગિણસ્ત્વા-
મઘટિતઘટનાર્હાં શક્તિમાલોચયામઃ ॥ ૧૬.૪૪॥ ૫૭૪॥

સકલમિદમવન્ધ્યે શાસને સ્થાપયન્તી
મુરમથનપદસ્થા મૌક્તિકાદિપ્રકારા ।
પ્રકટયસિ વિશુદ્ધશ્યામરક્તાદિરૂપાન્
ફલપરિણતિભેદાન્પ્રાણિનાં પાદુકે ત્વમ્ ॥ ૧૬.૪૫॥ ૫૭૫॥

પ્રદિશતિ મુદમક્ષ્ણોઃ પાદુકે દેહભાજાં
શતમખમણિપઙ્ક્તિઃ શાર્ઙ્ગિણસ્તુલ્યવર્ણા ।
પરિસરનિહિતૈસ્તે પદ્મરાગપ્રદીપૈ-
ર્ઘનતરપરિણદ્ધા કજ્જલશ્યામિકેવ ॥ ૧૬.૪૬॥ ૫૭૬॥

કલયાઽપિ હાનિરહિતેષુ સદા
તવ મૌક્તિકેષુ પરિતઃ પ્રથતે ।
ઉપરજ્યમાનહરિણાઙ્કુતુલા
હરિપાદુકે હરિશિલામહસા ॥ ૧૬.૪૭॥ ૫૭૭॥

મરકતપત્રલા રુચિરવિદ્રુમપલ્લવિતા
પૃથુતરમૌક્તિકસ્તબકિતા નિગમૈઃ સુરભિઃ ।
ઉપવનદેવતેવ ચરણાવનિ રઙ્ગપતે-
રભિલષતો વિહારમભિગમ્ય પદં સ્પૃશસિ ॥ ૧૬.૪૮॥ ૫૭૮॥

સદોત્તુઙ્ગે રઙ્ગક્ષિતિરમણપાદપ્રણયિનિ
ત્વદાલોકે તત્તન્મણિકિરણસમ્ભેદકલુષે ।
પ્રતિસ્રોતોવૃત્ત્યા પ્રથિતરુચિભેદં ન સહતે
નવામ્ભઃસ્વાચ્છન્દ્યં નમદમરકોટીરમકરઃ ॥ ૧૬.૪૯॥ ૫૭૯॥

જનયસિ પદાવનિ ત્વં મુક્તાશોણમણિશક્રનીલરુચા ।
નખરુચિસન્તતિરુચિરાં નન્દકનિસ્ત્રિંશસમ્પદં શૌરેઃ ॥ ૧૬.૫૦॥ ૫૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે

બહુરત્નપદ્ધતિઃષોડશી ॥

## ૧૭. પદ્મરાગપદ્ધતિઃ (૩૦)

પ્રપદ્યે રઙ્ગનાથસ્ય પાદુકાં પદ્મરાગિણીમ્ ।
પદૈકનિયતાં તસ્ય પદ્મવાસામિવાપરામ્ ॥ ૧૭.૧॥ ૫૮૧॥

અતિવાઙ્મનસં વિચિન્ત્ય શૌરેઃ પદરક્ષે પદપદ્મસૌકુમાર્યમ્ ।
પરિપુષ્યસિ પદ્મરાગભાસા પદવીમાહિતપલ્લવામિવ ત્વમ્ ॥ ૧૭.૨॥ ૫૮૨॥

પદપલ્લવસઙ્ગિભિઃ પ્રદીપ્તૈરધિકોલ્લાસિભિરમ્બ પદ્મરાગૈઃ ।
અનલે શયનં ક્વચિન્મુરારેરવિસંવાદયસીવ પાદુકે ત્વમ્ ॥ ૧૭.૩॥ ૫૮૩॥

વિવૃણોતિ રઙ્ગપતિરત્નપાદુકે ત્વયિ પદ્મરાગમનિપદ્ધતિઃ શુભા ।
નિબિડોરુસઙ્ઘટનપીડનક્ષરન્મધુકૈટભક્ષતજપઙ્કવાસનામ્ ॥ ૧૭.૪॥ ૫૮૪॥

પ્રતિયન્તિ રઙ્ગપતિપાદુકે જના-
    સ્તવ પદ્મરાગમણિરશ્મિસન્તતિમ્ ।
અભિજગ્મુષાં ત્વદનુભાવખણ્ડિતા-
    દઘસઞ્ચયાદ્વિગલિતામસૃક્છટામ્ ॥ ૧૭.૫॥ ૫૮૫॥

પશ્યન્તિ રઙ્ગેશ્વરપાદુકે ત્વાં પૌરાઙ્ગનાઃ સ્પર્શિતરાગબન્ધામ્ ।
શ‍ૃઙ્ગારયોનેર્જ્વલનસ્ય દીપ્તૈરઙ્ગારજાલૈરિવ પદ્મરાગૈઃ ॥ ૧૭.૬॥ ૫૮૬॥

અવૈમિ દોષાપગમસ્ય હેતું તમોપહાં સમ્ભૃતપદ્મરાગામ્ ।
અશેષવન્દ્યાં મણિપાદુકે ત્વાં રઙ્ગેશસૂર્યોદયપૂર્વસન્ધ્યામ્ ॥ ૧૭.૭॥ ૫૮૭॥

અવાપ્ય પાદાવનિ રઙ્ગભર્તુઃપાદામ્બુજે પલ્લવસંસ્તરાભામ્ ।
ત્વત્પદ્મરાગદ્યુતયો ભજન્તે કાલાનલત્વં કલુશામ્બુધેર્નઃ ॥ ૧૭.૮॥ ૫૮૮॥

નિસર્ગસિદ્ધં મણિપાદરક્ષે દેવસ્ય રઙ્ગાવસથપ્રિયસ્ય ।
બાલાર્કવર્ણાઃ પદપદ્મરાગં ત્વત્પદ્મરાગાઃ પુનરુક્તયન્તિ ॥ ૧૭.૯॥ ૫૮૯॥

પદેન વિશ્વં મણિપાદરક્ષે પત્ન્યા સમં પાલયતો મુરારેઃ ।
યશઃપયોધૌ પરિકલ્પયન્તિ પ્રવાલશોભાં તવ પદ્મરાગાઃ ॥ ૧૭.૧૦॥ ૫૯૦॥

અર્ચિષ્મતી કાઞ્ચનપાદરક્ષે પ્રસ્તૌતિ તે પાટલરત્નપઙ્ક્તિઃ ।
રેખારથાઙ્ગસ્ય મહઃપ્રપઞ્ચં રઙ્ગેશપાદામ્બુજમધ્યભાજઃ ॥ ૧૭.૧૧॥ ૫૯૧॥

ત્વયૈવ પાદાવનિ શોણરત્નૈર્બાલાતપં નૂનમુદીરયન્ત્યા ।

પદ્માપતેઃ પાદતલપ્રરૂઢં રેખામ્બુજં નિત્યમભૂદનિદ્રમ્ ॥ ૧૭.૧૨॥ ૫૯૨॥

નિત્યં નિજાલોકપથં ગતાનાં શ્રેયો દિશન્તી શ્રિતપદ્મરાગામ્ ।
મહીયસીં માધવપાદરક્ષે મન્યામહે મઙ્ગલદેવતાં ત્વામ્ ॥ ૧૭.૧૩॥ ૫૯૩॥

દેવસ્ય રઙ્ગરસિકસ્ય વિહારહેતો-
રાત્માનમઙ્ઘ્રિકમલે વિનિવેદ્ય પૂર્વમ્ ।
પ્રાયો નિવેદયસિ શોણમણિપ્રકાશૈઃ
પ્રત્યૂષપદ્મકલિકાં પદરક્ષિણિ ત્વમ્ ॥ ૧૭.૧૪॥ ૫૯૪॥

પ્રત્યઙ્મયસ્ય હવિષઃ પ્રણવેન દેવિ
પ્રક્ષેપણાય પરમાર્થવિદાં મુનીનામ્ ।
પ્રાજ્યાં મુકુન્દચરણાવનિ પદ્મરાગૈઃ
પર્યાયપાવકશિખાં ભવતીં પ્રતીમઃ ॥ ૧૭.૧૫॥ ૫૯૫॥

સમ્પદ્યતે તવ પદાવનિ પદ્મરાગૈઃ
પ્રસ્થાનમાઙ્ગલિકહોમહુતાશનશ્રીઃ ।
ક્ષીરાહુતિર્ભવતિ યત્ર વિકલ્પગઙ્ગા
રઙ્ગેશ્વરસ્ય રુચિરા નખરશ્મિધારા ॥ ૧૭.૧૬॥ ૫૯૬॥

આમુઞ્ચતામરુણયાવકપઙ્કલક્ષ્મીં
શોણાશ્મનાં તવ પદાવનિ કાન્તિયોગાત્ ।
પદ્માસહાયપદપદ્મનખાઃ શ્રયન્તે
સન્ધ્યાનુરઞ્જિતસુધાકરબિમ્બશોભામ્ ॥ ૧૭.૧૭॥ ૫૯૭॥

સ્થાને તવાચ્યુતપદાવનિ પદ્મરાગા-
સ્તેજોમયાઃ પ્રશમયન્તિ તમો મદીયમ્ ।
ચિત્રં તદેતદિહ યજ્જનયન્તિ નિત્યં
રાગાત્મકેન મહસા રજસો નિવૃત્તિમ્ ॥ ૧૭.૧૮॥ ૫૯૮॥

પદ્માકરાન્તરવિકાસિનિ રઙ્ગભર્તુઃ
પીત્વા પદાવનિ મધૂનિ પદારવિન્દે ।
શોણોપલદ્યુતિમયીં સુભગપ્રચારાં
મન્યે બિભર્ષિ મહતીં મદરાગશોભામ્ ॥ ૧૭.૧૯॥ ૫૯૯॥

પાદાવનિ પ્રસૃમરસ્ય કલેર્યુગસ્ય
પ્રાયેણ સંપ્રતિ નિવારયિતું પ્રવેશમ્ ।

શ્રીરઙ્ગસીમ્નિ તવ શોણમણિપ્રસૂતઃ
    પ્રાકારમગ્નિમયમારભતે પ્રકાશઃ ॥ ૧૭.૨૦॥ ૬૦૦॥

લીલાગૃહાન્તરવિહારિણિ રઙ્ગનાથે
    લાક્ષારસૈરરુણરત્નમયૂખલક્ષ્યૈઃ ।
પ્રાયેણ રઞ્જયતિ પાદસરોજયુગ્મં
    સૈરન્ધ્રિકેવ ભવતી મણિપાદરક્ષે ॥ ૧૭.૨૧॥ ૬૦૧॥

રઙ્ગેશિતુર્વિહરતો મણિપાદરક્ષે
    રથ્યાન્તરે સુમનસઃ પરિકીર્યમાણાઃ ।
ત્વત્પદ્મરાગકિરણચ્છુરણાદ્ભજન્તે
    સન્ધ્યાતપાન્તરિતતારકપઙ્ક્તિલક્ષ્મીમ્ ॥ ૧૭.૨૨॥ ૬૦૨॥

રઙ્ગાધિરાજપદરક્ષિણિ બિભ્રતસ્ત્વાં
    ગઙ્ગાતરઙ્ગવિમલે ગિરિશસ્ય મૌલૌ ।
સંવર્ધયન્તિ મહસા તવ પદ્મરાગાઃ
    શૈલાત્મજાચરણયાવકપઙ્કલક્ષ્મીમ્ ॥ ૧૭.૨૩॥ ૬૦૩॥

શરણમુપગતાનાં શર્વરીં મોહરૂપાં
    શમયિતુમુદયસ્થાન્મન્મહે બાલસૂર્યાન્ ।
પદસરસિજયોગાદ્રઙ્ગનાથસ્ય ભૂયઃ
    પરિણમદરુણિમ્નઃ પાદુકે પદ્મરાગાન્ ॥ ૧૭.૨૪॥ ૬૦૪॥

હરિપદરુચિરાણાં પાદુકે તાવકાના-
    મરુણમણિગણાનાં નૂનમર્ધેન્દુમૌલિઃ ।
પ્રણતિસમયલગ્નાં વાસનામેવ ધત્તે
    કલમકણિશકાન્તિસ્પર્ધિનીભિર્જટાભિઃ ॥ ૧૭.૨૫॥ ૬૦૫॥

પ્રતિવિહરણમેતે પાદુકે રઙ્ગભર્તુઃ
    પદકમલસગન્ધાઃ પદ્મરાગાસ્ત્વદીયાઃ ।
તરુણતપનમૈત્રીમુદ્વહદ્ભિર્મયૂખૈઃ
    સ્થલકમલવિભૂતિં સ્થાપયન્ત્યવ્યવસ્થામ્ ॥ ૧૭.૨૬॥ ૬૦૬॥

અયમનિતરભોગાન્ રઞ્જયન્ વીતરાગા-
    નરુણમણિગણાનાં તાવકાનાં પ્રકાશઃ ।
મધુરિપુપદરક્ષે મઙ્ક્ષુ જાજ્વલ્યમાનઃ
    શલભયતિ જનાનાં શાશ્વતં પાપરાશિમ્ ॥ ૧૭.૨૭॥ ૬૦૭॥

પ્રચુરનિગમગન્ધાઃ પાદુકે રઙ્ગભર્તુઃ
    પદકમલસમૃદ્ધિં પ્રત્યહં ભાવયન્તઃ ।
દધતિ શકલયન્તો ગાઢમન્તસ્તમિસ્રં
    સમુચિતમરુણત્વં તાવકાઃ પદ્મરાગાઃ ॥ ૧૭.૨૮॥ ૬૦૮॥

લાક્ષાલક્ષ્મીમધુરરુચકે રઙ્ગિણઃ પાદરક્ષે
    વક્ત્રામ્ભોજે મદપરિણતિં પદ્મરાગદ્યુતિસ્તે ।
કર્ણોપાન્તે કિસલયરુચિં દેવિ સેવાનતાનાં
    સીમન્તે ચ ત્રિદશસુદૃશાં સૌતિ સિન્ધૂરશોભામ્ ॥ ૧૭.૨૯॥ ૬૦૯॥

અરુણમણયસ્તવૈતે હરિપદરાગેણ લબ્ધમહિમાનઃ ।
ગમયન્તિ ચરણરક્ષે દ્યુમણિગણં જ્યોતિરિઙ્ગણતામ્ ॥ ૧૭.૩૦॥ ૬૧૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગાનાથપાદુકાસહસ્રે
પદ્મરાગપદ્ધતિઃ સપ્તદશી ॥

## ૧૮. મુક્તાપદ્ધતિઃ (૫૦)

બદ્ધાનાં યત્ર નિત્યાનાં મુક્તાનામીશ્વરસ્ય ચ ।
પ્રત્યક્ષં શેષશેષિત્વં સા મે સિદ્ધ્યતુ પાદુકા ॥ ૧૮.૧॥ ૬૧૧॥

તવ રઙ્ગધુરીણપાદરક્ષે
    વિમલા મૌક્તિકપદ્ધતિર્વિભાતિ ।
સુહૃદિ ત્વયિ સાધિતાપવર્ગૈઃ
    સમયે સઙ્ક્રમિતેવ સાધુકૃત્યા ॥ ૧૮.૨॥ ૬૧૨॥

શરણાગતસસ્યમાલિનીયં તવ મુક્તામણિરશ્મિનિર્ઝરૌઘૈઃ ।
નનુ રઙ્ગધુરીણપાદરક્ષે જગતી નિત્યમદૈવમાતૃકાઽભૂત્ ॥ ૧૮.૩॥ ૬૧૩॥

અધિવિષ્ણુપદં પરિસ્ફુરન્તી
    નવમુક્તામણિનિર્મલપ્રકાશા ।
પરિપુષ્યસિ મઙ્ગલાનિ પુંસાં
    પ્રતિપચ્ચન્દ્રકલેવ પાદુકે ત્વમ્ ॥ ૧૮.૪॥ ૬૧૪॥

નિહિતા નવમૌક્તિકાવલિસ્ત્વા-

મભિતઃ કાઞ્ચનપાદુકે મુરારેઃ ।
નખચન્દ્રમસાં પદાશ્રિતાનાં
પ્રતિમાચન્દ્રપરમ્પરેવ ભાતિ ॥ ૧૮.૫॥ ૬૧૫॥

સમતામુપૈતિ વપુષાઽપિ સદા
ભવદીયમૌક્તિકમહશ્છુરિતા ।
હરિપાદુકે હરિપદોદ્ભવયા
કનકાપગા સુરપુરાપગયા ॥ ૧૮.૬॥ ૬૧૬॥

તવ રઙ્ગચન્દ્રતપનીયપાદુકે
વિમલા સમુદ્વહતિ મૌક્તિકાવલિઃ ।
ચરણારવિન્દનખચન્દ્રમણ્ડલ-
પ્રણયોપયાતનવતારકારુચિમ્ ॥ ૧૮.૭॥ ૬૧૭॥

ચન્દ્રચૂડમકુટેન લાલિતા ચારુમૌક્તિકમયૂખપાણ્ડરા ।
રઙ્ગનાથપદપદ્મસઙ્ગિની લક્ષ્યસે સુરધુનીવ પાદુકે ॥ ૧૮.૮॥ ૬૧૮॥

યે ભજન્તિ ભવતીં તવૈવ તે
મૌક્તિકદ્યુતિવિકલ્પગઙ્ગયા ।
વર્ધયન્તિ મધુવૈરિપાદુકે
મૌલિચન્દ્રશકલસ્ય ચન્દ્રિકામ્ ॥ ૧૮.૯॥ ૬૧૯॥

મુક્તામયૂખૈર્નિયતં ત્વદીયૈ-
રાપૂરયિષ્યન્નવતંસચન્દ્રમ્ ।
બિભર્તિ રઙ્ગેશ્વરપાદરક્ષે
દેવો મહાન્ દર્શિતસન્નતિસ્ત્વામ્ ॥ ૧૮.૧૦॥ ૬૨૦॥

પરિષ્કૃતા મૌક્તિકરશ્મિજાલૈઃ
પદસ્ય ગોપ્ત્રી ભવતી મુરારેઃ ।
ભવત્યનેકોર્મિસમાકુલાનાં
પુંસાં તમસ્સાગરપોતપાત્રી ॥ ૧૮.૧૧॥ ૬૨૧॥

રઙ્ગેશપાદપ્રતિપન્નભોગાં
રત્નાનુવિદ્ધૈર્મહિતાં શિરોભિઃ ।
મુક્તાવદાતાં મણિપાદુકે ત્વાં
મૂર્તિં ભુજઙ્ગાધિપતેઃ પ્રતીમઃ ॥ ૧૮.૧૨॥ ૬૨૨॥

મુકુન્દપાદાવનિ મૌક્તિકૈસ્તે
    જ્યોત્સ્નામયં વિશ્વમિદં દિવાઽપિ ।
વૈમાનિકાનાં ન ભજન્તિ યેન
    વ્યાકોચતામઞ્જલિપદ્મકોશાઃ ॥ ૧૮.૧૩॥ ૬૨૩॥

સમાશ્રિતાનામનઘાં વિશુદ્ધિં
    ત્રાસવ્યપાયં ચ વિતન્વતી ત્વમ્ ।
સાયુજ્યમાપાદયસિ સ્વકીયૈ-
    ર્મુક્તાફલૈર્માધવપાદુકે નઃ ॥ ૧૮.૧૪॥ ૬૨૪॥

અવૈમિ પાદાવનિ મૌક્તિકાનાં
    કીર્ણામુદગ્રૈઃ કિરણપ્રરોહૈઃ ।
યાત્રોત્સવાર્થં વિહિતાં મુરારે-
    રભઙ્ગુરામઙ્કુરપાલિકાં ત્વામ્ ॥ ૧૮.૧૫॥ ૬૨૫॥

શિવત્વહેતું સકલસ્ય જન્તોઃ
    સ્રોતોવિશેષૈઃ સુભગામસઙ્ખ્યૈઃ ।
મુક્તામયૂખૈઃ સુરસિન્ધુમન્યાં
    પુષ્ણાસિ રઙ્ગેશ્વરપાદુકે ત્વમ્ ॥ ૧૮.૧૬॥ ૬૨૬॥

રઙ્ગેશયાનસ્ય પદાવનિ ત્વાં
    લાવણ્યસિન્ધોઃ સવિધે નિષણ્ણામ્ ।
પરિસ્ફુરન્મૌક્તિકજાલદૃશ્યાં
    પ્રસૂતિભિન્નાં પ્રતિયન્તિ શુક્તિમ્ ॥ ૧૮.૧૭॥ ૬૨૭॥

અવૈમિ રઙ્ગેશ્વરપાદરક્ષે
    મુક્તાફલાનિ ત્વયિ નિસ્તુલાનિ ।
તેનૈવ કલ્પાન્તરતારકાણા-
    મુપ્તાનિ બીજાનિ જગદ્વિધાત્રા ॥ ૧૮.૧૮॥ ૬૨૮॥

વિક્રમ્યમાણમભવત્ ક્શણમન્તરિક્ષં
    માયાવિના ભગવતા મણિપાદરક્ષે ।
વ્યોમાપગાવિપુલબુદ્બુદદર્શનીયૈ-
    ર્મુક્તાફલૈસ્તવ શુભૈઃ પુનરુક્તતારમ્ ॥ ૧૮.૧૯॥ ૬૨૯॥

લક્ષ્મીવિહારરસિકેન પદાવનિ ત્વં
    રક્ષાવિધૌ ભગવતા જગતો નિયુક્તા ।

યત્ત્વં તદર્હમિવ દર્શયસિ પ્રભૂતં var સત્ત્વં
 મુક્તામયૂખનિકરેણ વિસૃત્વરેણ ॥ ૧૮.૨૦॥ ૬૩૦॥

પાદાર્પણેન ભવતીં પ્રતિપદ્યમાને
 શ્રીરઙ્ગચન્દ્રમસિ સમ્ભૃતમૌક્તિકશ્રીઃ ।
અઙ્ગીકરોષિ ચરણાવનિ કાન્તિમગ્ર્યા-
 મુદ્ભિદ્યમાનકુમુદેવ કુમુદ્વતી ત્વમ્ ॥ ૧૮.૨૧॥ ૬૩૧॥

ત્ર્યન્તહર્મ્યતલવર્ણસુધાયિતેન
 જ્યોત્સ્નાઇકલ્પિતરુચા મણિપાદુકે ત્વમ્ ।
મુક્તામયી મુરભિદઙ્ઘ્રિસરોજભાજાં
 વર્ણેન તે શમયસીવ સતામવર્ણમ્ ॥ ૧૮.૨૨॥ ૬૩૨॥

વૈકુણ્ઠપાદનખવાસનયેવ નિત્યં
 પાદાવનિ પ્રસુવતે તવ મૌક્તિકાનિ ।
અચ્છિન્નતાપશમનાય સમાશ્રિતાના-
 માલોકમણ્ડલમિષાદમૃતપ્રવાહમ્ ॥ ૧૮.૨૩॥ ૬૩૩॥

રામાનુવૃત્તિજટિલે ભરતસ્ય મૌલૌ
 રઙ્ગાધિરાજપદપઙ્કજરક્ષિણિ ત્વમ્ ।
એકાતપત્રિતજગત્રિતયા દ્વિતીયં
 મુક્તાંશુભિઃ કૃતવતી નવમાતપત્રમ્ ॥ ૧૮.૨૪॥ ૬૩૪॥

પાદાવનિ સ્ફુટમયૂખમધુપ્રવાહા
 મુગ્ધા પરિસ્ફુરતિ મૌક્તિકપદ્ધતિસ્તે ।
રૂઢસ્ય રઙ્ગપતિપાદસરોજમધ્યે
 રેખાત્મનઃ સુરતરોરિવ પુષ્પપઙ્ક્તિઃ ॥ ૧૮.૨૫॥ ૬૩૫॥

આમ્રેડિતૈઃ પદનખેન્દુરુચા મનોજ્ઞૈ-
 ર્મુક્તાંશુભિર્મુરભિદો મણિપાદુકે ત્વમ્ ।
સ્વાભાવિકીં સકલજન્તુષુ સાર્વભૌમીં
 પ્રાયઃ પ્રસક્તિમમલાં પ્રકટિકરોષિ ॥ ૧૮.૨૬॥ ૬૩૬॥

નિસ્સીમપઙ્કમલિનં હૃદયં મદીયં
 નાથસ્ય રઙ્ગવસતેરધિરોઢુમિચ્છોઃ ।
માતસ્તવૈવ સહસા મણિપાદરક્ષે
 મુક્તાંશવઃ સ્ફટિકસૌધતુલાં નયન્તિ ॥ ૧૮.૨૭॥ ૬૩૭॥

શ્યામા તનુર્ભગવતઃ પ્રતિપન્નતારા
    ત્વં ચન્દ્રિકા વિમલમૌક્તિકદર્શનીયા ।
સ્થાને તદેતદુભયં મણિપાદરક્ષે
    બોધં ક્ષણાન્નયતિ બુદ્ધિકુમુદ્વતીં નઃ ॥ ૧૮.૨૮॥ ૬૩૮॥

ઉદ્ગાઢપઙ્કશમનૈર્મણિપાદરક્ષે
    મુક્તાંશુભિર્મુરભિદો નખરશ્મિભિન્નૈઃ ।
ચૂડાપદેષુ નિહિતા ત્રિદશેશ્વરાણાં
    તીર્થોદકૈઃ સ્નપયસીવ પદાર્થિનસ્તાન્ ॥ ૧૮.૨૯॥ ૬૩૯॥

રઙ્ગેશપાદનખચન્દ્રસુધાનુલેપં
    સંપ્રાપ્ય સિદ્ધગુલિકા ઇવ તાવકીનાઃ ।
સંસારસઞ્જ્વરજુષાં મણિપાદરક્ષે
    સઞ્જીવનાય જગતાં પ્રભવન્તિ મુક્તાઃ ॥ ૧૮.૩૦॥ ૬૪૦॥

ભાવોત્તરૈરધિગતા ભરતપ્રધાનૈઃ
    પ્રત્યુપ્તમૌક્તિકમિષેણ વિકીર્ણપુષ્પા ।
રઙ્ગેશ્વરસ્ય નિયતં ત્વયિ લાસ્યભાજો
    રઙ્ગસ્થલીવ લલિતા મણિપાદુકે ત્વમ્ ॥ ૧૮.૩૧॥ ૬૪૧॥

મન્યે મુકુન્દચરણાવનિ મૌલિદેશે
    વિન્યસ્ય દેવિ ભવતીં વિનતસ્ય શમ્ભોઃ ।
આપાદયન્ત્યધિકૃતાઃ પ્રતિપન્નતારં
    ચૂડાતુષારકિરણં તવ મૌક્તિકૌઘૈઃ ॥ ૧૮.૩૨॥ ૬૪૨॥

પદ્માપતેર્વિહરતઃ પ્રિયમાચરન્તી
    મુક્તામયૂખનિવહૈઃ પુરતો વિકીર્ણૈઃ ।
કન્દાનિ કાઞ્ચનપદાવનિ પદ્મિનીનાં
    મન્યે વિનિક્ષિપસિ મન્દિરદીર્ઘિકાસુ ॥ ૧૮.૩૩॥ ૬૪૩॥

આશાસ્ય નૂનમનઘાં મણિપાદરક્ષે
    ચન્દ્રસ્ય વારિધિસુતાસહજસ્ય વૃદ્ધિમ્ ।
ધાત્રીં મુકુન્દપદયોરનપાયિનીં ત્વાં
    જ્યોત્સ્ના સમાશ્રયતિ મૌક્તિકપઙ્ક્તિલક્ષ્યાત્ ॥ ૧૮.૩૪॥ ૬૪૪॥

યે નામ કેઽપિ ભવતીં વિનયાવનમ્રૈ-

રુત્તંસયન્તિ કૃતિનઃ ક્શણમુત્તમાઙ્ગૈઃ ।
ઇ(ઋ)ચ્છન્તિ રઙ્ગનૃપતેર્મણિપાદરક્ષે
ત્વન્મૌક્તિકૌઘનિયતામિહ તે વિશુદ્ધિમ્ ॥ ૧૮.૩૫॥ ૬૪૫॥

અનુદિનલલિતાનામઙ્ગુલીપલ્લવાનાં
જનિતમુકુલશોભૈર્દેવિ મુક્તાફલૈસ્ત્વમ્ ।
પ્રકટયસિ જનાનાં પાદુકે રઙ્ગભર્તુઃ
પદસરસિજરેખાપાઞ્ચજન્યપ્રસૂતિમ્ ॥ ૧૮.૩૬॥ ૬૪૬॥

બલિવિમથનવેલાવ્યાપિનસ્તસ્ય વિષ્ણોઃ
પદસરસિજમાધ્વી પાવની દેવિ નૂનમ્ ।
જનનસમયલગ્નાં જાહ્નવી તાવકાનાં
વહતિ ચરણરક્ષે વાસનાં મૌક્તિકાનામ્ ॥ ૧૮.૩૭॥ ૬૪૭॥

મધુરિપુપદમિત્રૈર્વૈરમિન્દોઃ સરોજૈઃ
શમયિતુમિવ તારાઃ સેવમાનાશ્ચિરં ત્વામ્ ।
પ્રચુરકિરણપૂરાઃ પાદુકે સંશ્રિતાનાં
કલિકલુષમશેષં ક્ષાલયન્તીવ મુક્તાઃ ॥ ૧૮.૩૮॥ ૬૪૮॥

મુકુલિતપરિતાપાં પ્રાણિનાં મૌક્તિકૈઃ સ્વૈ-
રમૃતમિવ દુહાનામાદ્રિયે પાદુકે ત્વામ્ ॥ ૧૮.૩૯॥ ૬૪૯॥

સકૃદપિ વિનતાનાં ત્રાસમુન્મૂલયન્તીં
ત્રિભુવનમહનીયાં ત્વામુપાશ્રિત્ય નૂનમ્ ।
ન જહતિ નિજકાન્તિં પાદુકે રઙ્ગભર્તુ-
શ્ચરણનખમણીનાં સન્નિધૌ મૌક્તિકાનિ ॥ ૧૮.૪૦॥ ૬૫૦॥

ભુવનમિદમશેષં બિભ્રતો રઙ્ગભર્તુઃ
પદકમલમિદં તે પાદુકે ધારયન્ત્યાઃ ।
ચિરવિહરણખેદાત્ સમ્ભૃતાનાં ભજન્તિ
શ્રમજલકણિકાનાં સમ્પદં મૌક્તિકાનિ ॥ ૧૮.૪૧॥ ૬૫૧॥

પ્રકટિતયશસાં તે પાદુકે રઙ્ગભર્તુ-
ર્દ્વિગુણિતનખચન્દ્રજ્યોતિષાં મૌક્તિકાનામ્ ।
કરણવિલયવેલાકાતરસ્યાસ્ય જન્તોઃ
શમયતિ પરિતાપં શાશ્વતી ચન્દ્રિકેયમ્ ॥ ૧૮.૪૨॥ ૬૫૨॥

દિવ્યં ધામ સ્થિરમભિયતાં દેવિ મુક્તામણીનાં
મધ્યે કશ્ચિદ્ભવતિ મધુજિત્પાદુકે તાવકાનામ્ ।
ન્યસ્તો નિત્યં નિજગુણગણવ્યક્તિહેતોર્ભવત્યા-
માત્મજ્યોતિશ્શમિતતમસાં યોગિનામન્તરાત્મા ॥ ૧૮.૪૩॥ ૬૫૩॥

શુદ્ધે નિત્યં સ્થિરપરિણતાં દેવિ વિષ્ણોઃ પદે ત્વા-
માસ્થાનીં તામમિતવિભવાં પાદુકે તર્કયામિ ।
આલોકૈઃ સ્વૈર્ભુવનમખિલં દીપવદ્વ્યાપ્ય કામં
મુક્તાઃ શુદ્ધિં યદુપસદનાદ્ બિભ્રતિ ત્રાસહીનાઃ ॥ ૧૮.૪૪॥ ૬૫૪॥

પ્રાપ્તા શૌરેશ્ચરણકમલં પાદુકે ભક્તિભાજાં
પ્રત્યાદેષ્ટું કિમપિ વૃજિનં પ્રાપિતા મૌલિભાગમ્ ।
દેવેન ત્વં દશશતદૃશા દન્તિરાજસ્ય ધત્સે
મૂર્ધ્નિ ન્યસ્તા મુખપટરુચિં મૌક્તિકાનામ્પ્રભાભિઃ ॥ ૧૮.૪૫॥ ૬૫૫॥

તવ હરિપાદુકે પૃથુલમૌક્તિકરત્નભુવઃ
પ્રચલદમર્ત્યસિન્ધુલહરીસહધર્મચરાઃ ।
પદમજરામરં વિદધતે કથમમ્બ સતાં
પ્રણતસુરેન્દ્રમૌલિપલિતઙ્કરણાઃ કિરણાઃ ॥ ૧૮.૪૬॥ ૬૫૬॥

કપર્દે કસ્યાપિ ક્ષિતિધરપદત્રાયિણિ તથા
મુહુર્ગઙ્ગામન્યાં ક્ષરતિ તવ મુક્તામણિમહઃ ।
મુધારમ્ભઃ કુમ્ભસ્થલમનુકલં સિઞ્ચતિ યથા
નિરાલમ્બો લમ્બોદરકલભશુણ્ડારચુલકઃ ॥ ૧૮.૪૭॥ ૬૫૭॥

મુકુન્દપદરક્ષિણિ પ્રગુણદીપ્તયસ્તાવકાઃ
ક્ષરન્ત્યમૃતનિર્ઝરં કમપિ મૌક્તિકગ્રન્થયઃ ।
મનાગપિ મનીષિણો યદનુષઙ્ગિનસ્તત્ક્ષણા-
જ્જરામરણદન્તુરં જહતિ હન્ત તાપત્રયમ્ ॥ ૧૮.૪૮॥ ૬૫૮॥

દેવઃ શ્રીપદલાક્ષયા તિલકિતસ્તિષ્ઠત્યુપર્યેવ તે
ગૌરીપાદસરોજયાવકધની મૂલે સમાલક્ષ્યતે ।
ઇત્થં જલ્પતિ દુર્મદાન્મુરભિદઃ શુદ્ધાન્તચેટીજને
પ્રાયસ્ત્વં મણિપાદુકે પ્રહસિતા મુક્તામયૂખચ્છલાત્ ॥ ૧૮.૪૯॥ ૬૫૯॥

રઙ્ગેશચરણરક્ષા સા મે વિદધાતુ શાશ્વતીં શુદ્ધિમ્ ।
યન્મૌક્તિકપ્રભાભિઃ શ્વેતદ્વીપમિવ સહ્યજાદ્વીપમ્ ॥ ૧૮.૫૦॥ ૬૬૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
મુક્તાપદ્ધતિરષ્ટાદશી ॥

## ૧૯. મરકતપદ્ધતિઃ (૨૦)

વન્દે ગારુત્મતીં વૃત્ત્યા મણિસ્તોમૈશ્ચ પાદુકામ્ ।
યયા નિત્યં તુલસ્યેવ હરિતત્વં પ્રકાશ્યતે ॥ ૧૯.૧॥ ૬૬૧॥

સવિલાસગતેષુ રઙ્ગભર્તુ-
    સ્ત્વદધીનેષુ બહિષ્કૃતો ગરુત્માન્ ।
અધિગચ્છતિ નિર્વૃતિં કથઞ્ચિ-
    ન્નિજરત્નૈસ્ત્વયિ પાદુકે નિવિષ્ટૈઃ ॥ ૧૯.૨॥ ૬૬૨॥

સમયે મણિપાદુકે મુરારે-
    ર્મુહુરન્તઃપુરમુગ્ધચેટિકાસ્તે ।
હરિતાન્ હરિદશ્મનાં મયૂખાં-
    સ્તુલસીપલ્લવશઙ્કયા ક્ષિપન્તિ ॥ ૧૯.૩॥ ૬૬૩॥

હરિતઃ સહસા હરિન્મણીનાં
    પ્રભયા રઙ્ગનરેન્દ્રપાદરક્ષે ।
તુલસીદલસમ્પદં દધાતિ
    ત્વયિ ભક્તૈર્નિહિતઃ પ્રસૂનરાશિઃ ॥ ૧૯.૪॥ ૬૬૪॥

પ્રસાદયન્તી મણિપાદુકે ત્વં
    વિક્શેપયોગેન વિહારવેલામ્ ।
હરિન્મનોજ્ઞા હરિકાન્તિસિન્ધોઃ
    સન્દૃશ્યસે શૈવલમઞ્જરીવ ॥ ૧૯.૫॥ ૬૬૫॥

બધ્નાસિ રઙ્ગેશ્વરપાદરક્ષે
    હરિન્મણીનાં પ્રભયા સ્ફુરન્ત્યા ।
ચૂડાપદેષુ શ્રુતિસુન્દરીણાં
    માઙ્ગલ્યદૂર્વાઙ્કુરમાલ્યપઙ્ક્તિમ્ ॥ ૧૯.૬॥ ૬૬૬॥

અચ્છેદ્યરશ્મિનિયતૈર્ઘટિતા હરિદ્ભિઃ

    સદ્વર્ત્મના ગતિમતી મણિપાદરક્ષે ।
સન્દૃશ્યસે સવિતૃમણ્ડલમધ્યભાજો
    રઙ્ગેશ્વરસ્ય રથસમ્પદિવાપરા ત્વમ્ ॥ ૧૯.૭॥ ૬૬૭॥

શ્યામાયમાનનિગમાન્તવનોપકણ્ઠાઃ
    સ્થાને પદાવનિ હરિન્મણયસ્ત્વદીયાઃ ।
પર્યન્તશાદ્વલવતીં પ્રથયન્તિ નિત્યં
    નારાયણસ્ય રુચિરાં નખરશ્મિગઙ્ગામ્ ॥ ૧૯.૮॥ ૬૬૮॥

ઉદ્દિશ્ય કામપિ ગતિં મણિપાદરક્ષે
    રઙ્ગેશ્વરસ્ય ચરણે વિનિવેશિતાત્મા ।
પ્રાયો હરિન્મણિરુચા દૃઢભક્તિબન્ધા
    પ્રાદુષ્કરોતિ ભવતી તુલસીવનાનિ ॥ ૧૯.૯॥ ૬૬૯॥

સેવાર્થમાગતવતાં ત્રિદશેશ્વરાણાં
    ચૂડામણિપ્રકરશાલિષુ મૌલિષુ ત્વમ્ ।
સંવર્તયસ્યસુરમર્દનપાદરક્ષે
    સ્વેનાશ્મગર્ભમહસા શુકપઙ્ક્તિશોભામ્ ॥ ૧૯.૧૦॥ ૬૭૦॥

દરપરિણતદૂર્વાવલ્લરીનિર્વિશેષૈ-
    ર્મરકતશકલાનાં માંસલૈરંશુજાલૈઃ ।
પશુપતિવિધૃતા ત્વં તસ્ય પાણૌ નિષણ્ણં
    મધુરિપુપદરક્ષે વઞ્ચયસ્યેણશાવમ્ ॥ ૧૯.૧૧॥ ૬૭૧॥

હરિચરણસરોજન્યાસયોગ્યં ભવત્યાઃ
    પ્રગુણમભિલષન્ત્યો વર્ણલાભં તુલસ્યઃ ।
પ્રતિદિનમુપહારૈઃ પાદુકે તાવકાનાં
    મરતકશકલાનામાશ્રયન્તે મયૂખાન્ ॥ ૧૯.૧૨॥ ૬૭૨॥

હરિતમણિમયૂખૈરઞ્ચિતાધ્યાત્મગન્ધૈ-
    ર્દિશસિ ચરણરક્ષે જાતકૌતૂહલા ત્વમ્ ।
દનુજમથનલીલાદારિકાણામુદારાં
    દમનકદલપઙ્ક્તિં દેવિ મૌલૌ શ્રુતીનામ્ ॥ ૧૯.૧૩॥ ૬૭૩॥

અધિગતબહુશાખૈરશ્મગર્ભપ્રસૂતૈ-
    ર્મધુરિપુપદરક્ષે મેચકૈરંશુજાલૈઃ ।
અનિતરશરણાનાં નૂનમારણ્યકાનાં

કિમપિ જનયસિ ત્વં કીચકારણ્યદુર્ગમ્ ॥ ૧૯.૧૪॥ ૬૭૪॥

પ્રચુરનિગમશાખાં પાદુકે રઙ્ગિણસ્ત્વાં
ચરણનખમયૂખૈશ્ચારુપુષ્પાનુબન્ધામ્ ।
મરતકદલરમ્યાં મન્મહે સઞ્જરન્તીં
કનકસરિદનૂપે કાઞ્ચિદુદ્યાનલક્ષ્મીમ્ ॥ ૧૯.૧૫॥ ૬૭૫॥

નખકિરણનિકાયૈર્નિત્યમાવિર્મૃણાલે
મહિતરસવિશેષે મેચકૈરંશુભિસ્તે ।
પરિકલયસિ રમ્યાં પાદુકે રઙ્ગભર્તુઃ
પદકમલસમીપે પદ્મિનીપત્રપઙ્ક્તિમ્ ॥ ૧૯.૧૬॥ ૬૭૬॥

અનિમિષયુવતીનામાર્તનાદોપશાન્ત્યૈ
ત્વયિ વિનિહિતપાદે લીલયા રઙ્ગનાથે ।
દધતિ ચરણરક્ષે દૈત્યસૌધાનિ નૂનં
મરકતરુચિભિસ્તે મઙ્ક્ષુ દૂર્વાઙ્કુરાણિ ॥ ૧૯.૧૭॥ ૬૭૭॥

વિપુલતમમહોભિર્વીતદોષાનુષઙ્ગં
વિલસદુપરિનૈલ્યં દેવિ વિષ્ણોઃ પદં તત્ ।
પૃથુમરકતદૃશ્યાં પ્રાપ્ય પાદાવનિ ત્વાં
પ્રકટયતિ સમન્તાત્ સંપ્રયોગં હરિદ્ભિઃ ॥ ૧૯.૧૮॥ ૬૭૮॥

પદ્માભૂમ્યોઃ પ્રણયસરણિર્યત્ર પર્યાયહીના
યત્સંસર્ગાદનઘચરિતાઃ પાદુકે કામચારાઃ ।
તારાસક્તં તમિહ તરુણં પ્રીણયન્તે જરત્યો
નિત્યશ્યામાસ્તવ મરતકૈર્નૂનમામ્નાયવાચઃ ॥ ૧૯.૧૯॥ ૬૭૯॥

સ્થલકમલીનીવ કાચિચ્ચરણાવનિ ભાસિ કમલવાસિન્યાઃ ।
યન્મરતકદલમધ્યે યઃ કશ્ચિદસૌ સમીક્ષ્યતે શૌરિઃ ॥ ૧૯.૨૦॥ ૬૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
મરતકપદ્ધતિરેકોનવિંશી ॥

## ૨૦. ઇન્દ્રનીલપદ્ધતિઃ (૩૦)

હરિણા હરિનીલૈશ્ચ પ્રતિયત્નવતીં સદા ।
અયત્નલભ્યનિર્વાણામાશ્રયે મણિપાદુકામ્ ॥ ૨૦.૧॥ ૬૮૧॥

હરિરત્નમરીચયસ્તવૈતે નવનીલીરસનિર્વિશેષવર્ણાઃ ।
શ્રુતિમૂર્ધનિ શૌરિપાદરક્ષે પલિતાનુદ્ભવભેષજં ભવન્તિ ॥ ૨૦.૨॥ ૬૮૨॥

અલકૈરિવ બિમ્બિતૈઃ શ્રુતીનાં
હરિનીલૈઃ સૃજસિ ત્વમુન્મયૂખૈઃ ।
કમલાદયિતસ્ય પાદરક્ષે
કરુણોદન્વતિ શૈવલપ્રરોહાન્ ॥ ૨૦.૩॥ ૬૮૩॥

અનઘૈર્હરિનીલપદ્ધતીનાં પ્રથમાનૈર્મણિપાદુકે મયૂખૈઃ ।
અધરીકુરુષે રથાઙ્ગપાણેરમિતામૂર્ધ્વમવસ્થિતસ્ય કાન્તિમ્ ॥ ૨૦.૪॥ ૬૮૪॥

ચરણાવનિ ભાતિ સહ્યકન્યા હરિનીલદ્યુતિભિસ્તવાનુવિદ્ધા ।
વસુદેવસુતસ્ય રઙ્ગવૃત્તેર્યમુનેવ સ્વયમાગતા સમીપમ્ ॥ ૨૦.૫॥ ૬૮૫॥

અવધીરિતદેવતાન્તરાણામનઘૈસ્ત્વં મણિપાદુકે મયૂખૈઃ ।
હરિનીલસમુદ્ભવૈર્વિધત્સે હરિસારૂપ્યમયત્નતો જનાનામ્ ॥ ૨૦.૬॥ ૬૮૬॥

નેત્રેષુ પુંસાં તવ પાદરક્ષે
નીલાશ્મભાસા નિહિતાઞ્જનેષુ ।
શ્રિયા સમં સંશ્રિતરઙ્ગકોશો
નિધિઃ સ્વયં વ્યક્તિમુપૈતિ નિત્યમ્ ॥ ૨૦.૭॥ ૬૮૭॥

અભઙ્ગુરામચ્યુતપાદરક્ષે માન્યાં મહાનીલરુચિં ત્વદીયામ્ ।
નિશ્શ્રેયસદ્વારકવાટિકાયાઃ શઙ્કે સમુત્પાનકુઞ્ચિકાં નઃ ॥ ૨૦.૮॥ ૬૮૮॥ var સમુદ્ઢાટન
જીવયત્યમૃતવર્ષિણી પ્રજાસ્તાવકી દનુજવૈરિપાદુકે ।
ઘોરસંસરણઘર્મનાશિની કાલિકેવ હરિનીલપદ્ધતિઃ ॥ ૨૦.૯॥ ૬૮૯॥

શતમખોપલભઙ્ગમનોહરા વિહરસે મુરમર્દનપાદુકે ।
મણિકિરીટગણેષુ દિવૌકસાં મધુકરીવ મનોહરપઙ્ક્તિષુ ॥ ૨૦.૧૦॥ ૬૯૦॥

અન્વિચ્છતાં કિમપિ તત્ત્વમનન્યદૃશ્યં
સમ્યક્પ્રકાશજનની ધૃતકૃષ્ણરૂપા ।
પાદાવનિ સ્ફુરસિ વાસવરત્નરમ્યા
મધ્યે સમાધિનયનસ્ય કનીનિકેવ ॥ ૨૦.૧૧॥ ૬૯૧॥

માતઃ સલીલમધિગમ્ય વિહારવેલાં
    કાન્તિં સમુદ્વહસિ કાઞ્ચનપાદુકે ત્વમ્ ।
લક્ષ્મીકટાક્ષરુચિરૈર્હરિનીલરત્નૈ-
    ર્લાવણ્યસિન્ધુપૃષતૈરિવ રઙ્ગધામ્નઃ ॥ ૨૦.૧૨॥ ૬૯૨॥

ક્લૃપ્તાવકુણ્ઠનવિધિર્મણિપાદરક્ષે
    નીલાંશુકૈર્વલભિદશ્મસમુદ્ભવૈસ્તે ।
સઙ્ગચ્છતે મુનિજનસ્ય મતિઃ સમાધૌ
    રાત્રૌ સમસ્તજગતાં રમણેન લક્ષ્મ્યાઃ ॥ ૨૦.૧૩॥ ૬૯૩॥

દ્રષ્ટું કદાચન પદાવનિ નૈવ જન્તુઃ
    શક્નોતિ શાશ્વતનિધિં નિહિતં ગુહાયામ્ ।
કૃષ્ણાનુરૂપહરિનીલવિશેષદૃશ્યા
    સિદ્ધાઞ્જનં ત્વમસિ યસ્ય ન દેવિ દૃષ્ટેઃ ॥ ૨૦.૧૪॥ ૬૯૪॥

પ્રત્યેમિ રઙ્ગનૃપતેર્મણિપાદુકે ત્વાં
    કૃષ્ણાન્તરઙ્ગરુચિભિર્હરિનીલરત્નૈઃ ।
વિશ્વાપરાધસહનાય પદં તદીયં
    વિશ્વમ્ભરાં ભગવતીં સમયે ભજન્તીમ્ ॥ ૨૦.૧૫॥ ૬૯૫॥

મત્વા મર્ષીં પરિમિતાં ભવતી તદન્યાં
    વૈકુણ્ઠપાદરસિકે મણિપાદુકે સ્વાન્ ।
અઙ્ક્તે સ્વયં કિરણલેપિભિરિન્દ્રનીલૈ-
    રાશાતટેષુ લલિતાનપદાનવર્ણાન્ ॥ ૨૦.૧૬॥ ૬૯૬॥

વલમથનમણીનાં ધામભિસ્તાવકાનાં
    મધુરિપુપદરક્ષે વાસરૈરવ્યપેતા ।
અભિસરણપરાણાં વલ્લવીનાં તદાઽઽસી-
    ચ્છમિતગુરુભયાર્તિઃ શર્વરી કાચિદન્યા ॥ ૨૦.૧૭॥ ૬૯૭॥

શતમખમણિભઙ્ગૈરુન્મયૂખૈર્દિશન્તી
    શરણમુપગતાનાં રઙ્ગનાથેન સામ્યમ્ ।
પ્રથયસિ જગતિ ત્વં પાદુકે હૈતુકાના-
    મુપનિષદુપગીતાં તત્ક્રતુન્યાયવાર્તામ્ ॥ ૨૦.૧૮॥ ૬૯૮॥

પરિચરતિ વિધૌ ત્વાં પાદુકે રઙ્ગભર્તુઃ

પદસરસિજભૃઙ્ગૈર્ભાસુરૈરિન્દ્રનીલૈઃ ।
પ્રકટિતયમુનૌઘા ભક્તિનમ્રસ્ય શમ્ભોઃ
પરિણમયસિ ચૂડાવિષ્ણુપદ્યાઃપ્રયાગમ્ ॥ ૨૦.૧૯॥ ૬૯૯॥

પદકિસલયસઙ્ગાત્પાદુકે પત્રલશ્રી-
ર્નખમણિભિરુદારૈર્નિત્યનિષ્પન્નપુષ્પા ।
શતમખમણિનીલા શૌરિલાવણ્યસિન્ધો-
ર્નિબિડતમતમાલા કાઽપિ વેલાવની ત્વમ્ ॥ ૨૦.૨૦॥ ૭૦૦॥

ત્વયિ વિનિહિતમેતત્ કેઽપિ પશ્યન્તિ મન્દાઃ
શતમખમણિજાલં શાર્ઙ્ગિણઃ પાદરક્ષે ।
વયમિદમિહ વિદ્મઃ પ્રાણિનાં ભાવુકાનાં
હૃદયગૃહગુહાભ્યઃ પીતમન્ધં તમિસ્રમ્ ॥ ૨૦.૨૧॥ ૭૦૧॥

ક્લૃપ્તશ્યામા મણિભિરસિતૈઃ કૃષ્ણપક્ષેણ જુષ્ટા
શ્રેયઃ પુંસાં જનયસિ ગતિં દક્ષિણામુદ્વહન્તી ।
તેનાસ્માકં પ્રથયસિ પરં પાદુકે તત્ત્વવિદ્ભિ-
ર્મૌલૌ દૃષ્ટાં નિગમવચસાં મુક્તિકાલાવ્યવસ્થામ્ ॥ ૨૦.૨૨॥ ૭૦૨॥

સદ્ભિર્જુષ્ટા સમુદિતવિધુર્જૈત્રયાત્રાવિનોદે-
ષ્વાતન્વાના રજનિમનઘામિન્દ્રનીલાંશુજાલૈઃ ।
ચિત્રં ખ્યાતા કુમુદવનતઃ પાદુકે પુષ્યસિ ત્વં
વ્યાકોચત્વંવિબુધવનિતાવક્ત્રપઙ્કેરુહાણામ્ ॥ ૨૦.૨૩॥ ૭૦૩॥

નિત્યં લક્ષ્મીનયનરુચિભિઃ શોભિતા શક્રનીલૈઃ
સાલગ્રામક્ષિતિરિવ શુભૈઃ શાર્ઙ્ગિણો રૂપભેદૈઃ ।
સાકેતાદેઃ સમધિકગુણાં સમ્પદં દર્શયન્તી
મુક્તિક્ષેત્રં મુનિભિરખિલૈઃ પાદુકે ગીયસે ત્વમ્ ॥ ૨૦.૨૪॥ ૭૦૪॥

પાદન્યાસપ્રિયસહચરીં પાદુકે વાસગેહા-
ત્ત્વામારુહ્ય ત્રિચતુરપદં નિર્ગતે રઙ્ગનાથે ।
અન્તઃસ્નિગ્ધૈરસુરમહિલાવેણિવિક્ષેપમિત્રૈઃ
શ્યામચ્છાયં ભવતિ ભવનં શક્રનીલાંશુભિસ્તે ॥ ૨૦.૨૫॥ ૭૦૫॥

યા તે બાહ્યાઙ્ગણમભિયતઃ પાદુકે રઙ્ગભર્તુઃ
સઞ્ચારેષુ સ્ફુરતિ વિતતિઃ શક્રનીલપ્રભાયાઃ ।
વિષ્વક્સેનપ્રભૃતિભિરસૌ ગૃહ્યતે વેત્રહસ્તૈ-

ર્ભૂવિક્શેપસ્તવ દિવિષદાં નૂનમાહ્વાનહેતુઃ ॥ ૨૦.૨૬॥ ૭૦૬॥

અક્ષ્ણોરઞ્જનકલ્પના યવનિકા લાસ્યપ્રસૂતેર્ગતે-
શ્ચિદ્રઙ્ગાયમુના મુકુન્દજલધેર્વેલાતમાલાટવી ।
કાન્તાકુન્તલસન્તતિઃ શ્રુતિવધૂકસ્તૂરિકાલઙ્ક્રિયા
નિત્યં રત્નપદાવનિ સ્ફુરતિ તે નીલા મણિશ્રેણિકા ॥ ૨૦.૨૭॥ ૭૦૭॥

નિરન્તરપુરન્દરોપલભુવં દ્યુતિં તાવકી-
મવૈમિ મણિપાદુકે સરણિસઙ્ગિનીં રઙ્ગિણઃ ।
તદીયનવયૌવનદ્વિરદમલ્લગણ્ડસ્થલી-
ગલન્મદઝલઝ્ઝલાબહુલકજ્જલશ્યામિકામ્ ॥ ૨૦.૨૮॥ ૭૦૮॥

પ્રતીમસ્ત્વં પાદાવનિ ભગવતો રઙ્ગવસતે-
ર્ઘનીભૂતામિત્થં પદકમલમાધ્વીપરિણતિમ્ ।
સ્ફુરન્તઃ પર્યન્તે મદગરિમનિષ્પન્દમધુપ-
પ્રસક્તિં યત્રૈતે વિદધતિ મહાનીલમણયઃ ॥ ૨૦.૨૯॥ ૭૦૯॥

નમતાં નિર્જેન્દ્રનીલ-
પ્રભવેન મુકુન્દપાદુકે ભવતી ।
તમસા નિરસ્યતિ તમઃ
કણ્ટકમિવ કણ્ટકેનૈવ ॥ ૨૦.૩૦॥ ૭૧૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
ઇન્દ્રનીલપદ્ધતિર્વિંશી ॥

## ૨૧. બિમ્બપ્રતિબિમ્બપદ્ધતિઃ (૨૦)

શૌરેઃ શુદ્ધાન્તનારીણાં વિહારમણિદર્પણમ્ ।
પ્રસત્તેરિવ સંસ્થાનં પદત્રાણમુપાસ્મહે ॥ ૨૧.૧॥ ૭૧૧॥

કમલાપતિપાદુકે કદાચિ-
દ્વિહગેન્દ્રસ્ત્વયિ બિમ્બિતો બિભાતિ ।
સવિલાસગતેઽપિ રઙ્ગભર્તુ-
ર્નિજમાત્માનમિવોપધાતુકામઃ ॥ ૨૧.૨॥ ૭૧૨॥

મણિપઙ્ક્તિષુ તે દિશામધીશાઃ

પ્રતિબિમ્બાનિ નિજાનિ વીક્ષમાણાઃ ।
અભિયન્તિ મુકુન્દપાદુકે ત્વા-
મધિકારાન્તરસૃષ્ટિશઙ્કયેવ ॥ ૨૧.૩॥ ૭૧૩॥

મણિમૌલિશતેન બિમ્બિતેન
પ્રણતાનાં પરિતઃ સુરાસુરાણામ્ ।
મુરભિન્મણિપાદુકે મહિમ્ના
યુગપત્ તેષુ સમર્પિતેવ ભાસિ ॥ ૨૧.૪॥ ૭૧૪॥

ઉપનીતમુપાયનં સુરેન્દ્રૈઃ
પ્રતિબિમ્બચ્છલતસ્ત્વયિ પ્રવિષ્ટમ્ ।
સ્વયમેવ કિલ પ્રસાદભૂમ્ના
પ્રતિગૃહ્ણાસિ મુકુન્દપાદુકે ત્વમ્ ॥ ૨૧.૫॥ ૭૧૫॥

રઙ્ગેશ્વરસ્ય નવપલ્લવલોભનીયૌ
પાદૌ કથન્નુ કઠિના સ્વયમુદ્વહેયમ્ ।
ઇત્યાકલય્ય નિયતં મણિપાદુકે ત્વં
પદ્માસ્તરં વહસિ તત્પ્રતિબિમ્બલક્ષાત્ ॥ ૨૧.૬॥ ૭૧૬॥

પાદાર્પણાત્પ્રથમતો હરિદશ્મરમ્યે
મધ્યે તવ પ્રતિફલન્મણિપાદરક્ષે ।
મન્યે નિદર્શયતિ રઙ્ગપતિર્યુગાન્તે
ન્યગ્રોધપત્રશયિતં નિજમેવ રૂપમ્ ॥ ૨૧.૭॥ ૭૧૭॥

યાત્રાવસાનમધિગચ્છતિ રઙ્ગનાથે
વિશ્રાણયસ્યનુપદં મણિપાદુકે ત્વમ્ ।
પ્રાયઃ પ્રયાણસમયે પ્રતિબિમ્બિતાનાં
તીર્થાવગાહમપરં ત્રિદશેશ્વરાણામ્ ॥ ૨૧.૮॥ ૭૧૮॥

ઉચ્ચાવચેષુ તવ રત્નગણેષુ માત-
ર્વેધાઃ પ્રયાણસમયે પ્રતિબિમ્બિતાઙ્ગઃ ।
આશઙ્કતે મુરભિદો મણિપાદુકે ત્વા- var મધુભિદો
માગામિકલ્પકમલાસનપઙ્ક્તિગર્ભામ્ ॥ ૨૧.૯॥ ૭૧૯॥

આલોકરશ્મિનિયતાં મણિપાદુકે ત્વા-
મારુહ્ય સઞ્ચરતિ રઙ્ગપતૌ સલીલમ્ ।
અન્તઃપુરેષુ યુગપત્સુદૃશો ભજન્તે

ડોલાધિરોહણરસં ત્વયિ બિમ્બિતાઙ્ગ્યઃ ॥ ૨૧.૧૦॥ ૭૨૦॥

કાલેષુ રાઘવપદાવનિ ભક્તિનમ્રઃ
  કાર્યાણિ દેવિ ભરતો વિનિવેદયંસ્તે ।
ત્વદ્રત્નબિમ્બતતયાઽપિ મુહુઃ સ્વકીયાં
  રાજાસનસ્થિતિમવેક્ષ્ય ભૃશં લલજ્જે ॥ ૨૧.૧૧॥ ૭૨૧॥

પ્રત્યાગતે વિજયિનિ પ્રથમે રઘૂણાં
  વિન્યસ્યતિ ત્વયિ પદં મણિપાદરક્ષે ।
રત્નૌઘબિમ્બિતનિશાચરવાનરાં ત્વાં
  પૂર્વક્ષણસ્થમિવ પુષ્પકમન્વપશ્યન્ ॥ ૨૧.૧૨॥ ૭૨૨॥

વૈયાકુલીં શમયિતું જગતો વહન્ત્યા
  રક્ષાધુરાં રઘુધુરન્ધરપાદરક્ષે ।
પ્રાજ્યં યશઃ પ્રચુરચામરબિમ્બલક્ષા-
  ત્પ્રાયસ્ત્વયા કબલિતં પ્રતિભૂપતીનામ્ ॥ ૨૧.૧૩॥ ૭૨૩॥

પ્રતિદિશમુપયાતે દેવિ યાત્રોત્સવાર્થં
  ત્વયિ વિહરણકાલે બિમ્બિતે જીવલોકે ।
વહસિ મણિગણૈસ્ત્વં પાદુકે રઙ્ગભર્તુઃ
  કબલિતસકલાર્થાં કાઞ્ચિદન્યામવસ્થામ્ ॥ ૨૧.૧૪॥ ૭૨૪॥

ભગવતિ ગરુડસ્થે વાહનસ્થાઃ સુરેન્દ્રા-
  સ્ત્વયિ વિનિહિતપાદે ભૂમિમેવાશ્રયન્તિ ।
તદપિ ચરણરક્ષે રત્નજાલે ત્વદીયે
  પ્રતિફલિતનિજાઙ્ગાસ્તુલ્યવાહા ભવન્તિ ॥ ૨૧.૧૫॥ ૭૨૫॥

સ્વચ્છાકારાં સુરયુવતયઃ સ્વપ્રતિચ્છન્દલક્ષા-
  દ્વાહન્તે ત્વાં પ્રણતિસમયે પાદુકે સાભિમાનાઃ ।
સ્ત્રીરત્નાનાં પરિભવવિધૌ સૃષ્ટિમાત્રેણ દક્ષાં
  નીચૈઃકર્તું નરસખમુનેરુર્વશીમૂરુજાતામ્ ॥ ૨૧.૧૬॥ ૭૨૬॥

સ્વેચ્છાકેલિપ્રિયસહચરીં સ્વચ્છરત્નાભિરામાં
  સ્થાને સ્થાને નિહિતચરણો નિર્વિશન્ રઙ્ગનાથઃ ।
સઞ્ચારાન્તે સહ કમલયા શેષશય્યાધિરૂઢ-
  સ્ત્યક્ત્વાઽપિ ત્વાં ત્યજતિ ન પુનઃ સ્વપ્રતિચ્છન્દલક્ષાત્ ॥ ૨૧.૧૭॥ ૭૨૭॥

ત્વામેવૈકામધિગતવતઃ કેલિસઞ્ચારકાલે
પાર્શ્વે સ્થિત્વા વિનિહિતદૃશોઃ પાદુકેઽનન્યલક્ષ્યમ્ ।
ત્વદ્રત્નેષુ પ્રતિફલિતયોર્નિત્યલક્ષ્યપ્રસાદા
પદ્માભૂમ્યોર્દિશતિ ભવતી પાદસેવાં મુરારેઃ ॥ ૨૧.૧૮॥ ૭૨૮॥

એકામેકઃ કિલ નિરવિશત્પાદુકે દ્વારકાયાં
ક્રીડાયોગીકૃતબહુતનુઃ ષોડશસ્ત્રીસહસ્રે ।
શુદ્ધે દેવિ ત્વદુપનિહિતે બિમ્બિતોરત્નજાલે
ભુઙ્ક્તે નિત્યં સ ખલુ ભવતીં ભૂમિકાનાં સહસ્રૈઃ ॥ ૨૧.૧૯॥ ૭૨૯॥

હરિપદનખેષુ ભવતી પ્રતિફલતિ તવૈતદપિ રત્નેષુ ।
ઉચિતા મિથઃ પદાવનિ બિમ્બપ્રતિબિમ્બતા યુવયોઃ ॥ ૨૧.૨૦॥ ૭૩૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
બિમ્બપ્રતિબિમ્બપદ્ધતિરેકવિંશી ॥

## ૨૨. કાઞ્ચનપદ્ધતિઃ (૨૦)

કલ્યાણપ્રકૃતિં વન્દે
ભજન્તીં કાઞ્ચનશ્રિયમ્ ।
પદાર્હાં પાદુકાં શૌરેઃ
પદ એવ નિવેશિતામ્ ॥ ૨૨.૧॥ ૭૩૧॥

મધુજિત્તનુકાન્તિતસ્કરાણાં જલદાનામભયંવિધાતુકામા ।
ચપલેવ તદઙ્ઘ્રિમાશ્રયન્તી ભવતી કાઞ્ચનપાદુકે વિભાતિ ॥ ૨૨.૨॥ ૭૩૨॥

નિકષીકૃતરમ્યકૃષ્ણરત્ના ભવતી કાઞ્ચનસમ્પદં વ્યનક્તિ ।
પરિપુષ્યતિ પાદુકે યદીક્ષા સહસા નઃ સમલોષ્ટકાઞ્ચનત્વમ્ ॥ ૨૨.૩॥ ૭૩૩॥

સુરભિર્નિગમૈઃ સમગ્રકામા કનકોત્કર્ષવતી પદાવનિ ત્વમ્ ।
દિશસિ પ્રતિપન્નમાધવશ્રીરનિશોન્નિદ્રમશોકવૈભવં નઃ ॥ ૨૨.૪॥ ૭૩૪॥

સતિ વર્ણગુણે સુવર્ણજાતે
જગતિ ખ્યાતમસૌરભાદવર્ણમ્ ।
શ્રુતિસૌરભશાલિના સ્વહેમ્ના
ભવતી શૌરિપદાવનિ વ્યુદાસ્થત્ ॥ ૨૨.૫॥ ૭૩૫॥

પ્રતિપન્નમયૂરકણ્ઠધામ્ના પરિશુદ્ધેન પદાવનિ સ્વકેન ।
કમલાસ્તનભૂષણોચિતં તદ્ભવતી રત્નમલઙ્કરોતિ હેમ્ના ॥ ૨૨.૬॥ ૭૩૬॥

કાન્ત્યા પરં પુરુષમાપ્રણખાત્ સુવર્ણં
    કર્તું ક્ષમા ત્વમસિ કાઞ્ચનપાદરક્ષે ।
અન્યાદૃશીં દિશસિ યા વિનતસ્ય દૂરા-
    દારગ્વધસ્તબકસમ્પદમિન્દુમૌલેઃ ॥ ૨૨.૭॥ ૭૩૭॥

ચન્દ્રાકૃતિઃ કથમકલ્પયથાસ્તદાનીં
    વૈમાનિકપ્રણયિનીવદનામ્બુજાનામ્ ।
વિક્રાન્તિકાલવિતતેન નિજેન ધામ્ના
    બાલાતપં બલિવિમર્દનપાદુકે ત્વમ્ ॥ ૨૨.૮॥ ૭૩૮॥

લેભે તદાપ્રભૃતિ નૂનમિયં ભવત્યાઃ
    કાન્ત્યા કવેરતનયા કનકાપગાત્વમ્ ।
યાવન્મુકુન્દપદહેમપદાવનિ ત્વં
    પુણ્યં વિભૂષિતવતી પુલિનં તદીયમ્ ॥ ૨૨.૯॥ ૭૩૯॥

ચિત્રં સરોજનિલયાસહિતસ્ય શૌરે-
    ર્વાસોચિતાનિ ચરણાવનિ સંવિધિત્સોઃ ।
સદ્યો વિકાસમુપયાન્તિ સમાધિભાજાં
    ચન્દ્રાતપેન તવ માનસપઙ્કજાનિ ॥ ૨૨.૧૦॥ ૭૪૦॥

ત્વય્યેવ પાદમધિરોપ્ય નવં પ્રવાહં
    નાથે પદાવનિ નિશામયિતું પ્રવૃત્તે ।
આત્મીયકાઞ્ચનરુચા ભવતી વિધત્તે
    હેમારવિન્દભરિતામિવ હેમસિન્ધુમ્ ॥ ૨૨.૧૧॥ ૭૪૧॥

વિહરતિ પુલિનેષુ ત્વત્સખે રઙ્ગનાથે
    કનકસરિદિયં તે પાદુકે હેમધામ્ના ।
વહતિ સલિલકેલીસ્રસ્તચોલાવરોધ-
    સ્તનકલશહરિદ્રાપઙ્કપિઙ્ગામવસ્થામ્ ॥ ૨૨.૧૨॥ ૭૪૨॥

સુરભિનિગમગન્ધા સૌમ્યપદ્માકરસ્થા
    કનકકમલિનીવ પ્રેક્ષ્યસે પાદુકે ત્વમ્ ।
ભ્રમર ઇવ સદા ત્વાં પ્રાપ્નનાનાવિહારઃ

શતમખમણિનીલઃ સેવતે શાર્ઙ્ગધન્વા ॥ ૨૨.૧૩॥ ૭૪૩॥

કનકરુચિરવર્ણા પાદુકે સહ્યસિન્ધુઃ
શ્રિયમિવ મહનીયાં સિન્ધુરાજસ્ય પત્ની ।
સ્વયમિહ સવિધસ્થા સૌમ્યજામાતૃયુક્તા-
મુપચરતિ રસેન ત્વામપત્યાભિમાનાત્ ॥ ૨૨.૧૪॥ ૭૪૪॥

અનુકલમુપજીવ્યા દૃશ્યસે નિર્જરાણાં
ત્રિપુરમથનમૌલૌ શેખરત્વં દધાસિ ।
પ્રતિપદમધિગમ્ય પ્રાપ્તશૃઙ્ગાઽસિ શૌરે-
સ્તદપિ ચરણરક્ષે પૂર્ણચન્દ્રાકૃતિસ્ત્વમ્ ॥ ૨૨.૧૫॥ ૭૪૫॥

કનકમપિ તૃણં યે મન્વતે વીતરાગા-
સ્તૃણપિ કનકં તે જાનતે ત્વત્પ્રકાશૈઃ ।
મધુરિપુપદરક્ષે યત્ ત્વદર્થોપનીતાન્
પરિણમયસિ હૈમાન્ દેવિ દૂર્વાઙ્કુરાદીન્ ॥ ૨૨.૧૬॥ ૭૪૬॥

વિશુદ્ધિમધિગચ્છતિ જ્વલનસઙ્ગમાત્ કાઞ્ચનં
વિદન્તિ ચ જગન્તિ તન્ન ખલુ તદ્વિપર્યસ્યતિ ।
કથં કનકપાદુકે કમલલોચને સાક્ષિણિ
ત્વયૈવ પરિશુદ્ધતા હુતભુજોઽપિ જાઘટ્યતે ॥ ૨૨.૧૭॥ ૭૪૭॥

તારાસઙ્ગપ્રથિતવિભવાં ચારુજામ્બૂનદાભાં
ત્વામારૂઢસ્ત્રિદશમહિતાં પાદુકે રઙ્ગનાથઃ ।
સઞ્ચારિણ્યાં સુરશિખરિણસ્તસ્થુષા મેખલાયાં
ધત્તે મત્તદ્વિરદપતિના સામ્યકક્ષ્યાં સમીક્ષ્યામ્ ॥ ૨૨.૧૮॥ ૭૪૮॥

કનકરુચિરા કાવ્યાખ્યાતા શનૈશ્ચરણોચિતા
શ્રિતગુરુબુધા ભાસ્વદ્રૂપા દ્વિજાધિપસેવિતા ।
વિહિતવિભવા નિત્યં વિષ્ણોઃ પદે મણિપાદુકે
ત્વમસિ મહતિ વિશ્વેષાં નઃ શુભા ગ્રહમણ્ડલી ॥ ૨૨.૧૯॥ ૭૪૯॥

પ્રજ્વલિતપઞ્ચહેતિર્હિરણ્મયીં ત્વાં હિરણ્યવિલયાર્હઃ ।
આવહતુ જાતવેદાઃ શ્રિયમિવ નઃ પાદુકે નિત્યમ્ ॥ ૨૨.૨૦॥ ૭૫૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે

કાઞ્ચનપદ્ધતિર્દ્વાવિંશી ॥

## ૨૩. શેષપદ્ધતિઃ (૧૦)

સૃષ્ટાં ભૂમાવનન્તેન નિત્યં શેષસમાધિના ।
અહં સમ્ભાવયામિ ત્વામાત્માનમિવ પાદુકે ॥ ૨૩.૧॥ ૭૫૧॥

પદ્માભોગાત્પાદુકે રઙ્ગભર્તુઃ
 પાદસ્પર્શાદ્ભોગમન્યં પ્રપિત્સોઃ ।
શેષસ્યૈકાં ભૂમિકામબ્રવીત્ ત્વા-
 માચાર્યાણામગ્રણિર્યામુનેયઃ ॥ ૨૩.૨॥ ૭૫૨॥

શેષત્વમમ્બ યદિ સંશ્રયતિ પ્રકામં
 ત્વદ્ભૂમિકાં સમધિગમ્ય ભુજઙ્ગરાજઃ ।
ત્વામેવ ભક્તિવિનતૈર્વહતાં શિરોભિઃ
 કાષ્ઠાં ગતં તદિહ કેશવપાદરક્ષે ॥ ૨૩.૩॥ ૭૫૩॥

મા ભૂદિયં મયિ નિષણ્ણપદસ્ય નિત્યં
 વિશ્વમ્ભરસ્ય વહનાદ્વ્યથિતેતિ મત્વા ।
ધત્સે બલાભ્યધિકયા મણિપાદુકે ત્વં
 શેષાત્મના વસુમતીં નિજયૈવ મૂર્ત્યા ॥ ૨૩.૪॥ ૭૫૪॥

તત્તાદૃશા નિજબલેન નિરૂઢકીર્તિઃ
 શેષસ્તવૈવ પરિણામવિશેષ એષઃ ।
રામેણ સત્યવચસા યદનન્યવાહ્યાં
 વોઢું પુરા વસુમતીં ભવતી નિયુક્તા ॥ ૨૩.૫॥ ૭૫૫॥

શેષત્વસીમનિયતાં મણિપાદરક્ષે
 ત્વામાગમાઃ કુલવધૂમિવ બાલપુત્રાઃ ।
ત્વદ્રૂપશેષશયિતસ્ય પરસ્ય પુંસઃ
 પાદોપધાનશયિતામુપધાનયન્તિ ॥ ૨૩.૬॥ ૭૫૬॥

ભરતશિરસિ લગ્નાં પાદુકે દૂરતસ્ત્વાં
 સ્વતનુમપિ વવન્દે લક્ષ્મણઃ શેષભૂતઃ ।
કિમિદમિહ વિચિત્રં નિત્યયુક્તઃ સિષેવે
 દશરથતનયઃ સન્ રઙ્ગનાથઃ સ્વમેવ ॥ ૨૩.૭॥ ૭૫૭॥

ભૂયોભૂયઃ સ્તિમિતચલિતે યસ્ય સઙ્કલ્પસિન્ધૌ
    બ્રહ્મેશાનપ્રભૃતય ઇમે બુદ્બુદત્વં ભજન્તિ ।
તસ્યાનાદેર્યુગપરિણતૌ યોગનિદ્રાનુરૂપં
    ક્રીડાતલ્પં કિમપિ તનુતે પાદુકે ભૂમિકાઽન્યા ॥ ૨૩.૮॥ ૭૫૮॥

અહીનાત્મા રઙ્ગક્ષિતિરમણપાદાવનિ સદા
    સતામિત્થં ત્રાણાત્પ્રથિતનિજસત્રત્વવિભવા ।
અવિદ્યાયામિન્યાઃ સ્પૃશસિ પુનરેકાહપદવીં
    ક્રતૂનામારાધ્યા ક્રતુરપિચ સર્વસ્ત્વમસિ નઃ ॥ ૨૩.૯॥ ૭૫૯॥

બહુમુખભોગસમેતૈર્નિર્મુક્તતયા વિશુદ્ધિમાપન્નૈઃ ।
શેષાત્મિકા પદાવનિ નિષેવ્યસે શેષભૂતૈસ્ત્વમ્ ॥ ૨૩.૧૦॥ ૭૬૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
શેષપદ્ધતિસ્ત્રયોવિંશી ॥

## ૨૪. દ્વન્દ્વપદ્ધતિઃ (૨૦)

પ્રપદ્યે પાદુકારૂપં પ્રણવસ્ય કલાદ્વયમ્ ।
ઓતં મિતમિદં યસ્મિન્નનન્તસ્યાપિ તત્પદમ્ ॥ ૨૪.૧॥ ૭૬૧॥

મણિપાદુકયોર્યુગં મુરારેર્મયિ નિત્યં વિદધાતુ મઙ્ગલાનિ ।
અધિકૃત્ય ચરાચરસ્ય રક્ષામાનુકમ્પાક્ષમયોરિવાવતારઃ ॥ ૨૪.૨॥ ૭૬૨॥

ચરણૌ મણિપાદુકે મુરારેઃ પ્રણતાન્પાલયિતું પ્રપદ્યમાનમ્ ।
વિપદામિહ દૈવમાનુષીણાં પ્રતિકારં યુવયોર્દ્વયં પ્રતીમઃ ॥ ૨૪.૩॥ ૭૬૩॥

મુરભિન્મણિપાદુકે ભવત્યોર્વિહિતો નૂનમસૌ મિથો વિભાગઃ ।
ભજતામપરસ્પરપ્રિયાણામવિરોધાય સુરાસુરેશ્વરાણામ્ ॥ ૨૪.૪॥ ૭૬૪॥

અહિતોન્મથનાય સંશ્રિતાનામલમાલોકવશેન શબ્દતો વા ।
કરયોશ્ચ રથાઙ્ગપાઞ્ચજન્યૌ મધુહન્તુઃ પદયોશ્ચ પાદુકે યે ॥ ૨૪.૫॥ ૭૬૫॥

અવધીરિતસાધુપદ્ધતીનામલસાનાં મધુવૈરિપાદુકે દ્વે ।
ઇતરેતરસાહચર્યમિત્થં પ્રતિપન્ને ઇવ દૈવપૌરુષે નઃ ॥ ૨૪.૬॥ ૭૬૬॥

પાર્શ્વયોઃ સરસિજાવસુન્ધરે પાદયોશ્ચ મણિપાદુકે યુવામ્ ।

સન્નિકર્ષથ ન ચેન્મધુદ્વિષઃ કિં કરિષ્યતિ કૃતાગસાં ગણઃ ॥ ૨૪.૭॥ ૭૬૭॥

પાદુકે ભવભયપ્રતીપયોર્ભાવયામિ યુવયોઃ સમાગમમ્ ।
સક્તયોર્દનુજવૈરિણઃ પદે વિદ્યયોરિવ પરાવરાત્મનોઃ ॥ ૨૪.૮॥ ૭૬૮॥

રઙ્ગસીમનિ રથાઙ્ગલક્ષ્મણશ્ચિન્તયામિ તપનીયપાદુકે ।
શાપદોષશમનાય તત્પદે ચક્રવાકમિથુનં કૃતાસ્પદમ્ ॥ ૨૪.૯॥ ૭૬૯॥

માનયામિ જગતસ્તમોપહે માધવસ્ય મણિપાદુકે યુવામ્ ।
દક્ષિણોત્તરગતિક્રમોચિતે પદ્ધતી ઇવ મયૂખમાલિનઃ ॥ ૨૪.૧૦॥ ૭૭૦॥

રઙ્ગનાથપદયોરલઙ્ક્રિયા રાજતે કનકપાદુકાદ્વયી ।
તદ્વિભૂતિયુગલીવ તાદૃશી છન્દતઃ સમવિભાગમાશ્રિતા ॥ ૨૪.૧૧॥ ૭૭૧॥

સાક્ષાત્પદં મધુભિદઃ પ્રતિપાદયન્ત્યૌ
    માનોપપત્તિનિયતે મણિપાદુકે દ્વે ।
અન્યોન્યસઙ્ગતિવશાદુપપન્નચર્યામ્-
    આજ્ઞાં શ્રુતિસ્મૃતિમયીમવધારયામિ ॥ ૨૪.૧૨॥ ૭૭૨॥

વિશ્વોપકારમધિકૃત્ય વિહારકાલે-
    ષ્વન્યોન્યતઃ પ્રથમમેવ્પરિસ્ફુરન્ત્યોઃ ।
દૃષ્ટાન્તયન્તિ યુવયોર્મણિપાદરક્ષે
    દિવ્યં તદેવ મિથુનં દિવિષન્નિષેવ્યમ્ ॥ ૨૪.૧૩॥ ૭૭૩॥

દ્વાવેવ યત્ર ચરણૌ પરમસ્ય પુંસઃ
    તત્ર દ્વિધાસ્થિતવતી મણિપાદુકે ત્વમ્ ।
યત્રૈવ દર્શયતિ દેવિ સહસ્રપાત્ત્વં
    તત્રાપિ નૂનમસિ દર્શિતતાવદાત્મા ॥ ૨૪.૧૪॥ ૭૭૪॥

પર્યાયતો ગતિવશાન્મણિપાદરક્ષે
    પૂર્વાપરત્વનિયમં વ્યતિવર્તયન્ત્યૌ ।
મન્યે યુવાં મહતિ વિષ્ણુપદે સ્ફુરન્ત્યૌ
    સન્ધ્યે સમસ્તજગતામભિવન્દનીયે ॥ ૨૪.૧૫॥ ૭૭૫॥

અશ્રાન્તસઞ્ચરણયોર્નિજસંપ્રયોગા-
    દમ્લાનતાં ચરણપઙ્કજયોર્દિશન્ત્યૌ ।
માન્યે યુવાં રઘુપતેર્મણિપાદરક્ષે
    વિદ્યે બલામતિબલાં ચ વિચિન્તયામિ ॥ ૨૪.૧૬॥ ૭૭૬॥

અન્તર્મોહાદવિદિતવતામાત્મતત્ત્વં યથાવ-
    ત્પદ્યામિત્થં પરિચિતવતાં પાદુકે પાપલોક્યામ્ ।
નિત્યં ભક્તેરનુગુણતયા નાથપાદં ભજન્ત્યૌ
    નિષ્ઠે સાક્ષાત્ સ્વયમિહ યુવાં જ્ઞાનકર્માત્મિકે નઃ ॥ ૨૪.૧૭॥ ૭૭૭॥

ન્યસ્તં વિષ્ણોઃ પદમિહ મહત્ સ્વેન ભૂમ્ના વહન્ત્યો-
    રામ્નાયાખ્યામવિહતગતિં વર્તયન્ત્યોર્નિજાજ્ઞામ્ ।
આસન્નાનાં પ્રણયપદવીમાત્મના પૂરયન્ત્યોઃ
    દ્વૈરાજ્યશ્રીર્ભવતિ જગતામૈકરાજ્યે ભવત્યોઃ ॥ ૨૪.૧૮॥ ૭૭૮॥

અપ્રાપ્તાનામુપજનયથઃ સમ્પદાં પ્રાપ્તિમેવં
    સંપ્રાપ્તાનાં સ્વયમિહ પુનઃ પાલનાર્થં યતેથે ।
સાક્ષાદ્રઙ્ગક્ષિતિપતિપદં પાદુકે સાધયન્ત્યૌ
    યોગક્ષેમૌ સુચરિતવશાન્મૂર્તિમન્તૌ યુવાં નઃ ॥ ૨૪.૧૯॥ ૭૭૯॥

બદ્ધહરિપાદયુગલં યુગલં તપનીયપાદુકે યુવયોઃ ।
મોચયતિ સંશ્રિતાનાં પુણ્યાપુણ્યમયશૃઙ્ખલાયુગલમ્ ॥ ૨૪.૨૦॥ ૭૮૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
દ્વન્દ્વપદ્ધતિશ્ચતુર્વિંશી ॥

## ૨૫. સન્નિવેશપદ્ધતિઃ (૨૦)

અણોરણીયસીં વિષ્ણોર્મહતોઽપિ મહીયસીમ્ ।
પ્રપદ્યે પાદુકાં નિત્યં તત્પદેનૈવ સમ્મિતામ્ ॥ ૨૫.૧॥ ૭૮૧॥

પ્રતિતિષ્ઠતિ પાદસમ્મિતાયાં
    ત્વયિ નિત્યં મણિપાદુકે મુકુન્દઃ ।
ઇતરે તુ પરિચ્છદાસ્ત એતે
    વિભવવ્યઞ્જનહેતવો ભવન્તિ ॥ ૨૫.૨॥ ૭૮૨॥

તવ રઙ્ગનરેન્દ્રપાદરક્ષે પ્રકૃતિઃ સન્નપિ ભક્તિપારતન્ત્ર્યાત્ ।
ભવતીં વહતીવ પન્નગેન્દ્રઃ પ્રથિતસ્વસ્તિકલક્ષણૈઃ શિરોભિઃ ॥ ૨૫.૩॥ ૭૮૩॥

પરસ્ય પુંસઃ પદસન્નિવેશાન્પ્રયુઞ્જતે ભાવિતપઞ્ચરાત્રાઃ ।
અધપ્રતીપાનપદિશ્ય પુણ્ડ્રાનઙ્ગેષુ રઙ્ગેશયપાદુકે ત્વામ્ ॥ ૨૫.૪॥ ૭૮૪॥ var અઙ્કેષુ

વિમૃશ્ય રઙ્ગેન્દ્રપતિંવરાયાઃ શ્રુતેઃ સ્થિતાં મૂર્ધનિ પાદુકે ત્વામ્ ।
બધ્નન્તિ વૃદ્ધાઃ સમયે વધૂનાં ત્વન્મુદ્રિતાન્યાભરણાનિ મૌલૌ ॥ ૨૫.૫॥ ૭૮૫॥

વહન્તિ રઙ્ગેશ્વરપાદરક્ષે દીર્ઘાયુશાં દર્શિતભક્તિબન્ધાઃ ।
આશાધિપાનામવરોધનાર્યસ્ત્વન્મુદ્રિકાં મઙ્ગલહેમસૂત્રૈઃ ॥ ૨૫.૬॥ ૭૮૬॥

વ્યૂહક્રમેણ પ્રથિતારમગ્રે
સન્દર્શયન્તીં મણિપાદુકે ત્વામ્ ।
પાતું ત્રિલોકીં પદપદ્મભાજં
સૌદર્શનીં શક્તિમવૈમિ શૌરેઃ ॥ ૨૫.૭॥ ૭૮૭॥

બદ્ધાસિકા કનકપઙ્કજકર્ણિકાયાં
મધ્યે કૃશા મુરરિપોર્મણિપાદુકે ત્વમ્ ।
સન્દૃશ્યસે સરસિજાસનયા ગૃહીતં
રૂપાન્તરં કિમપિ રઙ્ગવિહારયોગ્યમ્ ॥ ૨૫.૮॥ ૭૮૮॥

માનોચિતસ્ય મદધીનજનસ્ય નિત્યં
મા ભૂદતઃ કૃપણતેતિ વિચિન્તયન્ત્યા ।
બન્દીકૃતં ધ્રુવમવૈમિ વલગ્નદેશે
કાર્શ્યં ત્વયા કમલલોચનપાદરક્ષે ॥ ૨૫.૯॥ ૭૮૯॥

મધ્યે કૃશામુભયતઃ પ્રતિપન્નવૃદ્ધિં
મન્યે સમીક્ષ્ય ભવતીં મણિપાદરક્ષે ।
નિત્યં મુકુન્દપદસઙ્ગમવિપ્રયોગૌ
નિશ્ચિન્વતે કૃતધિયઃ સુખદુઃખકાષ્ઠામ્ ॥ ૨૫.૧૦॥ ૭૯૦॥

રઙ્ગેશિતુશ્ચરણપઙ્કજયોર્ભજન્તી
રક્ષાપ્રસાધનવિકલ્પસહામવસ્થામ્ ।
માન્યાકૃતિર્નિવિશસે મણિપાદરક્ષે
મધ્યે પરિચ્છદવિભૂષણવર્ગયોત્સ્વમ્ ॥ ૨૫.૧૧॥ ૭૯૧॥

અઙ્ગાન્તરેષુ નિહિતાન્યખિલાનિ કામમ્ ।
પર્યાયકલ્પનસહાનિ વિભૂષણાનિ ।
નિત્યં મુકુન્દપદપદ્મતલાનુરૂપં
નૈપથ્યમમ્બ ભવતી નયનાભિરામમ્ ॥ ૨૫.૧૨॥ ૭૯૨॥

યે નામ ભક્તિનિયતૈસ્તવ સન્નિવેશં

    નિર્વિશ્ય નેત્રયુગલૈર્ન ભજન્તિ તૃપ્તિમ્ ।
કાલક્રમેણ કમલેક્ષણપાદરક્ષે
    પ્રાયેણ તે પરિણમન્તિ સહસ્રનેત્રાઃ ॥ ૨૫.૧૩॥ ૭૯૩॥

પદમપ્રમાણમિતિ વાદિનાં મતં
    મધુજિત્પદે મહતિ માસ્મ ભૂદિતિ ।
વ્યુદપાદિ તસ્ય ચરણાવનિ ત્વયા
    નિગમાત્મનસ્તવ સમપ્રમાણતા ॥ ૨૫.૧૪॥ ૭૯૪॥

અપ્રભૂતમભવજ્જગત્ત્રયં યસ્ય માતુમુદિતસ્ય પાદુકે ।
અપ્રમેયમમિતસ્ય તત્પદં નિત્યમેવ નનુ સમ્મિતં ત્વયા ॥ ૨૫.૧૫॥ ૭૯૫॥

આલવાલમિવ ભાતિ પાદુકે પાદપસ્ય ભવતી મધુદ્વિષઃ ।
યત્સમીપવિનતસ્ય શૂલિનઃ સારણી ભવતિ મૌલિનિમ્નગા ॥ ૨૫.૧૬॥ ૭૯૬॥

મોદમાનમુનિવૃન્દષટ્પદા
    ભાતિ મુક્તિમકરન્દવર્ષિણી ।
કાઽપિ રઙ્ગનૃપતેઃ પદામ્બુજે
    કર્ણિકા કનકપાદુકામયી ॥ ૨૫.૧૭॥ ૭૯૭॥

યુગપદનુવિધાસ્યન્ યૌવતં તુલ્યરાગં
    યદુપતિરધિચક્રે યાવતો રૂપભેદાન્ ।
તદિદમતિવિકલ્પં બિભ્રતી સન્નિવેશં
    તવ ખલુ પદરક્ષે તાવતી મૂર્તિરાસીત્ ॥ ૨૫.૧૮॥ ૭૯૮॥

તત્તદ્વૃત્તેરનુગુણતયા વામનીં વ્યાપિનીં વા
    પ્રાપ્તે રઙ્ગપ્રથિતવિભવે ભૂમિકાં સૂત્રધારે ।
મન્યે વિશ્વસ્થિતિમયમહાનાટિકાં નેતુકામા
    નાનાસંસ્થા ભવતિ ભવતી પાદુકે નર્તકીવ ॥ ૨૫.૧૯॥ ૭૯૯॥

માને પરં સામને પ્રત્યક્ષેણાગમેનાપિ ।
હરિચરણસ્ય તવાપિ તુ વૈષમ્યં રક્ષ્યરક્ષકત્વાભ્યામ્ ॥ ૨૫.૨૦॥ ૮૦૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
સન્નિવેશપદ્ધતિઃ પઞ્ચવિંશી ॥

## ૨૬. યન્ત્રિકાપદ્ધતિઃ (૧૦)

ઉદગ્રયન્ત્રિકાં વન્દે પાદુકાં યન્નિવેશનાત્ ।
ઉપર્યપિ પદં વિષ્ણોઃ પ્રત્યાદિષ્ટપ્રસાધનમ્ ॥ ૨૬.૧॥ ૮૦૧॥

પ્રસભં પ્રતિરુધ્ય કણ્ટકાદીન્
ભવતી શૌરિપદામ્બુજાદધસ્તાત્ ।
ચરાણાવનિ ધારયત્યમુષ્મિ-
ન્નુચિતચ્છાયમુપર્યપિ પ્રતીકમ્ ॥ ૨૬.૨॥ ૮૦૨॥

મુરભિન્મણિપાદુકે ત્વદીયા-
મનઘામઙ્ગુલિયન્ત્રિકામવૈમિ ।
સ્વયમુન્નમિતાં પ્રદેશિનીં તે
પરમં દૈવતમેકમિત્યૃચન્તીમ્ ॥ ૨૬.૩॥ ૮૦૩॥

સ્વદતે મણિપાદુકે ત્વદીયા પદશાખાયુગયન્ત્રિકા વિચિત્રા ।
પરમં પુરુષં પ્રકાશયન્તી પ્રણવસ્યેવ પરેયમર્ધમાત્રા ॥ ૨૬.૪॥ ૮૦૪॥

અનુયાતમનોરથા મુરારેર્ભવતી કેલિરથશ્રિયં દધાતિ ।
ચરણાવનિ યન્ત્રિકા તવૈષા તનુતે કૂબરસમ્પદં પુરસ્તાત્ ॥ ૨૬.૫॥ ૮૦૫॥

શઙ્કે ભવત્યાઃ સુભગં પ્રતીકં રઙ્ગેશપાદાઙ્ગુલિસઙ્ગ્રહાર્થમ્ ।
ત્રાણાય પાદાવનિ વિષ્ટપાનામાજ્ઞાકરીમઙ્ગુલિમુદ્રિકાં તે ॥ ૨૬.૬॥ ૮૦૬॥

અલઙ્કૃતં કર્ણિકયોપરિષ્ટા-
દુદગ્રનાલં તવ યન્ત્રિકાંશમ્ ।
પદ્માપતેઃ પાદસરોજલક્ષ્મ્યાઃ
પ્રત્યેમિ પાદાવનિ કેલિપદ્મમ્ ॥ ૨૬.૭॥ ૮૦૭॥

ઉપરિ વિનિહિતસ્ય કેશવાઙ્ઘ્રે-
રુપરિ પદાવનિ યન્ત્રિકાત્મિકા ત્વમ્ ।
ઇતિ તવ મહિમા લઘૂકરોતિ
પ્રણતસુરેશ્વરશેખરાધિરોહમ્ ॥ ૨૬.૮॥ ૮૦૮॥

નિત્યં પદાવનિ નિબદ્ધકિરીટશોભં
પદ્માલયાપરિચિતં પદમુદ્વહન્ત્યાઃ ।
અઙ્ગીકરોતિ રુચિમઙ્ગુલિયન્ત્રિકા તે
સામ્રાજ્યસમ્પદનુરૂપમિવાતપત્રમ્ ॥ ૨૬.૯॥ ૮૦૯॥

પ્રથમા કલેવ ભવતી ચરણાવનિ ભાતિ રઙ્ગચન્દ્રમસઃ ।
શ‍ૃઙ્ગોન્નતિરિવ યત્ર શ્રિયં વિભાવયતિ યન્ત્રિકાયોગઃ ॥ ૨૬.૧૦॥ ૮૧૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
યન્ત્રિકાપદ્ધતિઃ ષડ્વિંશી ॥

## ૨૭. રેખાપદ્ધતિઃ (૧૦)

સૂચયન્તીં સ્વરેખાભિરનાલેખ્યસરસ્વતીમ્ ।
અલેખનીયસૌન્દર્યામાશ્રયે શૌરિપાદુકામ્ ॥ ૨૭.૧॥ ૮૧૧॥

મણિમૌલિનિઘર્ષણાત્ સુરાણાં
    વહસે કાઞ્ચનપાદુકે વિચિત્રમ્ ।
કમલાપતિપાદપદ્મયોગા-
    દપરં લક્ષણમાધિરાજ્યસારમ્ ॥ ૨૭.૨॥ ૮૧૨॥

અભિતો મણિપાદુકે સ્ફુરન્ત્યા-
    સ્તવ રેખાવિતતેસ્તથાવિધાયાઃ ।
મુરવૈરિપદારવિન્દરૂઢૈ-
    રનુકલ્પાયિતમાધિરાજ્યચિહ્નૈઃ ॥ ૨૭.૩॥ ૮૧૩॥

રેખયા વિનમતાં દિવૌકસાં મૌલિરત્નમકરીમુખોત્થયા ।
પાદુકે વહસિ નૂનમદ્ભુતં શૌરિપાદપરિભોગલક્ષણમ્ ॥ ૨૭.૪॥ ૮૧૪॥

ત્રિદશમકુટરત્નોલ્લેખરેખાપદેશા-
    ત્પરિણમયસિ પુંસાં પાદુકે મૂર્ધ્નિ લગ્ના ।
નરકમથનસેવાસમ્પદં સાધયિત્રી
    નિયતિવિલિખિતાનાં નિષ્કૃતિં દુર્લિપીનામ્ ॥ ૨૭.૫॥ ૮૧૫॥

પદકમલતલાન્તઃસમ્શ્રિતાન્યાતપત્ર-
    ધ્વજસરસિજમુખ્યાન્યૈશ્વરીલક્ષણાનિ ।
અવગમયસિ શૌરેઃ પાદુકે માદૃશાના-
    મુપરિ પરિણતૈઃ સ્વૈર્દેવિ રેખાવિશેષૈઃ ॥ ૨૭.૬॥ ૮૧૬॥

સ્નાતા પદાવનિ ચિરં પરિભુજ્ય મુક્તા
    પાદેન રઙ્ગનૃપતેઃ શુભલક્ષણેન ।

રેખાન્તરૈર્નવનવૈરુપશોભસે ત્વં
    સંસ્કારચન્દનવિલેપનપઙ્કલગ્નૈઃ ॥ ૨૭.૭॥ ૮૧૭॥

ભક્ત્યા મુહુઃ પ્રણમતાં ત્રિદશેશ્વરાણાં
    કોટીરકોટિકષણાદુપજાયમાનૈઃ ।
આભાતિ શૌરિચરણાદધિકાનુભાવા
    રેખાશતૈસ્તવ પદાવનિ કાઽપિ રેખા ॥ ૨૭.૮॥ ૮૧૮॥

પાદાવનિ પ્રતિપદં પરમસ્ય પુંસઃ
    પાદારવિન્દપરિભોગવિશેષયોગ્યા ।
સ્વાભાવિકાન્ સુભગભક્તિવિશેષદૃશ્યાન્
    રેખાત્મકાન્ વહસિ પત્રલતાવિશેષાન્ ॥ ૨૭.૯॥ ૮૧૯॥

રેખાપદેશતસ્ત્વં પ્રશમયિતું પ્રલયવિપ્લવાશઙ્કામ્ ।
વહસિ મધુજિત્પદાવનિ મન્યે નિગમસ્ય માતૃકાલેખ્યમ્ ॥ ૨૭.૧૦॥ ૮૨૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
રેખાપદ્ધતિઃ સપ્તવિંશી ॥

## ૨૮. સુભાષિતપદ્ધતિઃ (૧૦)

કલાસુ કાષ્ઠામાતિષ્ઠન્ ભૂમ્ને સમ્બન્ધિનામપિ ।
પાદુકા રઙ્ગધુર્યસ્ય ભરતારાધ્યતાં ગતા ॥ ૨૮.૧॥ ૮૨૧॥

સન્તઃ સ્વદેશપરદેશવિભાગશૂન્યં
    હન્ત સ્વવૃત્તિમનઘાં ન પરિત્યજન્તિ ।
રાજ્યે વને ચ રઘુપુઙ્ગવપાદરક્ષા
    નૈજં જહૌ ન ખલુ કણ્ટકશોધનં તત્ ॥ ૨૮.૨॥ ૮૨૨॥

બ્રહ્માસ્ત્રતામધિજગામ તૃણં પ્રયુક્તં
    પૃથ્વીં શશાસ પરિમુક્તપદં પદત્રમ્ ।
કિં વા ન કિં ભવતિ કેલિવિધૌ વિભૂનાં
    પુણ્યં શરવ્યમભવત્પયસાં નિધિર્વા ॥ ૨૮.૩॥ ૮૨૩॥

અન્યેષુ સત્સ્વપિ નરેન્દ્રસુતેષુ દૈવા-
    દ્ભ્રષ્ટઃ પદાદધિકરોતિ પદં પદાર્હઃ ।

પ્રાયો નિદર્શયતિ તત્પ્રથમો રઘૂણાં
    તત્પાદયોઃ પ્રતિનિધી મણિપાદુકે વા ॥ ૨૮.૪॥ ૮૨૪॥

ચરણમનઘવૃત્તેઃ કસ્યચિત્પ્રાપ્ય નિત્યં
    સકલભુવનગુપ્ત્યૈ સત્પથે વર્તતે યઃ ।
નરપતિબહુમાનં પાદુકેવાધિગચ્છન્
    સ ભવતિ સમયેષુ પ્રેક્ષિતજ્ઞૈરુપાસ્યઃ ॥ ૨૮.૫॥ ૮૨૫॥

રામે રાજ્યં પિતુરભિમતં સમ્મતં ચ પ્રજાનાં
    માતા વવ્રે તદહિ ભરતે સત્યવાદી દદૌ ચ ।
ચિન્તાતીતઃ સમજનિ તદા પાદુકાગ્ર્યાભિષેકો
    દુર્વિજ્ઞાનસ્વહૃદયમહો દૈવમત્ર પ્રમાણમ્ ॥ ૨૮.૬॥ ૮૨૬॥

નાતિક્રામેચ્ચરણવહનાત્પાદુકા પાદપીઠં
    યદ્વાઽઽસન્નં પરમિહ સદા ભાતિ રાજાસનસ્ય ।
પૂર્વત્રૈવ પ્રણિહિતમભૂદ્ધન્ત રામેણ રાજ્યં
    શઙ્કે ભર્તુર્બહુમતિપદં વિક્રમે સાહચર્યમ્ ॥ ૨૮.૭॥ ૮૨૭॥

પ્રતિપદચપલાઽપિ પાદુકા રઘુપતિના સ્વપદે નિવેશિતા ।
સમજનિ નિભૃતસ્થિતિસ્તદા ભવતિ ગુણઃ શ્રિયમભ્યુપેયુષામ્ ॥ ૨૮.૮॥ ૮૨૮॥

ગતિહેતુરભૂત્ ક્વચિત્પદે સ્થિતિહેતુર્મણિપાદુકા ક્વચિત્ ।
ન હિ વસ્તુશુશક્તિનિશ્ચયો નિયતિઃ કેવલમીશ્વરેચ્છયા ॥ ૨૮.૯॥ ૮૨૯॥

અધરીકૃતોઽપિ મહતા તમેવ સેવેત સાદરં ભૂષ્ણુઃ ।
અલભત સમયે રામાત્પાદાક્રાન્તાઽપિ પાદુકા રાજ્યમ્ ॥ ૨૮.૧૦॥ ૮૩૦॥

ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
સુભાષિતપદ્ધતિરષ્ટાવિંશી ॥

## ૨૯. પ્રકીર્ણકપદ્ધતિઃ (૮૦)

વિધૌ પ્રવૃત્તે યદ્દ્રવ્યં ગુણસંસ્કારનામભિઃ ।
શ્રેયઃસાધનમામ્નાતં તત્પદત્રં તથાઽસ્તુ મે ॥ ૨૯.૧॥ ૮૩૧॥

મધુરસ્મિતરમ્યમૌક્તિકશ્રીર્વિશસિ વ્યઞ્જિતમઞ્જુલપ્રણાદા ।

સહ રઙ્ગનૃપેણ વાસગેહં તનુમધ્યા મણિપાદુકે ત્વમેકા ॥ ૨૯.૨॥ ૮૩૨॥

શુભશબ્દવિશેષસંશ્રિતાભિ-
 ર્ભવતી શૌરિપદાવનિ ક્રિયાભિઃ ।
અનુતિષ્ઠતિ નૂનમાશ્રિતાના-
 મખિલોપદ્રવશાન્તિકં નવીનમ્ ॥ ૨૯.૩॥ ૮૩૩॥

મણિભિર્મધુવૈરિપાદરક્ષે
 ભવતી વિક્રમણે પ્રવર્ધમાના ।
યુગપદ્ભવતાં યુગાન્તકાલે
 દિવિ લક્ષ્મીં વિદધે દિવાકરાણામ્ ॥ ૨૯.૪॥ ૮૩૪॥

મઞ્જુસ્વનાં મણિમયૂખકલાપિનીં ત્વાં
 દૃષ્ટ્વા કપર્દસવિધે વિનિવેશ્યમાનામ્ ।
ગૂઢીભવન્તિ ગરુડધ્વજપાદરક્ષે
 ફૂત્કારવન્તિ પુરવૈરિવિભૂષણાનિ ॥ ૨૯.૫॥ ૮૩૫॥

મધ્યે પરિસ્ફુરિતનિર્મલચન્દ્રતારા
 પ્રાન્તેષુ રત્નનિકરેણ વિચિત્રવર્ણા ।
પુષ્ણાસિ રઙ્ગનૃપતેર્મણિપાદુકે ત્વં
 ચક્ષુર્વશીકરણયન્ત્રવિશેષશઙ્કામ્ ॥ ૨૯.૬॥ ૮૩૬॥

પાદેન રઙ્ગનૃપતેઃ પરિભુજ્યમાના
 મુક્તાફલપ્રકટિતશ્રમવારિબિન્દુઃ ।
ઉત્કણ્ટકા મણિમયૂખશતૈરુદગ્રૈઃ
 સીત્કારિણીવ ચરણાવનિ શિઞ્જિતૈસ્ત્વમ્ ॥ ૨૯.૭॥ ૮૩૭॥

દૂરપ્રસારિતકરા નિનદૈર્મણીના-
 માયાતિ દૈત્યરિપુરિત્યસકૃદ્બ્રુવાણા ।
દૈત્યેશ્વરાનભિમુખાન્ જનિતાનુકમ્પા
 મન્યે નિવારયસિ માધવપાદુકે ત્વમ્ ॥ ૨૯.૮॥ ૮૩૮॥

અચ્છેદ્યરશ્મિનિયતક્રમરત્નધુર્યા
 નિષ્કમ્પકૂબરનિભં દધતી પ્રતીકમ્ ।
ક્રીડાગતેષુ મધુજિત્પદપદ્મલક્ષ્મ્યાઃ
 કર્ણીરથસ્ત્વમસિ કાઞ્ચનપાદરક્ષે ॥ ૨૯.૯॥ ૮૩૯॥

મઞ્જુસ્વના મરતકોપલમેચકાઙ્ગી
    શોણાશ્મતુણ્ડરુચિરા મણિપાદુકે ત્વમ્ ।
પદ્માવિહારરસિકસ્ય પરસ્ય યૂનઃ
    પર્યાયતાં ભજસિ પઞ્જરશારિકાણામ્ ॥ ૨૯.૧૦॥ ૮૪૦॥

શોણોપલૈશ્ચરણરક્ષિણિ સંશ્રિતેષુ
    ચ્છાયાત્મના મરકતેષુ તવાવગાઢઃ ।
અન્વેતિ શૌરિરભિતઃ ફલપઙ્ક્તિશોભિ-
    ન્યાત્માનમેવ શયિતં વટપત્રમધ્યે ॥ ૨૯.૧૧॥ ૮૪૧॥

સ્ફીતં પદાવનિ તવ સ્નપનાર્દ્રમૂર્તે-
    રાસાગરં તતમભૂન્મણિરશ્મિજાલમ્ ।
લીલોચિતં રઘુસુતસ્ય શરવ્યમાસન્
    યાતૂનિ યસ્ય વલયેન વિવેષ્ટિતાનિ ॥ ૨૯.૧૨॥ ૮૪૨॥

રત્નાંશુભિસ્તવ તદા મણિપાદરક્ષે
    સંરજ્યમાનવપુષાં રજનીમુખેષુ ।
આકસ્મિકાગતમદર્શિ મહૌષધિત્વં
    સાકેતપત્તનસમીપરુહાં દ્રુમાણામ્ ॥ ૨૯.૧૩॥ ૮૪૩॥

રામે વનં દશરથે ચ દિવં પ્રયાતે
    નિર્ધૂતવિશ્વતિમિરા સહસા બભૂવ ।
ભૂયિષ્ઠરત્નકિરણા ભવતી રઘૂણાં
    ભૂયઃ પ્રતાપતપનોદયપૂર્વસન્ધ્યા ॥ ૨૯.૧૪॥ ૮૪૪॥

પ્રીતેન દેવિ વિભુના પ્રતિપાદનીયાં
    પાદાવનિ પ્રતિપદોદિતમઞ્જુનાદામ્ ।
વિદ્યાં વિદુર્ભગવતઃ પ્રતિપાદનાર્હાં
    પારાયણાગમપયોનિધિપારગાસ્ત્વામ્ ॥ ૨૯.૧૫॥ ૮૪૫॥

મુક્તાંશુકેસરવતી સ્થિરવજ્રદંષ્ટ્રા
    પ્રહ્લાદસમ્પદનુરૂપહિરણ્યભેદા ।
મૂર્તિઃ શ્રિયો ભવસિ માધવપાદરક્ષે
    નાથસ્ય નૂનમુચિતા નરસિંહમૂર્તેઃ ॥ ૨૯.૧૬॥ ૮૪૬॥

સમ્ભાવયન્તિ કવયશ્ચતુરપ્રચારાં
    મઞ્જુસ્વનાં મહિતમૌક્તિકપત્રલાઙ્ગીમ્ ।

સ્વાધીનસર્વભુવનાં મણિપાદુકે ત્વાં
 રઙ્ગાધિરાજપદપઙ્કજરાજહંસીમ્ ॥ ૨૯.૧૭॥ ૮૪૭॥

મુક્તામયૂખરુચિરાં મણિપાદરક્ષે
 મઞ્જુસ્વનાં મણિભિરાહિતવર્ણવર્ગામ્ ।
મન્યે મુકુન્દપદપદ્મમધુવ્રતીના-
 મન્યામકૃત્રિમગિરામધિદેવતાં ત્વામ્ ॥ ૨૯.૧૮॥ ૮૪૮॥

આસાદ્ય કેકયસુતાવરદાનમૂલં
 કાલં પ્રદોષમનિરીક્ષ્યરમાસહાયમ્ ।
મઞ્જુપ્રણાદરહિતા મણિપાદરક્ષે
 મૌનવ્રતં કિમપિ નૂનમવર્તયસ્ત્વમ્ ॥ ૨૯.૧૯॥ ૮૪૯॥

વૈડૂર્યરમ્યસલિલા મહિતા મરુદ્ભિ-
 શ્છાયાવતી મરકતોપલરશ્મિજાલૈઃ ।
અશ્રાન્તમોહપદવીપથિકસ્ય જન્તો-
 ર્વિશ્રાન્તિભૂમિરિવ શૌરિપદાવનિ ત્વમ્ ॥ ૨૯.૨૦॥ ૮૫૦॥

આદ્યો રઘુક્ષિતિભુજામભિષેકદીપ્તૈ-
 રાપ્યાયિતસ્તવ પદાવનિ રશ્મિજાલૈઃ ।
મન્દીચકાર તપનો વ્યપનીતભીતિ-
 ર્મન્દોદરીવદનચન્દ્રમસો મયૂખાન્ ॥ ૨૯.૨૧॥ ૮૫૧॥

માન્યા સમસ્તજગતાં મણિભઙ્ગનીલા
 પાદે નિસર્ગઘટિતા મણિપાદુકે ત્વમ્ ।
અન્તઃપુરેષુ લલિતાનિ ગતાગતાનિ
 ચ્છાયેવ રઙ્ગનૃપતેરનુવર્તસે ત્વમ્ ॥ ૨૯.૨૨॥ ૮૫૨॥

રઙ્ગાધિરાજપદપઙ્કજમાશ્રયન્તી
 હૈમી સ્વયં પરિગતા હરિનીલરત્નૈઃ ।
સમ્ભાવ્યસે સુકૃતિભિર્મણિપાદુકે ત્વં
 સામાન્યમૂર્તિરિવ સિન્ધુસુતાધરણ્યોઃ ॥ ૨૯.૨૩॥ ૮૫૩॥

અભ્યર્ચિતા સુમનસાં નિવહૈરજસ્રં
 મુક્તારુણોપલનસ્વાઙ્ગુલિપલ્લવશ્રીઃ ।
શ્રેયસ્કરીં મુરભિદશ્ચરણદ્વયીવ
 કાન્તિં સમાશ્રયસિ કાઞ્ચનપાદુકે ત્વમ્ ॥ ૨૯.૨૪॥ ૮૫૪॥

નિર્મૃષ્ટગાત્રરુચિરા મણિપાદુકે ત્વં
    સ્નાતાનુલેપસુરભિર્નવમાલ્યચિત્રા ।
પ્રાપ્તે વિહારસમયે ભજસે મુરારેઃ
    પાદારવિન્દપરિભોગમધન્યલભ્યમ્ ॥ ૨૯.૨૫॥ ૮૫૫॥

નાદે પદાવનિ તથા તવ સન્નિવેશે
    નિર્વેશનક્રમમસહ્યમપાચિકીર્ષુઃ ।
યૈરેવ લોચનશતૈરભિવીક્ષતે ત્વાં
    તૈરેવ પન્નગપતિઃ શ્રુતિમાન્ બભૂવ ॥ ૨૯.૨૬॥ ૮૫૬॥

પાદાવનિ સ્ફુટમયૂખસહસ્રદૃશ્યા
    વિષ્ણોઃ પદેન ભવતી વિહિતપ્રચારા ।
ત્વદ્ભક્તિયન્ત્રિતજનપ્રથમસ્ય શમ્ભો-
    ર્વૈકર્તનીમનુકરોતિ વિહારમૂર્તિમ્ ॥ ૨૯.૨૭॥ ૮૫૭॥

રાજ્યે વનેપિ રઘુવીરપદોચિતાયાઃ
    સંસ્મૃત્ય ગૌતમવધૂપરિરક્ષણં તે ।
મન્યે સમાહિતધિયો મણિપાદુકે ત્વાં
    મૂર્ધ્ના ભજન્ત્યનુદિનં મુનિધર્મદારાઃ ॥ ૨૯.૨૮॥ ૮૫૮॥

ત્વામાશ્રિતો મણિમયૂખસહસ્રદૃશ્યાં
    ત્વચ્છિઞ્જિતેન સહ રઙ્ગપતિઃ સમુદ્યન્ ।
આશઙ્ક્યતે સુમતિભિર્મણિપાદરક્ષે
    વિદ્યાસખઃ સવિતૃમણ્ડલમધ્યવર્તી ॥ ૨૯.૨૯॥ ૮૫૯॥

રત્નાશ્રિતૈર્હરિપદં મણિપાદુકે ત્વં
    સ્પૃષ્ટ્વા કરૈઃ શ્રુતિરસાયનમઞ્જુનાદા ।
તત્ત્વં તદેતદિતિ બોધયસીવ સમ્ય-
    ગ્વેદાન્પ્રતારિતવતો વિવિધાન્ કુદૃષ્ટીન્ ॥ ૨૯.૩૦॥ ૮૬૦॥

આનન્દસૂઃ પ્રણયિનામનઘપ્રસાદા
    રઙ્ગાધિરાજપદરક્ષિણિ રત્નભાસા ।
ન્યસ્તે મુહુર્નિજભરે સ્થિરતાં ભજન્ત્યા
    વર્ણાંશુકં વિતરસીવ વસુન્ધરાયાઃ ॥ ૨૯.૩૧॥ ૮૬૧॥

ત્વં ચિત્રભાનુરસિ રત્નવિશેષયોગા-

દ્ભૂમ્ના નિજેન પરિપુષ્યસિ પાવકત્વમ્ ।
સ્વેનૈવ શૌરિચરણાવનિ ચન્દ્રરૂપા
તેજસ્ત્રયીવ મિલિતાऽસિ તમોપહા નઃ ॥ ૨૯.૩૨॥ ૮૬૨॥

પ્રૌઢપ્રવાલરુચિરા ભુવનૈકવન્દ્યા
રઙ્ગાધિરાજચરણાવનિ રમ્યચન્દ્રા ।
સમ્ભિન્નમૌક્તિકરુચિઃ સતતં પ્રજાનાં
તાપાત્યયં દિશસિ તારકિતેવ સન્ધ્યા ॥ ૨૯.૩૩॥ ૮૬૩॥

રઙ્ગેશ્વરસ્ય પુરતો મણિપાદુકે ત્વં
રત્નાંશુભિર્વિકિરસિ સ્ફુટભક્તિબન્ધા ।
પાદૌ વિહારયિતુમદ્ભુતસૌકુમાર્યૌ
પ્રાયઃ સરોજકુમુદોત્પલપત્રપઙ્ક્તિમ્ ॥ ૨૯.૩૪॥ ૮૬૪॥

આસન્નવૃત્તિરવરોધગૃહેષુ શૌરે-
રાપાદયસ્યનુપદં વરવર્ણિનીનામ્ ।
આલગ્નરત્નકિરણા મણિપાદુકે ત્વં
મઞ્જુસ્વના મદનબાણનિઘર્ષશઙ્કામ્ ॥ ૨૯.૩૫॥ ૮૬૫॥

પર્યાપ્તમૌક્તિકનખા સ્ફુટપદ્મરાગા
રેખાવિશેષરુચિરા લલિતપ્રચારા ।
રઙ્ગાધિરાજપદયોર્મણિપાદુકે ત્વં
સાયુજ્યમાશ્રિતવતીવ સમસ્તવન્દ્યા ॥ ૨૯.૩૬॥ ૮૬૬॥

પ્રાપ્તાભિષેકા મણિપાદુકે
ત્વં પ્રદીપ્તરત્ના રઘુરાજધાન્યાઃ ।
પ્રદક્ષિણપ્રક્રમણાદકાર્ષીઃ
પ્રાકારમાગ્નેયમિવ પ્રભાભિઃ ॥ ૨૯.૩૭॥ ૮૬૭॥

રત્નાસને રાઘવપાદરક્ષે
પ્રદીપ્યમાનાસ્તવ પદ્મરાગાઃ ।
પ્રાયો નરેન્દ્રાન્ ભરતસ્ય જેતુઃ
પ્રતાપવહ્નેરભવન્પ્રરોહાઃ ॥ ૨૯.૩૮॥ ૮૬૮॥

શુભપ્રણાદા ભવતી શ્રુતીનાં
કણ્ઠેશુવૈકુણ્ઠપતિંવરાણામ્ ।
બધ્નાસિ નૂનં મણિપાદરક્ષે

મઙ્ગલ્યસૂત્રં મણિરશ્મિજાલૈઃ ॥ ૨૯.૩૯॥ ૮૬૯॥

વિચિત્રવર્ણા શ્રુતિરમ્યશબ્દા
નિષેવ્યસે નાકસદાં શિરોભિઃ ।
મધુદ્વિષસ્ત્વં મણિપાદરક્ષે
શ્રેયસ્કરીશાસનપત્રિકેય ॥ ૨૯.૪૦॥ ૮૭૦॥

સ્થિરા સ્વભાવાન્મણિપાદુકે ત્વં
સર્વંસહા સ્વાદુફલપ્રસૂતિઃ ।
પૃથ્વીવ પદ્ભ્યાં પરમસ્ય પુંસઃ
સંસૃજ્યસે દેવિ વિભજ્યસે ચ ॥ ૨૯.૪૧॥ ૮૭૧॥

પશ્યન્તિ રઙ્ગેશ્વરપાદરક્ષે
પૂજાસુ તે સંહિતપુષ્પજાલામ્ ।
મૃગીદૃશો વાસવરત્નરેખાં
સચિત્રપુઙ્ખામિવ મન્મથજ્યામ્ ॥ ૨૯.૪૨॥ ૮૭૨॥

કરૈરુદગ્રૈઃ સ્ફુરતાં મણીનાં
મઞ્જુસ્વના માધવપાદુકે ત્વમ્ ।
અનૂપદેશે કનકાપગાયાઃ
કલેઃ પ્રવેશં પ્રતિષેધસીવ ॥ ૨૯.૪૩॥ ૮૭૩॥

આક્રાન્તવેદિર્ભવતી તદાની-
મદર્શિ મુક્તાન્વિતશોણરત્ના ।
કરગ્રહાર્થં ભરતેન ભૂમ્યા
લાજોત્કરૈર્વહ્નિશિખેવ કીર્ણા ॥ ૨૯.૪૪॥ ૮૭૪॥

પત્રલા મણિગણૈર્હિરણ્મયી
ભાસિ રઙ્ગપતિરત્નપાદુકે ।
કેલિમણ્ટપગતાગતોચિતા
ભૂમિકેવ ગરુડેવ કલ્પિતા ॥ ૨૯.૪૫॥ ૮૭૫॥

ઉન્નતં બલિવિરોધિનસ્તદા
પાદુકે પદસરોજમાશ્રિતા ।
મૌક્તિકસ્તબકમધ્યસમ્મિતં
વ્યોમ ષટ્પદતુલામલમ્ભયઃ ॥ ૨૯.૪૬॥ ૮૭૬॥

કોમલાઙ્ગુલિનિવેશયન્ત્રિકા-
ન્યસ્તમૌક્તિકમયૂખદન્તુરા ।
મઙ્ગલાનિ વમસીવ દેહિનાં
રઙ્ગરાજમણિપાદુકે સ્વયમ્ ॥ ૨૯.૪૭॥ ૮૭૭॥

પઙ્કજાસહચરસ્ય રઙ્ગિણઃ
પાદુકે નિજપદાદનન્તરમ્ ।
ન્યસ્યતસ્ત્વયિ જગન્તિ જાયતે
નાગભોગશયનં નિરઙ્કુશમ્ ॥ ૨૯.૪૮॥ ૮૭૮॥

સાધયન્તિ મધુવૈરિપાદુકે
સાધવઃ સ્થિરમુપાયમુત્તમમ્ । var મન્તિમમ્
ત્વત્પ્રવૃત્તિવિનિતવર્તનોચિત-
સ્વપ્રવૃત્તિવિનિવર્તનાન્વિતમ્ ॥ ૨૯.૪૯॥ ૮૭૯॥

નન્દસૂનુપદપદ્મમિન્દિરાપાણિપલ્લવનિપીડનાસહમ્ ।
પાદુકે તવ બલેન પર્યભૃદૂષ્મલામુરગમૌલિશર્કરામ્ ॥ ૨૯.૫૦॥ ૮૮૦॥

મણિનિકરસમુત્થૈઃ સર્વવર્ણા મયૂખૈઃ
પ્રકટિતશુભનાદા પાદુકે રઙ્ગભર્તુઃ ।
નિખિલનિગમસૂતેર્બ્રહ્મણસ્તત્સનાથા-
મવગમયસિ હૃદ્યામર્ધમાત્રાં ચતુર્થીમ્ ॥ ૨૯.૫૧॥ ૮૮૧॥

શ્રુતિવિષયગુણા ત્વં પાદુકે દૈત્યહન્તુઃ
સતતગતિમનોજ્ઞા સ્વેન ધામ્ના જ્વલન્તી ।
જનિતભુવનવૃદ્ધિર્દૃશ્યસે સ્થૈર્યયુક્તા
વિધૃતનિખિલભૂતા વૈજયન્તીવ માલા ॥ ૨૯.૫૨॥ ૮૮૨॥

રઘુપતિપદસઙ્ગાદ્રાજ્યખેદં ત્યજન્તી
પુનરપિ ભવતી સ્વાન્ દર્શયન્તી વિહારાન્ ।
અભિસમધિત વૃદ્ધિં હર્ષકોલાહલાનાં
જનપદજનિતાનાં જ્યાયસા શિઞ્જિતેન ॥ ૨૯.૫૩॥ ૮૮૩॥

હરિચરણમુપઘ્નં પાદુકે સંશ્રિતાયા-
મધિગતબહુશાખં વૈભવં દર્શયન્ત્યામ્ । var શાખા
અભજત વિધિહસ્તન્યસ્તધર્મદ્રવાયાં
ત્વયિ મુકુલસમૃદ્ધિં મૌક્તિકશ્રીસ્તદાનીમ્ ॥ ૨૯.૫૪॥ ૮૮૪॥

કનકરુચિરકાન્તિઃ કલ્પિતાશોકભારા
    કૃતપદકમલશ્રીઃ ક્રીડતા માધવેન ।
દિશિદિશિ સુમનોભિર્દર્શનીયાનુભાવા
    સુરભિસમયલક્ષ્મીં પાદુકે પુષ્યસિ ત્વમ્ ॥ ૨૯.૫૫॥ ૮૮૫॥

પ્રણિહિતપદપદ્મા પાદુકે રઙ્ગભર્તુઃ
    શુભતરગતિહેતુશ્ચારુમુક્તાપ્રવાલા ।
સ્થિરપરિણતરાગાં શુદ્ધબોધાનુબદ્ધાં
    સ્વજનયસિ મુનીનાં ત્વન્મયીં ચિત્તવૃત્તિમ્ ॥ ૨૯.૫૬॥ ૮૮૬॥

વિરચિતનવભાગા રત્નભેદૈર્વિચિત્રૈ-
    ર્વિવિધવિતતરેખાવ્યક્તસીમાવિભાગા ।
હરિચરણસરોજં પ્રેપ્સતામર્ચનીયં
    પ્રથયસિ નવનાભં મણ્ડલં પાદુકે ત્વમ્ ॥ ૨૯.૫૭॥ ૮૮૭॥

પરિણતગુણજાલા પઙ્ક્તિભિર્મૌક્તિકાનાં
    બહુવિધમણિરશ્મિગ્રન્થબન્ધાભિરામા ।
રઘુપતિપદરક્ષે રાજવાહ્યસ્ય કુમ્ભે
    કલિતરુચિરભૂસ્ત્વં કાઽપિ નક્ષત્રમાલા ॥ ૨૯.૫૮॥ ૮૮૮॥

ચરિતનિખિલવૃત્તિશ્ચારુપદ્માસનસ્થા
    ગુણનિબિડિતમુક્તાપઙ્ક્તિબદ્ધાક્ષમાલા ।
સવિધમધિવસન્તી પાદુકે રઙ્ગભર્તુ-
    શ્ચરણકમલમન્તર્બિમ્બિતં ધ્યાયસીવ ॥ ૨૯.૫૯॥ ૮૮૯॥

અનુપધિ પરિરક્ષન્નેકપુત્રાભિમાનાદ્-
    ભુવનમિદમશેષં પાદુકે રઙ્ગનાથઃ ।
નિજપદનિહિતાયાં દેવિ તિષ્ઠન્ વ્રજન્ વા
    ત્વયિ નિહિતભરોઽભૃત્ કિં પુનઃ સ્વાપમૃચ્છન્ ॥ ૨૯.૬૦॥ ૮૯૦॥

ત્વરિતમુપગતાનાં શ્રીમતો રઙ્ગભર્તુ-
    સ્ત્વદુપહિતપદસ્ય સ્વૈરયાત્રોત્સવેષુ ।
મુખરયતિ દિગન્તાન્મુહ્યતાં ત્વત્પ્રશસ્તૌ
    વિહિતકુસુમવૃષ્ટિર્વ્યાવઘોષી સુરાણામ્ ॥ ૨૯.૬૧॥ ૮૯૧॥

મનસિ નિયમયુક્તે વર્તમાના મુનીનાં

પ્રતિપદમુપયાન્તી ભાવનીયક્રમત્વમ્ ।
શ્રુતિરિવ નિજશબ્દૈઃ પાદુકે રઙ્ગભર્તુઃ
પદમનિતરગમ્યં વ્યક્તુમર્હા ત્વમેવ ॥ ૨૯.૬૨॥ ૮૯૨॥

અવિકલનિજચન્દ્રાલોકસન્દર્શનીયા
પ્રતિકલમુપભોગ્યા પાદુકે રઙ્ગભર્તુઃ ।
મુકુલયિતુમશેષં મૌક્તિકજ્યોત્સ્નયા નઃ
પ્રભવસિ તિમિરૌઘં પૌર્ણમાસી નિશેવ ॥ ૨૯.૬૩॥ ૮૯૩॥

હંસશ્રેણીપરિચિતગતિર્હારિણી કલ્મષાણાં
મૌલૌ શમ્ભોઃ સ્થિતિમધિગતા મુગ્ધચન્દ્રાનુબદ્ધા ।
રાજ્ઞામેકા રઘુકુલભુવાં સમ્યગુત્તારિકા ત્વં
કાલે તસ્મિન્ ક્ષિતિમધિગતા પાદુકે જાહ્નવીવ ॥ ૨૯.૬૪॥ ૮૯૪॥

સ્વચ્છાકારાં શ્રુતિસુરભિતાં સ્વાદુભાવોપપન્નાં
માર્ગેમાર્ગે મહિતવિભવાં પાદુકે તીર્થભેદૈઃ ।
શીતસ્પર્શાં શ્રમવિનયિનીં ગાહતે મન્દમન્દં
ક્રીડાલોલઃ કમલનિલયાદત્તહસ્તો યુવા ત્વામ્ ॥ ૨૯.૬૫॥ ૮૯૫॥

અભ્યસ્યન્ત્યોઃ ક્રમમનુપમં રઙ્ગભર્તુર્વિહારે
સ્થાનેસ્થાને સ્વરપરિણતિં લમ્ભિતસ્તત્તદર્હામ્ ।
પર્યાયેણ પ્રહિતપદયોઃ પાદુકે શ્રુત્યુદારઃ
શિઞ્જાનાદઃ સ્ફુરતિ યુવયોઃ શૃઙ્ખલાબન્ધરમ્યઃ ॥ ૨૯.૬૬॥ ૮૯૬॥

આસન્નાનાં દિવસમપુનર્નક્તમાપાદયન્તી
સ્ફીતાલોકા મુનિભિરભિતઃ પ્રાણિનામસ્તદોષા ।
પ્રહ્વૈર્જુષ્ટા વિબુધનિવહૈઃ પાદુકે રઙ્ગભર્તુઃ
પાદામ્ભોજે દિશતિ ભવતિ પૂર્વસન્ધ્યેવ કાન્તિમ્ ॥ ૨૯.૬૭॥ ૮૯૭॥

રમ્યાલોકા લલિતગમના પદ્મરાગાધરોષ્ઠી
મધ્યે ક્ષામા મણિવલયિની મૌક્તિકવ્યક્તહાસા ।
શ્યામા નિત્યં હરિતમણિભિઃ શાર્ઙ્ગિણઃ પાદરક્ષે
મન્યે ધાતુર્ભવસિ મહિલાનિર્મિતૌ માતૃકા ત્વમ્ ॥ ૨૯.૬૮॥ ૮૯૮॥

સ્થિત્વા પૂર્વં ક્વચનભવતી ભદ્રપીઠસ્ય મધ્યે
રત્નોદઞ્ચત્કિરણનિકરા રઙ્ગિણઃ પાદરક્ષે ।
વ્યાકીર્ણાનાં નૃપતિવિરહાદ્દેવિ વર્ણાશ્રમાણાં

નૂનં સીમાવિભજનસહં નિર્મમે સૂત્રપાતમ્ ॥ ૨૯.૬૯॥ ૮૯૯॥

માતર્મઞ્જુસ્વનપરિણતપાર્થનાવાક્યપૂર્વં
નિક્ષિપ્તાયાં ત્વયિ ચરણયોઃ પાદુકે રઙ્ગભર્તુઃ ।
ત્વય્યાયત્તં કિમપિ કુશલં જાનતીનાં પ્રજાનાં
પર્યાપ્તં તન્ન ખલુ ન ભવત્યાત્મનિક્ષેપકૃત્યમ્ ॥ ૨૯.૭૦॥ ૯૦૦॥

નિત્યં રઙ્ગક્ષિતિપતિપદન્યાસધન્યાત્મનસ્તે
શિઞ્જાનાદં શ્રવણમધુરં પાદુકે દીર્ઘયન્તઃ ।
કાલે તસ્મિન્ કરણવિગમક્લેશજાતં વિહન્યુઃ
સન્તાપં નસ્તરુણતુલસીગન્ધિનો ગન્ધવાહાઃ ॥ ૨૯.૭૧॥ ૯૦૧॥

સંસારાધ્વશ્રમપરિણતં સંશ્રિતાનાં જનાનાં
તાપં સદ્યઃ શમયિતુમલં શાર્ઙ્ગિણઃ પાદુકે ત્વમ્ ।
ચન્દ્રાપીડે પ્રણમતિ નવાં ચન્દ્રિકામાપિબદ્ભિ-
ર્ધારાનિર્યત્સલિલકણિકાશીકરૈશ્ચન્દ્રકાન્તૈઃ ॥ ૨૯.૭૨॥ ૯૦૨॥

વજ્રોપેતાં વલભિદુપલશ્યામલાં મઞ્જુઘોષાં
મુક્તાસારાં મધુરચપલાં વીક્ષ્ય વિષ્ણોઃ પદે ત્વામ્ ।
હર્ષોત્કર્ષાદુપરિ ચલયન્પાદુકે ચન્દ્રકાન્તં
ધત્તે નિત્યં ધૃતઘનરુચિસ્તાણ્ડવં નીલકણ્ઠઃ ॥ ૨૯.૭૩॥ ૯૦૩॥

શ્રીરઙ્ગેન્દોશ્ચરણકમલં તાદૃશં ધારયન્તી
કાલેકાલે સહ કમલયા ક્લૃપ્તયાત્રોત્સવશ્રીઃ ।
ગત્વાગત્વા સ્વયમનુગૃહદ્વારમુન્નિદ્રનાદા
પૌરાન્નિત્યં કિમપિ કુશલં પાદુકે પૃચ્છસીવ ॥ ૨૯.૭૪॥ ૯૦૪॥

ચતુરવિહારિણીં રુચિરપક્ષરુચિં ભવતીં
મનસિજસાયકાસનગુણોચિતમઞ્જુરવામ્ ।
અનુપદમાદ્રિયેમહિ મહેન્દ્રશિલામહિતાં
હરિચરણાવિન્દમકરન્દમધુવ્રતિકામ્ ॥ ૨૯.૭૫॥ ૯૦૫॥

કનકરુચા જટામુરગમૌલિમણીન્મણિભિ-
સ્ત્રિદિવતરઙ્ગિણીં તરલમૌક્તિકદીધિતિભિઃ ।
કુટિલતયા ક્વચિચ્છશિકલામધરીકુરુષે
મુરરિપુપાદુકે પુરભિદઃ શિરસા વિધૃતા ॥ ૨૯.૭૬॥ ૯૦૬॥

કાલે તલ્પભુજઙ્ગમસ્ય ભજતઃ કાષ્ઠાં ગતાં શેષતાં
    મૂર્તિં કામપિ વેદ્મિ રઙ્ગનૃપતેશ્ચિત્રાં પદત્રદ્વયીમ્ ।
સેવાનમ્રસુરાસુરેન્દ્રમકુટીશેષાપટીસઙ્ગમે
    મુક્તાચન્દ્રિકયેવ યા પ્રથયતે નિર્મોકયોગં પુનઃ ॥ ૨૯.૭૭॥ ૯૦૭॥

ચન્દ્રાપીડશિખણ્ડચન્દ્રશિખરચ્યોતત્સુધાનિર્ઝર-
    સ્તોકાશ્લિષ્ટસુરેન્દ્રશેખરરજઃસ્ત્યાનાં સ્તુમઃ પાદુકામ્ ।
બ્રહ્મસ્તમ્બવિભક્તસીમવિવિધક્ષેત્રજ્ઞસર્ગસ્થિતિ-
    ધ્વંસાનુગ્રહનિગ્રહપ્રણયિની યા સા ક્રિયા રઙ્ગિણઃ ॥ ૨૯.૭૮॥ ૯૦૮॥

લક્ષ્મીનૂપુરશિઞ્જિતેન ગુણિતં નાદં તવાકર્ણય-
    ન્નાજિઘ્રન્નિગમાન્તગન્ધતુલસીદામોત્થિતં સૌરભમ્ ।
કાલે કુત્રચિદાગતં કરુણયા સાર્ધં ત્વયા ચાગ્રતઃ
    પશ્યેયં મણિપાદુકે પરતરં પદ્મેક્ષણં દૈવતમ્ ॥ ૨૯.૭૯॥ ૯૦૯॥

વહતિ ક્ષિતિવ્યવહિતાં સોઽપિ ત્વાં ગતિષુ પાદુકે રઙ્ગી ।
કમઠપતિભુજગપરિબૃઢકરિવરકુલશિખરિભૂમિકાભેદૈઃ ॥ ૨૯.૮૦॥ ૯૧૦॥

ઇતિ શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
પ્રકીર્ણકપદ્ધતિઃ એકોનત્રિંશી ॥

## ૩૦. ચિત્રપદ્ધતિઃ (૪૦)

પ્રતિષ્ઠાં સર્વચિત્રાણાં પ્રપદ્યે મણિપાદુકામ્ ।
વિચિત્રજગદાધારો વિષ્ણુર્યત્ર પ્રતિષ્ઠિતઃ ॥ ૩૦.૧॥ ૯૧૧॥

શ ૃણુ તે પાદુકે ચિત્રં ચિત્રાભિર્મણિભિર્વિભોઃ
યુગક્રમભુવો વર્ણાન્ યુગપદ્વહસે સ્વયમ્ ॥ ૩૦.૨॥ ૯૧૨॥

સુરાસુરાર્ચિતા ધન્યા તુઙ્ગમઙ્ગલપાલિકા ।
ચરાચરાર્ચિતા માન્યા રઙ્ગપુઙવપાદુકા ॥ ૩૦.૩॥ ૯૧૩॥

પદ્મેવ મઙ્ગલસરિત્પારં સંસારસન્તતેઃ ।
દુરિતક્ષેપિકા ભૂયાત્પાદુકા રઙ્ગભૂપતેઃ ॥ ૩૦.૪॥ ૯૧૪॥

અનન્યશરણઃ સીદન્નનન્તક્લેશસાગરે ।

શરણં ચરણત્રાણં રઙ્ગનાથસ્ય સંશ્રયે ॥ ૩૦.૫॥ ૯૧૫॥

પ્રતિભાયાઃ પરં તત્ત્વં બિભ્રતી પદ્મલોચનમ્ ।
પશ્ચિમાયામવસ્થાયાં પાદુકે મુહ્યતો મમ ॥ ૩૦.૬॥ ૯૧૬॥

યામઃ શ્રયતિ યાં ધત્તે યેન યાત્યાય યાચ્ય યા ।
યાઽસ્ય માનાય યૈવાન્યા સા મામવતુ પાદુકા ॥ ૩૦.૭॥ ૯૧૭॥

ચર્યા નઃ શૌરિપાદુ ત્વં પ્રાયશ્ચિત્તેષ્વનુત્તમા ।
નિવેશ્યસે તતઃ સદ્ભિઃ પ્રાયશ્ચિત્તેષ્વનુત્તમા ॥ ૩૦.૮॥ ૯૧૮॥

રામપાદગતા ભાસા સા ભાતાગદપામરા ।
કાદુપાનઞ્ચ કાસહ્યા હ્યાસકાઞ્ચનપાદુકા ॥ ૩૦.૯॥ ૯૧૯॥

બાઢાઘાળીઝાટતુચ્છે ગાથાભાનાય કુલ્લખે ।
સમાધૌ શઠજિચ્ચૂડાં વૃણોષિ હરિપાદુકે ॥ ૩૦.૧૦॥ ૯૨૦॥

સા ભૂપા રામપારસ્થા વિભૂપાસ્તિસપારતા ।
તારપા સકૃપા દુષ્ટિપૂરપા રામપાદુકા ॥ ૩૦.૧૧॥ ૯૨૧॥

કારિકા ન ન યાત્રાયા યાગેયાસ્યસ્યભાનુભા ।
પાદપા હહ સિદ્ધાસિ યજ્ઞાય મમ સાઞ્જસા ॥ ૩૦.૧૨॥ ૯૨૨॥

સરાઘવા શ્રુતૌ દૃષ્ટા પાદુકા સનૃપાસના ।
સલાઘવા ગતૌ શ્લિષ્ટા સ્વાદુર્મે સદુપાસના ॥ ૩૦.૧૩॥ ૯૨૩॥

કાવ્યાયાસ્થિત માવર્ગવ્યાજયાતગમાર્ગકા
કામદા જગતઃ સ્થિત્યૈ રઙ્ગપુઙવપાદુકા ॥ ૩૦.૧૪॥ ૯૨૪॥

સુરકાર્યકરી દેવી રઙ્ગધુર્યસ્ય પાદુકા ।
કામદા કલિતાદેશા ચરન્તી સાધુવર્ત્મસુ ॥ ૩૦.૧૫॥ ૯૨૫॥

ભરતારાધિતાં તારાં વન્દે રાઘવપાદુકામ્ ।
ભવતાપાધિતાન્તાનાં વન્દ્યાં રાજીવમેદુરામ્ ॥ ૩૦.૧૬॥ ૯૨૬॥

કાદુપાસ્ય સદાલોકા કાલોદાહૃતદામકા ।
કામદાધ્વરિરંસાકાઽકાસા રઙ્ગેશપાદુકા ॥ ૩૦.૧૭॥ ૯૨૭॥

પાપાકૂપારપાળીપા ત્રિપાદીપાદપાદપા ।
કૃપારૂપા જપાલાપા સ્વાપા માઽપાન્નૃપાધિપા ॥ ૩૦.૧૮॥ ૯૨૮॥

સ્થિરાગસાં સદારાધ્યા વિહતાકતતામતા ।
સત્પાદુકે સરાસામા રઙ્ગરાજપદં નય ॥ ૩૦.૧૯॥ ૯૨૯॥

સ્થિતા સમયરાજત્પા ગતરામાદકે ગવિ ।
દુરંહસાં સન્નતાદા સાધ્યા તાપકરાસરા ॥ ૩૦.૨૦॥ ૯૩૦॥

લોકતારા કામચારા કવિરાજદુરાવચા ।
તારાગતે પાદરામ રાજતે રામપાદુકા ॥ ૩૦.૨૧॥ ૯૩૧॥

જયામપાપામયાજયામહે દુદુહે મયા ।
મહેશકાકાશહેમ પાદુકા મમ કાદુપા ॥ ૩૦.૨૨॥ ૯૩૨॥

પાપાદપાપાદપાપા પાદપાદદપાદપા ।
દપાદપાપાદપાદ પાદપા દદપાદપા ॥ ૩૦.૨૩॥ ૯૩૩॥

કોપોદ્દીપકપાપેઽપિ કૃપાપાકોપપાદિકા ।
પૂદપાદોદકાપાદોદ્દીપિકા કાઽપિ પાદુકા ॥ ૩૦.૨૪॥ ૯૩૪॥

તતાતત્તાતિતત્તેતા તાતતીતેતિતાતિતુત્ ।
તત્તત્તત્તાતતિતતા તતેતાતેતતાતુતા ॥ ૩૦.૨૫॥ ૯૩૫॥

યાયાયાયાયાયાયાયા યાયાયાયાયાયાયાયા
યાયાયાયાયાયાયાયા યાયાયાયાયાયાયાયા ॥ ૩૦.૨૬॥ ૯૩૬॥

રઘુપતિચરણાવની તદા વિરચિતસઞ્ચરણા વનીપથે ।
કૃતપરિચરણા વનીપકૈર્નિગમમુખૈશ્ચ રણાવનીગતા ॥ ૩૦.૨૭॥ ૯૩૭॥

દત્તકેલિં જગત્કલ્પનાનાટિકા-
  રઙ્ગિણા રઙ્ગિણા રઙ્ગિણા રઙ્ગિણા ।
તાદૃશે ગાધિપુત્રાધ્વરે ત્વાં વિનાઽ-
  પાદુક અપાદુકા પાદુકા પાદુકા ॥ ૩૦.૨૮॥ ૯૩૮॥

પાદપાપાદપાપાદપાપાદપા પાદપા પાદપાપાદપાપાદપા ।
પાદપાપાદપાપાદપાપાદપાપાદપાપાદપાપાદપાપાદપા ॥ ૩૦.૨૯॥ ૯૩૯॥

સાકેતત્રાનવેલાજનિતતતનિજપ્રાઙ્ગણશ્રીપ્રભાસા
  સાભાપ્રશ્રીરટવ્યામિયમમમયમિવ્યાપદુચ્છેદિલાસા ।
સાલાદિચ્છેદતિગ્માહવરુરુરુવહ હ્રીકરસ્યામરાસા-
  સા રામસ્યાઙ્ઘ્રિમભ્યાજતિનનતિજસ્થૂલમુત્રાતકેસા ॥ ૩૦.૩૦॥ ૯૪૦॥

રમ્યે વેશ્મનિ પાપરાક્ષસભિદાસ્વાસત્તધીનાયિકા
  નન્તું કર્મજદુર્મદાલસધિયાં સા હન્તનાથીકૃતા ।
સદ્વાટભ્રમિકાસુ તાપસતપોવિસ્રમ્ભભૂયન્ત્રિકા
  કાચિત્સ્વૈરગમેન કેલિસમયે કામવ્રતા પાદુકા ॥ ૩૦.૩૧॥ ૯૪૧॥

શ્રીસંવેદનકર્મકૃદ્વસુ તવ સ્યામૃદ્ધધૈર્યસ્ફુટઃ
  શ્રીપાદાવનિ વિસ્તૃતાસિ સુખિની ત્વં ગેયયાતાયના ।
વેદાન્તાનુભવાતિપાતિસુતનુઃ સાન્દ્રેઙ્યભાવપ્રથેઽ-
  ઙ્કસ્થા ચાચ્યુતદિવ્યદાસ્યસુમતિઃ પ્રાણસ્થસીતાધન ॥ ૩૦.૩૨॥ ૯૪૨॥

કનકપીઠનિવિષ્ટતનુસ્તદા સુમતિદાયિનિજાનુભવસ્મૃતા ।
વિધિશિવપ્રમુખૈરભિવન્દિતા વિજયતે રઘુપુઙ્ગવપાદુકા ॥ ૩૦.૩૩॥ ૯૪૩॥

દીનગોપીજનિ ક્લિષ્ટભીનુત્સદા
  રામપાદાવનિ સ્વાનુભાવસ્થિતા ।
એધિ મેઽવશ્યમુત્તારભાવશ્રિતા
  તેજસા તેન ધુષ્ટિં ગતા પાલિકા ॥ ૩૦.૩૪॥ ૯૪૪॥

ધામનિરાકૃત તામસલોકા ધાતૃમુખૈર્વિનતા નિજદાસૈઃ ।
પાપમશેષમપાકુરુષે મે પાદુ વિભૂષિતરાઘવપાદા ॥ ૩૦.૩૫॥ ૯૪૫॥

કૃપાનઘત્રાતસુભૂરદુષ્ટા
  મેધ્યા રુચા પારિષદામભૂપા ।
પદાવનિ સ્ત્યાનસુખૈર્ન તૃપ્તા
  કાન્ત્યા સમેતાધિકૃતાઽનિરોધા ॥ ૩૦.૩૬॥ ૯૪૬॥

સારસસૌખ્યસમેતા ખ્યાતા પદપા ભુવિ સ્વાજ્ઞા ।
સાહસકાર્યવનાશા ધીરા વસુદા નવન્યાસા ॥ ૩૦.૩૭॥ ૯૪૭॥

સાન્યાઽવનદા સુરવરાઽધીશાના વર્યકા સહસા ।
જ્ઞા સ્વા વિભુપાદપતાખ્યાતા મે સખ્યસૌ સરસા ॥ ૩૦.૩૮॥ ૯૪૮॥

તારસ્ફારતરસ્વરરસભરરા સા પદાવની સારા ।
ધીરસ્વૈરચરસ્થિર રઘુપુરવાસરતિરામસવા ॥ ૩૦.૩૯॥ ૯૪૯॥

ચરમચરં ચ નિયન્તુશ્ચરણાવનિદમ્પરેતરા શૌરેઃ ।
ચરમપુરુષાર્થચિત્રૌ ચરણાવનિ દિશસિ ચત્વરેષુ સતામ્ ॥ ૩૦.૪૦॥ ૯૫૦॥

ઇતિ શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય

શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
ચિત્રપદ્ધતિઃ ત્રિંશી ॥

## ૩૧. નિર્વેદપદ્ધતિઃ (૨૦)

પ્રપદ્યે પાદુકાં દેવી પરવિદ્યામિવ સ્વયમ્ ।
યામર્પયતિ દીનાનાં દયમાનો જગદ્ગુરુઃ ॥ ૩૧.૧॥ ૯૫૧॥

અપિ જન્મનિ પાદુકે પરસ્મિ-
    ન્નનઘૈઃ કર્મભિરીદૃશો ભવેયમ્ ।
ય ઇમે વિનયેન રઙ્ગભર્તુઃ
    સમયે ત્વાં પદયોઃ સમર્પયન્તિ ॥ ૩૧.૨॥ ૯૫૨॥

પરિવર્તયિતા પિતામહાદીન્ ।
    ત્વમિવાનન્તમસૌ વહત્યનેહા ।
અધુનાઽપિ ન શૌરિપાદુકે ત્વા-
    મનઘાલમ્બનમભ્યુપૈતિ ચિત્તમ્ ॥ ૩૧.૩॥ ૯૫૩॥

કમલાધ્યુષિતે નિધૌ નિરીહે
    સુલભે તિષ્ઠતિ રઙ્ગકોશમધ્યે ।
ત્વયિ તત્પ્રતિલમ્ભને સ્થિતાયાં
    પરમન્વિચ્છતિ પાદુકે મનો મે ॥ ૩૧.૪॥ ૯૫૪॥

યદ્યપ્યહં તરલધીસ્તવ ન સ્મરેયં
    ન સ્મર્તુમર્હસિ કથં ભવતી સ્વયં મે ।
વત્સે વિહારકુતુકં કલયત્યવસ્થા
    કા નામ કેશવપદાવનિ વત્સલાયાઃ ॥ ૩૧.૫॥ ૯૫૫॥

માતર્મુકુન્દકરુણામપિ નિહ્નુવાના-
    ત્કિં વા પરં કિમપિ કિલ્બિષતો મદીયાત્ ।
ગાઢં ગૃહીતચરણા ગમનાપદેશા-
    ત્તત્પ્રેરણપ્રણયિની તવ ચેન્ન લીલા ॥ ૩૧.૬॥ ૯૫૬॥

ક્ષીબાઽસિ કાઞ્ચનપદાવનિ કૈટભારેઃ
    પાદારવિન્દમકરન્દનિષેવણેન ।
દેવિ ત્વદન્તિકજુષઃ કથમન્યથા મે

દીનાક્ષરાણિ ન શૃણોષિ દયાધિકા ત્વમ્ ॥ ૩૧.૭॥ ૯૫૭॥

માતસ્ત્વદર્પિતભરસ્ય મુકુન્દપાદે
ભદ્રેતરાણિ યદિ નામ ભવન્તિ ભૂયઃ ।
કીર્તિઃ પ્રપન્નપરિરક્ષણદીક્ષિતાયાઃ
કિં ન ત્રપેત તવ કાઞ્ચનપાદરક્ષે ॥ ૩૧.૮॥ ૯૫૮॥

દૌવારિકદ્વિરસનપ્રબલાન્તરાયૈ-
ર્દૂયે પદાવનિ દુરાઢ્યબિલપ્રવેશૈઃ ।
તદ્રઙ્ગધામનિરપાયધનોત્તરાયાં
ત્વય્યેવ વિશ્રમય મઙ્ક્ષુ મનોરથં મે ॥ ૩૧.૯॥ ૯૫૯॥

વ્યામુહ્યતાં ત્રિવિધતાપમયે નિદાઘે
માયાવિશેષજનિતાસુ મરીચિકાસુ ।
સંસ્પૃષ્ટશૌરિચરણા ચરણાવનિ ત્વં
સ્થેયા સ્વયં ભવસિ નશ્વરમે પુમર્થે ॥ ૩૧.૧૦॥ ૯૬૦॥

અચ્છેદ્યયા વિષયવાગુરયા નિબદ્ધાન્
દીનાન્ જનાર્દનપદાવનિ સત્પથસ્થા ।
પ્રાયઃ ક્રમેણ ભવતી પરિગૃહ્ય મૌલૌ
કાલેન મોચયતિ નઃ કૃપયા સનાથા ॥ ૩૧.૧૧॥ ૯૬૧॥

સંવાહિકા ચરણયોર્મણિપાદરક્ષે
દેવસ્ય રઙ્ગવસતેર્દયિતા નનુ ત્વમ્ ।
કસ્ત્વાં નિવારયિતુમર્હતિ યોજયન્તીં
માતઃ સ્વયં ગુણગણેષુ મમાપરાધાન્ ॥ ૩૧.૧૨॥ ૯૬૨॥

કિં વા ભવિષ્યતિ પરં કલુશૈકવૃત્તે-
રેતાવતાઽપ્યનુપજાતમનેહસા મે ।
એકં તદસ્તિ યદિ પશ્યસિ પાદુકે તે
પદ્માસહાયપદપઙ્કજભોગસામ્યમ્ ॥ ૩૧.૧૩॥ ૯૬૩॥

વિવિધવિષયચિન્તાસન્તતાભિશ્ચિરં માં
જનિતકલુષમિત્થં દેવિ દુર્વાસનાભિઃ ।
પદસરસિજયોસ્ત્વં પાદુકે રઙ્ગભર્તુઃ
પરિમલપરિવાહૈઃ પાવનૈર્વાસયેથાઃ ॥ ૩૧.૧૪॥ ૯૬૪॥

શરણમધિગતસ્ત્વાં શાર્ઙ્ગિણઃ પાદરક્ષે
    સકૃદપિ વિનિયુક્તં ત્વત્સપર્યાધિકારે ।
પુનરપિ કથમેનં હસ્તમુત્તાનયેયં
    ધનમદમુદિતાનાં માનવાનાં સમાજે ॥ ૩૧.૧૫॥ ૯૬૫॥

યદિ કિમપિ સમીહે કર્મ કર્તું યથાવ-
    ત્પ્રતિપદમુપજાતૈઃ પ્રત્યવેયાં નિમિત્તૈઃ ।
અવધિરસિ યદિ ત્વં તત્ર નૈમિત્તિકાનાં
    શરણમિહ ન કિં મે શૌરિપાદાવનિ સ્યાઃ ॥ ૩૧.૧૬॥ ૯૬૬॥

અન્તર્લીનૈરઘપરિકરૈરાવિલા ચિત્તવૃત્તિઃ
    શબ્દાદીનાં પરવશતયા દુર્જયાનીન્દ્રિયાણિ ।
વિષ્ણોઃ પાદપ્રણયિનિ ચિરાદસ્ય મે દુઃખસિન્ધોઃ
    પારં પ્રપ્યં ભવતિ પરયા વિદ્યયા વા ત્વયા વા ॥ ૩૧.૧૭॥ ૯૬૭॥

ગોમાયૂનાં મલયપવને તસ્કરાણાં હિમાંશૌ
    દુર્વૃત્તાનાં સુચરિતમયે સત્પથે ત્વત્સનાથે ।
તત્ત્વજ્ઞાને તરલમનસાં શાર્ઙ્ગિણઃ પાદરક્ષે
    નિત્યોદ્વેગો ભવતિ નિયતેરીદૃશી દુર્વિનીતિઃ ॥ ૩૧.૧૮॥ ૯૬૮॥

કાલે જન્તૂન્ કલુષકરણે ક્ષિપ્રમાકારયન્ત્યા
    ઘોરં નાહં યમપરિષદો ઘોષમાકર્ણયેયમ્ ।
શ્રીમદ્રઙ્ગેશ્વરચરણયોરન્તરઙ્ગૈઃ પ્રયુક્તં
    સેવાજ્ઞાનં સપદિ શ◌ૃણુયાં પાદુકાસેવકેતિ ॥ ૩૧.૧૯॥ ૯૬૯॥

પાષાણકલ્પમન્તે પરિચિતગૌતમપરિગ્રહન્યાયાત્ ।
પતિપદપરિચરણાર્હં પરિણમય મુકુન્દપાદરક્ષિણિ મામ્ ॥ ૩૧.૨૦॥ ૯૭૦॥

ઇતિ શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
નિર્વેદપદ્ધતિરેકત્રિંશી ॥

## ૩૨. ફલપદ્ધતિઃ (૩૮)

ઉપાખ્યાતાં તથાત્વેન વસિષ્ઠાદ્યૈર્મહર્ષિભિઃ ।
ઉપાયફલયોઃ કાષ્ઠામુપાસે રામપાદુકામ્ ॥ ૩૨.૧॥ ૯૭૧॥

નિવિશેય નિરન્તરં પ્રતીતસ્ત્રિદશાનાં વિભવં તૃણાય મત્વા ।
સવિધે તવ દેવિ રઙ્ગભર્તુઃ પદલીલાકમલં સમુદ્વહન્ત્યાઃ ॥ ૩૨.૨॥ ૯૭૨॥

કિમહં મણિપાદુકે ત્વયા મે સુલભે રઙ્ગનિધૌ શ્રિયા સનાથે ।
કરણાનિ પુનઃ કદર્થયેયં કૃપણદ્વારદુરાસિકાદિદુઃખૈઃ ॥ ૩૨.૩॥ ૯૭૩॥

સકૃદપ્યનુભૂય રઙ્ગભર્તુસ્ત્વદુપશ્લેષમનોહરં પદાબ્જમ્ ।
અપુનર્ભવકૌતુકં તદૈવ પ્રશમં ગચ્છતિ પાદુકે મુનીનામ્ ॥ ૩૨.૪॥ ૯૭૪॥

અપરસ્પરપાતિનામમીષા-
    મનિદમ્પૂર્વનિરૂઢસન્તતીનામ્ ।
ભરતવ્યસનાદનૂનસીમ્નાં
    દુરિતાનાં મમ નિષ્કૃતિસ્ત્વમાસીઃ ॥ ૩૨.૫॥ ૯૭૫॥

ત્વદુપાસનસંપ્રદાયવિદ્ભિઃ
    સમયે સાત્ત્વતસેવિતે નિયુક્તાઃ ।
ભરતવ્રતિનો ભવામ્બુરાશિં
    કતિચિત્ કાઞ્ચનપાદુકે તરન્તિ ॥ ૩૨.૬॥ ૯૭૬॥

અલમચ્યુતપાદુકે યથાવ-
    ત્ભવતી યચ્ચ પદં ત્વદેકધાર્યમ્ ।
ઇતરેતરભૂષિતં તદેત-
    ત્દ્વિતયં સંવનનાય ચેતસો નઃ ॥ ૩૨.૭॥ ૯૭૭॥

અનન્યસામાન્યતયા મુરારે-
    રઙ્ગેષ્વવાપ્તેષુ કિરીટમુખ્યૈઃ ।
પાદાવનિ ત્વં નિજમેવ ભાગં
    સર્વાત્મસાધારણતામનૈષીઃ ॥ ૩૨.૮॥ ૯૭૮॥

સમાશ્રિતાનાં મણિપાદુકે ત્વાં
    વિપશ્ચિતાં વિષ્ણુપદેઽપ્યનાસ્થા ।
કથં પુનસ્તે કૃતિનો ભજેરન્
    વાસાદરં વાસવરાજધાન્યામ્ ॥ ૩૨.૯॥ ૯૭૯॥

વિમૃશ્ય રઙ્ગેશ્વરપાદરક્ષે
    વારક્રમં નૂનમવારણીયમ્ ।
પદ્માગ્રહેઽપિ સ્પૃશતી પ્રતીતા

સ્થૂલેન રૂપેણ વસુન્ધરા ત્વામ્ ॥ ૩૨.૧૦॥ ૯૮૦॥

અભિરક્ષસિ ત્વમનપાયનિધિં
મણિપાદુકે મધુભિદશ્ચરણમ્ ।
અત એવ દેવિ તદનન્યધનાઃ
શિરસા વહન્તિ ભવતીં કૃતિનઃ ॥ ૩૨.૧૧॥ ૯૮૧॥

પદયુગમિવ પાદુકે મુરારે-
ર્ભવતિ વિભૂતિરકણ્ટકા ત્વયૈવ ।
કથમિવ હૃદયાનિ ભાવુકાનાં
ત્વદનુભવાદુપજાતકણ્ટકાનિ ॥ ૩૨.૧૨॥ ૯૮૨॥

જ્ઞાનક્રિયાભજનસીમવિદૂરવૃત્તે-
ર્વૈદેશિકસ્ય તદવાપ્તિકૃતાં ગુણાનામ્ ।
મૌલૌ મમાસિ મધુસૂદનપાદુકે ત્વં
ગઙ્ગેવ હન્ત પતિતા વિધિનૈવ પઙ્ગોઃ ॥ ૩૨.૧૩॥ ૯૮૩॥

રઙ્ગેશ્વરસ્ય યદિયં મણિપાદરક્ષે
પાદારવિન્દયુગલં ભવતીસમેતમ્ ।
પુંસામુપોષિતવિલોચનપારણાર્હં
ક્ષીરં તદેતદિહ શર્કરયા સમેતમ્ ॥ ૩૨.૧૪॥ ૯૮૪॥

કામાદિદોષરહિતં ત્વદનન્યકામાઃ
કર્મ ત્રયોદશવિધં પરિશીલયન્તઃ ।
પાદાવનિ ત્વદનુષઙ્ગવિશેષદૃશ્ય-
મેકાન્તિનઃ પરિચરન્તિ પદં મુરારેઃ ॥ ૩૨.૧૫॥ ૯૮૫॥

મૌલૌ સ્થિતા મખભુજામથવા શ્રુતીનાં
તદ્રઙ્ગરાજચરણાવનિ વૈભવં તે ।
અસ્માદૃશામપિ યદિ પ્રથિતં તતઃસ્યા-
ત્સૌલભ્યમમ્બ તદિદં તવ સાર્વભૌમમ્ ॥ ૩૨.૧૬॥ ૯૮૬॥

સ્વપ્નેઽપિ ચેત્ ત્વમસિ મૂર્ધનિ સન્નિવિષ્ટા
નમ્રસ્ય મે નરકમર્દનપાદરક્ષે ।
સ્થાને તદેતદિહ દેવિ યતઃ સમાધૌ
સન્તો વિદુસ્તમપિ તાદૃશબુદ્ધિગમ્યમ્ ॥ ૩૨.૧૭॥ ૯૮૭॥

બદ્ધાઞ્જલિઃ પરિચરન્નિયમેવ રઙ્ગે
    વિશ્રાણિતાચ્યુતનિધિં મણિપાદુકે ત્વામ્ ।
કસ્યાપિ કૂણિતદૃશો ધનિનઃ પુરસ્તા-
    દુત્તાનયેય ન કદાઽપિ કરં વિકોશમ્ ॥ ૩૨.૧૮॥ ૯૮૮॥

ત્વય્યર્પિતેન ચરણેન સદધ્વભાજઃ
    પાદાવનિ પ્રથિતસાત્ત્વિકભાવદૃશ્યાઃ ।
રઙ્ગેશવદ્વિદધતે મુહુરઙ્ગહારાન્
    રઙ્ગે મહીયસિ નટા ઇવ ભાવુકાસ્તે ॥ ૩૨.૧૯॥ ૯૮૯॥

યેન સ્થિતા શિરસિ મે વિધિનાઽધુના ત્વં
    તેનૈવ દેવિ નિયતં મમ સામ્પરાયે ।
લક્ષ્યીકરિષ્યસિ પદાવનિ રઙ્ગનાથં
    લક્ષ્મીપદામ્બુરુહયાવકપઙ્કલક્ષ્યમ્ ॥ ૩૨.૨૦॥ ૯૯૦॥

હરિચરણસરોજે ભક્તિભાજાં જનાના-
    મનુકરણવિશેષૈરાત્મનૈવોપહાસ્યમ્ ।
પરિણમય દયાર્દ્રા પાદુકે તાદૃશં માં
    ભરતપરિષદન્તર્વર્તિભિઃ પ્રેક્ષણીયમ્ ॥ ૩૨.૨૧॥ ૯૯૧॥

દુરિતમપનયન્તી દૂરતઃ પાદુકે ત્વં
    દનુજમથનલીલાં દેવતામાનયન્તી ।
અનિતરશરણાનામગ્રિમસ્યાસ્ય જન્તો-
    રવશકરણવૃત્તેરગ્રતઃ સન્નિધેયાઃ ॥ ૩૨.૨૨॥ ૯૯૨॥

ચરમનિગમગીતે સપ્તતન્તૌ સમાપ્તે
    નિજસદનસમીપે પ્રાપયિષ્યન્ વિહારમ્ ।
જ્વલનમિવ ભવત્યોઃ સમ્યગારોપયેન્માં
    પ્રથમવરણવશ્યઃ પાદુકે રઙ્ગનાથઃ ॥ ૩૨.૨૩॥ ૯૯૩॥

પુનરુદરનિવાસચ્છેદનં સહ્યસિન્ધોઃ
    પુલિનમધિવસેયં પુણ્યમાબ્રહ્મલાભાત્ ।
પરિણમતિ શરીરે પાદુકે યત્ર પુંસાં
    ત્વમસિ નિગમગીતા શાશ્વતં મૌલિરત્નમ્ ॥ ૩૨.૨૪॥ ૯૯૪॥

બહુવિધપુરુષાર્થગ્રામસીમાન્તરેખાં
    હરિચરણસરોજન્યાસધન્યામનન્યઃ ।

ભરતસમયસિદ્ધાં પાદુકે ભાવયંસ્ત્વાં
    શતમિહ શરદસ્તે શ્રાવયેયં સમૃદ્ધિમ્ ॥ ૩૨.૨૫॥ ૯૯૫॥

તિલકયસિ શિરો મે શૌરિપાદવનિ ત્વં
    ભજસિ મનસિ નિત્યં ભૂમિકાં ભાવનાખ્યામ્ ।
વચસિ ચ વિભવૈઃ સ્વૈર્વ્યક્તિમિત્થં પ્રયાતા
    તદિહ પરિણતં મે તાદૃશં ભાગધેયમ્ ॥ ૩૨.૨૬॥ ૯૯૬॥

અજનિષિ ચિરમાદૌ હન્ત દેહેન્દ્રિયાદિ-
    સ્તદનુ તદધિકઃ સન્નીશ્વરોઽહં વભૂવ ।
અથ ભગવત એવાભૂવમર્થાદિદાનીં
    તવ પુનરહમાસં પાદુકે ધન્યજન્મા ॥ ૩૨.૨૭॥ ૯૯૭॥

ત્વય્યાયત્તૌ ભગવતિ શિલાભસ્મનોઃ પ્રાણદાનાં-
    દાસ્ત્રીબાલં પ્રથિતવિભવૌ પાદપદ્મૌ મુરારેઃ ।
તામેવાહં શિરસિનિ હિતામદ્ય પશ્યામિં દૈવા-
    દાત્માધારાં જનનિ ભવતીમાત્મલાભપ્રસૂતિમ્ ॥ ૩૨.૨૮॥ ૯૯૮॥

કથઙ્કારં લક્શ્મીકરકમલયોગ્યં નિજપદં
    નિદધ્યાદ્રઙ્ગેશઃ કુલિશકઠિનેઽસ્મિન્મનસિ નઃ ।
ન ચેદેવં મધ્યે વિશતિ દયયા દેવિ ભવતી
    નિજાકાન્તિક્ષુણ્ણસ્મરશરશિખાકણ્ટકતતિઃ ॥ ૩૨.૨૯॥ ૯૯૯॥

ક્રીડાલૌલ્યં કિમપિ સમયે પાદુકે વર્જયન્તી
    નિર્વેશં સ્વં દિશસિ ભવતીનાથયોઃ શ્રીધરણ્યોઃ ।
મામપ્યેવં જનય મધુજિત્પાદયોરન્તરઙ્ગં
    રઙ્ગં યાઽસૌ જનયસિ ગુણૈર્ભારતીનૃત્તરઙ્ગમ્ ॥ ૩૨.૩૦॥ ૧૦૦૦॥

ઇતિ રઙ્ગધુરીણપાદુકે ત્વં
    સ્તુતિલક્ષેણ સહસ્રશો વિમૃષ્ટા ।
સફલં મમ જન્મ તાવદેત-
    ત્યદિહાશાસ્યમતઃપરં કિમેતત્ ॥ ૩૨.૩૧॥ ૧૦૦૧॥

માતઃ સ્વરૂપમિવ રઙ્ગપતેર્નિવિષ્ટં
    વાચામસીમનિ પદાવનિ વૈભવં તે ।
મોહાદમિષ્ટુતવતો મમ મન્દબુદ્ધે-
    ર્બાલસ્ય સાહસમિદં દયયા સહેથાઃ ॥ ૩૨.૩૨॥ ૧૦૦૨॥

યે નામ ભક્તિનિયતાઃ કવયો મદન્યે
    માતઃ સ્તુવન્તિ મધુસૂદનપાદુકે ત્વામ્ ।
લપ્સ્યે ગુણાંશવિનિવેશિતમાનસાનાં
    તેષામહં સબહુમાનવિલોકિતાનિ ॥ ૩૨.૩૩॥ ૧૦૦૩॥

સઙ્ઘર્ષયન્તિ હૃદયાન્યસતાં ગુણાંશે
    સન્તસ્તુ સન્તમપિ ન પ્રથયન્તિ દોષમ્ ।
તદ્રઙ્ગનાથચરણાવનિ તે સ્તુતીના-
    મેકા પરં સહસતોરિહ સાક્ષિણી ત્વમ્ ॥ ૩૨.૩૪॥ ૧૦૦૪॥

ઇત્થં ત્વમેવ નિજકેલિવશાદકાર્ષી-
    રિક્ષ્વાકુનાથપદપઙ્કજયોરનન્યા ।
સ્વીયં પદાવનિ મયા સુમહચ્ચરિત્રં
    સીતેવ દેવિ સહજેન કવીશ્વરેણ ॥ ૩૨.૩૫॥ ૧૦૦૫॥

પૃથુકવદનશઙ્ખસ્પર્શનીત્યા કદાચિ-
    ચ્છિરસિ વિનિંહિતાયાઃ સ્વેન ભૂમ્ના તવૈવ ।
સ્તુતિરિયમુપજ્ઞાતા મન્મુખેનેત્યધીયુઃ
    પરિચરણપરાસ્તે પાદુકેઽપાસ્તદોષાઃ ॥ ૩૨.૩૬॥ ૧૦૦૬॥

યદિસ્ફીતા ભક્તિઃ પ્રણય(વ)મુખવાણીપરિપણં
    પદત્રાણસ્તોત્રં હૃદિ બિભૃત રઙ્ગક્ષિતિભૃતઃ ।
નિરુન્માદો યદ્વા નિરબધિસુધાનિર્ઝરમુચો
    વચોભઙ્ગીરેતા ન કથમનુરુન્ધે સહૃદયઃ ॥ ૩૨.૩૭॥ ૧૦૦૭॥

જયતિ યતિરાજસૂક્તિર્જયતિ મુકુન્દસ્ય પાદુકાયુગલી ।
તદુભયધનાસ્ત્રિવેદીમવન્ધ્યયન્તો જયન્તિ ભુવિ સન્તઃ ॥ ૩૨.૩૮॥ ૧૦૦૮॥

ઇતિ શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રે
ફલપદ્ધતિઃ દ્વાત્રિંશી ॥

ઇતિ શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ શ્રીરઙ્ગનાથપાદુકાસહસ્રં સમ્પૂર્ણમ્ ॥

Contents

1 Introduction
2 How Paaduka is appropriately referred to as
Sataari or Satakopam
3 Greatness of Paaduka
4 Rama had pledged Paaduka to Bharata as surety
for return
5 Return of Paaduka to Ayodhya with Bharata
6 Assumption of Power
7 Coronation of the Paaduka
8 Reinstatement at Rama's feet after
9 Poets and Panegyrists sing Paaduka'spraise
10 Love-play between Paaduka Devi and Lord Rama
11 The Lord strolls with the Paadukas on
12 Oblations with flowers
13 Potency of dust from the Paadukas
14 On the melody of Paaduka walking
15 Gems as a totality-Distant view
16 Varieties of gems present together emitting
spectra-near view
17 The luster of the ruby
18 On pearls in the Paaduka
19 On the emerald gems
20 On the sapphire beauty
21 Objects reflected in the Paadukas lustrous surface
22 Gold Paadukas
23 Paaduka exhibiting its status of subservience.
Also the incarnation of Adisesha
24 The twin-Paaduka and its speciality
25 Shape and beauty of the Paaduka
26 The knob in each Paaduka
27 Of the streaks on the Paaduka
28 The maxims of conduct that the Paaduka implies

29 Miscellaneous aspects
30 Chitra Paddhati which emphasizes asuitable fitting matrix of artistry aspecialty of Oriental poetry
31 Words in disgust, in humility; entreating about one's pitiable plight
32 Rewards for having composed of the work and for recitation of the same

Proofread by Pooja P

*Shri Ranganatha Paduka Sahasram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*